तस्य तादृशानुमितिजनकज्ञानमात्रपरत्वेच बाधादावव्याप्तिः । बाधादिज्ञानस्य परामर्शाप्रतिबन्धकत्वात् । अतोऽनुमिति पदमजहत्स्वार्थलक्षणया तदुभयपरतया व्याचष्टे तथेति । तादृश लक्षणवाक्य इत्यर्थः । लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतरूपमाहानुमितिनिष्ठकार्य्यतानिरूपकसम्बन्धित्वेनेति । अनुमितिपदस्य प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकावच्छिन्न-प्रकारक-प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्शयिष्यति । अतोन वक्ष्यमाणातिप्रसङ्गः । निरूपकत्वञ्चात्र यदि प्रतियोगित्वं, तदा कार्य्यस्य कार्य्यताप्रतियोगित्वाभावादनुमित्यसंग्रहः, अतः सम्बन्धिपदं सम्बन्धिद्वयसाधारणस्य तत्*साक्षात्कारजनक†साक्षात्कारविषयतात्मक‡ निरूपकत्वस्य लाभाय । अत्र पर्वतोवह्निमान्

---

* तत्पदं अनुमिति निष्ठकार्य्यता परम् ।

† अनुमितिनिष्ठकार्य्यतासाक्षात्कारं प्रति अनुमितितत्कारणपरामर्शयोः साक्षात्कारोहेतुः सम्बन्धिद्वयनिरूपितपदार्थसाक्षात्कारं प्रति सम्बन्धिद्वयसाक्षात्कारोहेतुरित्यवश्यं वक्तव्यत्वात् अन्यथा घटभूतलसाक्षात्कारं विना तयोः संयोगसाक्षात्कारापत्तेः । एतत् सर्व्वं हृदिकृत्वाह ततसाक्षात्कारजनकेत्यादि ।

‡ अत्र तादृशसाक्षात्कारजनकसाक्षात्कारविषयत्वं तादृशसाक्षात्कारजनकतावच्छेदकमुख्यविशेष्यताश्रयत्वं अतो न केवल पर्व्वतोवह्निमानित्यनुमितिविषयकसमूहालम्बनहृदो वह्निमानित्यनुमितिविषयकसाक्षात्कारविषयत्वमादाय पर्व्वतपक्षकवह्न्यनुमितिस्थले वह्न्यभाववद्ध्रदादेर्दोषत्वापत्तिः। तथा यत्र स्थलविशेषे साध्यान्तरानुमितिः साध्यतावच्छेदके प्रविष्टा तत्र सर्व्वेषामेव दोषाणां तादृशानुमित्यप्रतिबन्धकतया प्रतिबध्यतायां तादृश यद्रूपव्यापकत्वनिवेशकल्पे तल्लक्षणासम्भवः । व्यापकत्वानिवेशे उदासीनघटादावतिव्याप्तिरित्यादिदूषणावकाश इति बोध्यम् ।

ह्रदश्च तथेत्यादि समूहालम्बनानुमित्यादिविरोधिह्रदनिष्ठवह्न्यभावादि रूपबाधादेः पर्वतादौ धूमादिना वह्न्यादिसाधने दोषताप्रसङ्गः। प्रकृतानुमितिनिष्ठकार्य्यतानिरूपकसम्बन्धिग्रहत्वस्य कस्यापि प्रतिबध्यतानवच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशनासम्भवात् तथाविधग्रहत्वव्यापकप्रतिबध्यतानिवेशे च अनुमित्यविरोधिनि व्यभिचारादौ परामर्शाविरोधिनि बाधादौ चाव्याप्तिः। उभयविरोधिपक्षाप्रसिद्ध्यादावेव तादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्वादतः कल्पान्तरमाह साध्यव्याप्येति। प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नतद्व्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः। एवञ्च तादृशसमूहालम्बनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञानादिप्रतिबध्यत्वान्न व्यभिचाराद्यसंग्रहः। ह्रदादौ वह्न्यादिविषयकसमूहालम्बनादिप्रतिबन्धकतामादाय दर्शितातिप्रसङ्गस्य वारणाय सामान्यपदं। तथा च तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं पर्य्यवसितार्थः। एवञ्च साध्यतावच्छेदकावच्छिन्नादि प्रकारकानुमितिसामान्यान्तर्गतायां पर्व्वतोवह्निमान्वह्निव्याप्यधूमवां श्चेत्याद्यनुमितौ ह्रदोन वह्निमानित्यादिनिश्चयस्याप्रतिबन्धकत्वात्, बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिष्वव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशः। द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबन्धकत्वात्तद्दोष तादवस्थ्यमतः

पक्षतावच्छेदकावच्छिन्नत्वोपादानं। अवच्छेदकत्वञ्च, तत्पर्य्याप्त्यधिकरणत्वं । तेनातेजस्वी पर्व्वतोवह्निमानित्यादौ विशिष्टपर्व्वतत्वादिमति वह्न्याद्यभावरूपबाधस्य, काञ्चनमयः पर्व्वतोवह्निमानित्यादौ च, आश्रयासिद्धेः शुद्धपर्व्वतत्वाद्यवच्छिन्नपक्षकानुमित्यविरोधित्वेपि नासंग्रहः ; एवमग्रेपि बोध्यं। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे, परामर्शाविरोधितया बाधसत्प्रतिपक्षयोरव्याप्तिः। तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्दोषतादवस्थ्यं । वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवांश्च ह्रदइत्याद्यनुमित्यप्रतिवन्धकत्वात् साध्याप्रसिद्धव्याप्तिवारणप्रयोजनकत्वोपवर्णनन्तु तदुपादानस्येति तु न सत् । वह्निर्न काञ्चनमय इत्यादिनिर्णयस्य पक्षे शुद्धवह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वेपि, द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नान्तर्भावसत्वात्तस्य काञ्चनमयवह्निव्याप्यधूमवान् पर्व्वत इत्यनुमितिविरोधितया; तत्र लक्षणगमनात् । द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः। तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयो र्नाव्याप्तिः । वह्निधूमव्यभिचारीत्यादिज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तेर्भानसम्भवात् तद्दोषतादवस्थ्यमतोव्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः। अन्वयव्याप्तिव्यतिरेकव्याप्ती विशिष्योपादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेश्यं । एकमात्रव्याप्यु-

पादाने * साधारण्यानुपसंहारित्वयोरेकतरासंग्रहप्रसङ्गादित्यग्रे-व्यक्तीभविष्यति । तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारतायास्तत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेशनन्तु न सम्भवति । साध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ता ज्ञानोत्पत्त्या साधारण्यादेस्तादृशप्रकारता-शाल्यनुमिति सामान्य-विरोधित्वाभावाद्व्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धव्याप्तिरतः पञ्चांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्न प्रकारकत्वनिवेशः । पञ्चांशे व्याप्तिविशिष्टप्रकारकत्वमात्रनिवेशेपि तद्दोषतादवस्थ्यं । धूमाभाववान् ह्रद इत्यादिज्ञानस्य द्रव्यत्वादिना हेतुमत्ताज्ञानाविरोधित्वात् । साधारण्याद्यव्याप्तिश्च । वह्नित्वाद्यवच्छिन्ने धूमाभाववद्वृत्तित्वादिग्रहस्य धूमादिव्याप्तिविशिष्टतद्व्यक्तित्वावच्छिन्नप्रकारकज्ञानाविरोधित्वादतोहेतुतावच्छेदकावच्छिन्नत्वनिवेशः । पञ्चांशे साध्यादिप्रकारकस्य संस्कारादेराहार्य्यज्ञानादेश्च बाधादिज्ञानाप्रतिबध्यत्वादसम्भव इत्यत स्तादृशानुमितित्वव्याप-

---

* असमसाधारण्याय परस्परनिरूप्यनिरूपकभावापन्नविषयताशालिज्ञानमेवोपादेयं इति तत् प्रतिबन्धकतामादाय केवलान्वयिस्थलेऽप्रसिद्धस्य प्रतियोगितासम्बन्धेन साध्यत्ववदभावस्यापि ज्ञानमादाय लक्षणगमनसम्भवादिति चिन्त्यं ।

कतानिवेशः । साध्यव्याप्यहेतुधर्म्मितावच्छेदकक साध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकतया तादृशाकारलिखनस्वरसात्तादृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्न विशेष्यक-साध्यतावच्छेदकावच्छिन्न-प्रकारकानुमितित्व-व्यापकप्रतिवध्यत्वस्य लक्षणघटकत्वोपगमे, पर्व्वतत्वाद्यवच्छेदेन वह्न्यादेः साध्यत्वे, तत्सामानाधिकरण्येन साध्याभावादेरदोषत्वप्रसङ्गः । सामानाधिकरण्यमात्रावगाहिवाधादिज्ञानस्य शुद्धपर्व्वतत्वावच्छेदेन वह्न्यादिज्ञानं प्रत्येव प्रतिवन्धकतया, धूमविशिष्टपर्व्वतत्वावच्छिन्नधर्म्मिकवह्न्यादिज्ञानाप्रतिवन्धकत्वादिति तदुपेक्षितं। न च विशेष्यतावच्छेदककोटौ धूमादेरधिकस्य भानेपि शुद्धपर्व्वतत्वावच्छिन्नसंयोगादेर्यत्र संसर्गता तत्र पर्व्वतत्वसामानाधिकरण्येन वह्न्यभावादिज्ञानस्य प्रतिवन्धकत्वमावश्यकं तादृशानुमितेरपि शुद्धपर्व्वतत्वावच्छेदेनवह्न्याद्यवगाहित्वादिति वाच्यं। धर्म्मितावच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्म्मितावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मावच्छिन्नत्वमेव संसर्गांशे भासते नतु तदेकदेशावच्छिन्नत्वमपि । तद्धर्म्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकत्वावच्छिन्नसंसर्गताया अप्रामाणिकत्वात् । अथ लिङ्गोपधानमते हेतोः सर्व्वत्रैव धर्म्मितावच्छेदकतया भानात्तादृशसंसर्गताभ्युपगम आवश्यकः । अन्यथा शुद्धपर्व्वतत्वावच्छेदेन हेतुमत्ताज्ञानस्थले हेतुविशिष्टपर्व्वतत्वावच्छिन्नसंयोगादिसंसर्गकानुमितेरेवोपगमे पर्व्वतत्वसामानाधिकरण्यमात्रावगाहिवाधादिग्रहकालेपि तत्र तथाविधसाध्यनिश्चयवतोऽनुमित्यापत्तेः । नहि

सामानाधिकरण्येन वाधसिद्ध्योः सत्योरनुमितिं * कश्चिदुपैति। तादृश वाधादिग्रहस्य क्वचिदप्यनुमितौ प्रतिबन्धकत्वासम्भवात् तेषां हेत्वाभासताविलयापत्तिश्चेति चेदेवमपि लिङ्गानुपधानमते तादृश-विषयतायां मानाभाव एव। अन्योपि लिङ्गानुपधानमताभिप्रायकः।तन्मतेऽनुमितेः सर्वचैव तथाकारकतया, तादृशाकारकत्वस्याव्यावर्त्तकतया, अनुमितिपदस्य तादृशानुमितिपरत्वदर्शना-सङ्गतेः॥

केचित्तु लिङ्गानुपधानमतेऽनुमितिपदस्य तदुभयपरत्वं व्याख्याय यथाश्रुतपरतानिर्वाहाय लिङ्गोपधानमतमाश्रयन्ते साध्य-व्याप्येत्यादिना। इत्याकारकानुमितिपरं, अनुमितेरित्याकारक-तामताभिप्रायकमिति व्याचक्षते †॥

तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शा-दनुमित्युत्पादेन, व्यभिचाराद्यग्रहादिज्ञानेनान्यथा-

---

* अतएव क्षितिः सकर्तृका कार्य्यत्वादित्यनुमानप्रस्तावे कुसुमाञ्जलौ चाचार्य्यैरपि क्षितित्वरूपेण पक्षतायाम् अतो वाधादित्युक्तं। अन्यथा क्षितित्वसमानाधिकरण्येन वाधसत्वेपि हेतुविशिष्टक्षितित्वावच्छेदेन तन्मतेऽनुमितौ वाधकाभावादसङ्गत्यापत्तेरिति भावः।

† तच्चिन्त्यं एतन्मते पक्षतावच्छेदकावच्छिन्नपक्षविषयताया एकत्रैव निवेशेन तद्धर्म्मावच्छिन्न तत्पक्षकत्वस्य ह्रदस्य वह्निशून्यत्वमित्यस्य एवं व्यावृत्तिनिर्व्वाहे ह्रदस्य वह्निधूमशून्यत्वमित्यत्र धूमपर्यन्त गवेषणानर्थक्यापत्तेः समूहालम्बनानुमितिपरत्वे तादृशविषयताया द्वेधानिवेशेन व्यावृत्तिद्वयसङ्गतेः।

सिद्धत्वाच्च । व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति ।

व्याख्याप्रयोजनं स्फुटयति तेनेति । एकत्र, वह्नित्वाद्येकधर्म्मावच्छिन्ने । व्यभिचारादीत्यादिना स्वरूपासिद्धिपरिग्रहः । अन्यस्य परामर्शात्तद्वह्नित्वादिरूपापरधर्म्मावच्छिन्ने व्याप्तिपक्षधर्म्मतावगाहित्वानात् । व्यभिचारादिति । व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेपीत्यनेन सम्बन्धः । यत्र यद्रूपावच्छिन्ने व्यभिचारज्ञानोत्पत्तिद्वितीयक्षणे कथञ्चित्तद्रूपावच्छिन्नलिङ्गकपरामर्शस्तत्र क्षणैकव्याजेन अनुमित्युपगमान्न तत्र व्यभिचारोदर्शितः । ननु तद्धर्म्मावच्छिन्नलिङ्गकानुमितौ तद्धर्म्मावच्छिन्नधर्म्मिकव्यभिचारज्ञानाभावस्य हेतुत्वोपगमान्नव्यभिचारः । तद्धर्म्मावच्छिन्नलिङ्गकत्वञ्चाव्यवहितोत्तरत्वसम्बन्धेन तद्रूपावच्छिन्नधर्म्मिकव्याप्त्यादिज्ञानविशिष्टत्वं । तादृशसम्बन्धेन व्यभिचारज्ञानविशिष्टं यत्तदन्यत्वमेव वा जन्यतावच्छेदकं वाच्यं । तेन धूमव्याप्य वह्निमानयमित्याकारकशाब्दादिपरामर्शोत्पत्ति * द्वितीयक्षणे यत्र लौकिकसन्निकर्षजन्योवह्निर्धूमव्यभिचारी धूमव्याप्येन्धनवानित्याकारकसमूहालम्बनग्रहस्तज्जन्यानुमितेस्तत्सम्बन्धेन वह्नित्वावच्छिन्नधर्म्मिकव्याप्त्यादिज्ञानविशिष्टत्वेपि

* अत्र च तृतीयक्षणे साधारणमेवाव्यवहितोत्तरत्वं निवेश्यमन्यथा विनश्यदवस्थ परामर्शोत्तरानुमितिक्षणीयस्य व्याप्तिज्ञानविशिष्टत्वाभावादिति ।

न* चतिरत आह व्याप्त्यादीति। क्लृप्तकारणताकव्याप्त्यादिज्ञान-सत्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वा-दिति भावः। व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावादिना अन्यथा-सिद्धत्वशङ्कातु † प्रागेव निराकृता। न चतिर्न व्यभिचारादाव-व्याप्तिः। यत्रासद्धेतुविशेषे तादृशानुमितेरप्रसिद्धिस्तत्रत्यदोषे-ष्वव्याप्तेर्वक्ष्यमाणतया ईदृशयथाश्रुतव्याख्यायामनिर्भरसूचनाय-वदन्तीति॥

पर्व्वतोनिर्वह्नि र्धूमो वह्नेरभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथा-र्थेति॥

पर्व्वतोवह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषये ऽतिव्याप्तिवारकतया यथार्थपदं सार्थकयति। पर्व्वतोनिर्व्वह्नि-रिति। अत्र इति पदस्य त्रितयस्थले सम्बन्धाद्भ्रमत्रितयलाभः। प्रत्येकभ्रममादायैवातिप्रसङ्गसम्भवात् तादृशसमूहालम्बनभ्रमपर्य्य-न्तानुधावनवैफल्यात् तत्परत्वासङ्गतेरितिध्येयम्।

प्रथम भ्रमोऽनुमितौ विरोधी। अन्यौ च तज्जनकज्ञाने तथा,

---

* नव्यभिचार इति भावः।

† यत्र व्यभिचार ज्ञानं नास्ति व्याप्तिज्ञानञ्च नास्ति तत्रानुमित्यनुत्पादात् यत्र व्याप्तिज्ञानमस्ति व्यभिचारज्ञानाभावोनास्ति तत्रानुमित्युत्पादादित्याशयः।

तयोरपि प्रथमेऽन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वं अन्त्येच प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्ध्या न तद् भ्रमत्वं । किन्त्वभावांशेऽनुयोगिताविशेषसम्बन्धेन साध्यस्य भ्रमत्वमित्येतादृशविशेषमादृत्य शिष्यव्युत्पादनायानेकविधभ्रमकथनं ॥

इदन्त्ववधेयं अभिधेयत्वं प्रमेयत्वस्यव्यभिचारीत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वभ्रमोवाच्यः । प्रतियोगितांशे साध्यतावच्छेदकावच्छिन्नत्व-साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोः साध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात् । एवञ्च भेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नतादृशप्रतियोगिताकत्वाप्रसिद्ध्या तादृशसम्बन्धेन भ्रमानुपपत्तिः । प्रतियोगितांशे सम्बन्धविशेषाद्यवच्छिन्नत्वस्य भ्रमइत्यपि न युक्तं । तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटित तद्भ्रमत्वानुपपत्तेः । नच तेन रूपेण प्रतियोगिताप्रकारकएवात्र भ्रमोविवक्षितः । नतु तदवच्छिन्नप्रतियोगिताकत्वसंसर्गक इति वाच्यं । लाघवात् * प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्याकिञ्चित्करत्वात् । अत्राहुः स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन—

---

* अत्रावधेयं तादृश सम्बन्धेन विशिष्टाभावादेःकिन्तु शुद्धवह्न्यभावादेरन्यथा पर्व्वतादौ महानसीयवह्निर्नास्तीति प्रतीतिवत् वह्निर्नास्तीति प्रत्ययः स्यादितिभावः ।

साध्यतावच्छेदकवत्त्वमेवाभावस्य* साध्याभाववदवृत्तित्वरूपव्याप्तिघटकं लाघवात्। एवञ्च तादृशसम्बन्धेनाभावांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहविरोधितया घटत्वादेः प्रसिद्धेन तादृशसम्बन्धेन मेयत्वत्वादेरभावांशे भ्रमात्मक एव तथाविधो ग्रह इति न किञ्चिदनुपपन्नम् †॥

प्रथमे साध्याभाववदवृत्तित्वज्ञानविरोधी हेतौ साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य भ्रमः, द्वितीये तदप्रसिद्ध्या व्यापकसामानाधिकरण्यग्रहविरोधी साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य भ्रमोऽभिमतः। असमानप्रकारकज्ञानस्याविरोधितया द्विविधव्यभिचारसंग्रहाय द्विविधव्याप्तिविषयकसमूहालम्बनज्ञानस्यैव लक्षणे निवेश्यत्वात्। न च हेतुः साध्यस्यव्यभिचारीत्यतः साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य दुर्लभतया, तदवगाहिज्ञानस्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्याकारकता नोपपद्यत इति वाच्यं। यतोऽभाववद्वृत्तित्वं समानाधिकरणाभावप्रतियोगितावच्छेदकत्वं द्वयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः

---

* अत्र तादृशसम्बन्धेन साध्यतावच्छेदकविशिष्टाभाववदवृत्तित्वस्यैव व्याप्तित्वे महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिः अवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशिष्टस्य महानसीयवह्न्यभावादेरधिकरणीभूतपर्वतादौ धूमादेर्वृत्तित्वादिति ध्येयम्।

† एतन्मतेऽन्वयितावच्छेदकरूपेणान्वय्युपस्थितं विना मेयत्वत्ववृत्तिधर्मग्रहं विना एतदनुपपन्नमिति तु विभावनीयम्।

तत्र प्रथमं व्यभिचारतात्पर्य्यग्रहस्थले व्यभिचारपदार्थैकदेशे ऽभावेऽनुयोगितारूपषष्ठ्यर्थस्य तत्र प्रकृत्यर्थतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितत्वसम्बन्धेन प्रकृत्यर्थस्यान्वयः । मत्वर्थीयार्थस्य स्वरूपसम्बन्धवान्, तस्य चाभेदेन प्रथमान्तार्थेऽन्वयः । द्वितीयतत्पदार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वितं प्रथमार्थनिरूपितत्वस्यान्वयः । षष्ठीप्रकृतेर्धर्म्मपरतया षष्ठ्यन्तार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयबललभ्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वे तस्य च तद्धितार्थसम्बन्धिन एकदेशे घटकत्वसम्बन्धे सम्बन्धिनस्त्वाभेदेन प्रथमान्तार्थेऽन्वयः । एवञ्चोक्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापि लाभात्तत्र तदवगाहिभ्रमस्य दर्शिताकारकतासम्भवादित्यपि वदन्ति ॥

भ्रमादिति पञ्चम्यर्थः प्रयुक्तत्वं तस्य प्रतिबन्धपदार्थेऽनुत्पादेऽन्वयः । यथार्थेत्येति । यथार्थपददानेन स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्वस्य सर्व्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमाणां किञ्चिदंशे प्रमात्वेपि न तमादाय दोष इति भावः ॥

ननु प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासत्वापत्तिः । अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकं तद्घटकञ्च न विशिष्टमिति

चेत्तर्हि यथार्थेति व्यर्थं । भ्रमविषयविशिष्टस्या-प्रसिद्धत्वादित्यनुशयेनाह यदिति ।

अत्र यथार्थपदेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषय-साध्याभावादावतिप्रसङ्गवारणेऽपि, असद्धेतुस्थले तादृशप्रमाविषय-दोषघटकसाध्यादेः प्रत्येकं दोषत्वापत्तिर्दुर्व्वारैव । तदर्थं प्रका-रान्तरानुसरणेच, तत एव पूर्व्वदोषस्यापि वारणसम्भवे यथार्थ-पदं व्यर्थमिति दोषस्य दुरुद्धरतया तस्यैव यथार्थपदाघटित लक्षणान्तरानुसरणबीजत्वमाह नन्विति । एकदेशस्यापि वि-शिष्टघटकतया हेत्वाभासपदार्थत्वस्येष्टत्वादाह प्रत्येकमिति । प्रत्येकपर्य्याप्तसाध्यतावच्छेदकाद्यवच्छिन्नस्येत्यर्थः । हेत्वाभासता-पत्तिः, हेत्वाभासपदार्थत्वापत्तिः । यद्रूपावच्छिन्नज्ञानस्यानु-मित्यविरोधित्वं तद्रूपावच्छिन्ने हेत्वाभासत्वव्यवहारस्य तद्रूपा-वच्छिन्नमात्रज्ञानाद्धेतौदुष्टत्वव्यवहारस्य चानुदयेन इष्टापत्तिर्न सम्भवतीति भावः । यादृशविशिष्टविषयकत्वं तादृशानुमिति-विरोधितानतिरिक्तवृत्ति तत्त्वमिति विवक्षया न साध्यादावति-व्याप्तिरित्याशयेनाशङ्कते अथेति । विशिष्टविषयकं साध्याभाव-वद्वृत्तित्वविशिष्टसाधनादिविषयकमेव, तद्घटकञ्च तादृश-विशिष्टघटकप्रत्येकपदार्थविषयकत्वञ्च न विशिष्टं, न तादृश विशिष्टनिरूपितं । तथा च प्रत्येकपदार्थविषयकत्वस्य प्रतिबन्ध-कतायाअतिरिक्तवृत्तित्वान्नातिव्याप्तिरिति भावः । व्यर्थमिति यथार्थपदादानेपि सद्धेतुस्थलेऽतिव्याप्तिवारणसम्भवात् । ननु तत्र

भ्रमविषयप्रत्येकपदार्थस्योक्तरीत्या वारणेपि तद्विषयविशिष्टेऽति व्याप्तिरत आह भ्रमविषयेति। अप्रसिद्धत्वादिति। तथा च ज्ञातिव्याप्तिरिति भावः॥

केचित्तु दुष्टानामेव हेतूनां एतानि लक्षणानि, तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य। तदर्थश्च, तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वमग्रेच तत्त्वमित्यस्य तद्वत्त्वमित्यर्थः। आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः॥

केचित्त्विति। नन्वाद्यस्य दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिस्तेषामप्यनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदादि पक्षक-वह्न्यादि-साध्यकस्थले वह्न्यभाववद्ध्रदादिरूपदोषाणामपि दुष्टहेतुतया लक्ष्यत्वमेवेति वाच्यं। तद्रूपावच्छिन्नपक्षक-तद्रूपावच्छिन्न साध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं। यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थ ज्ञानविषयत्वमात्रं। तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकप्रमाविषयवह्न्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरित्याशङ्कां परिजिहीर्षुस्तादृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्या-

स्यति। तज्ज्ञायमानदोषप्रतिबन्धकतामत एव संगच्छतेऽतस्तद-वलम्बैवाह तत्रेति। तेषु लक्षणेषु मध्ये इत्यर्थः। तृतीय लक्षणस्य सर्व्वमत एव ज्ञायमानदोषप्रतिबन्धकताभिप्रायकतया दृष्टान्तत्वेनोपन्यासः। तदर्थञ्चेति। प्रतियोग्यन्तेन व्यभिचारादि-दोषानादाय लक्षणं सङ्गमनीयमिति दर्शयितुं व्यभिचारादय-इति। न तु तेन रूपेण लक्षणघटकत्वमित्यवधेयं। एवञ्च यथार्थं पदादानेदुष्टत्वभ्रममादाय प्रकृतहेतुभिन्नेऽतिप्रसङ्ग * इति यथार्थपदसार्थक्यम्। यद्यपि पर्व्वतत्वाद्यवच्छिन्ने वह्नित्वाद्यव-च्छिन्नसाधने धूमत्वावच्छिन्नोदुष्ट इत्यादेः सत्त्वेतौ दुष्टत्वव्यवहारस्य नापत्तिः, तत्र तत्पक्षसाध्यहेतुकानुमितिप्रतिबन्धकरूपदोष-प्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात् तादृशानुमितिप्रति-बन्धकबाधव्यभिचारादेश्चाप्रसिद्धत्वात्। ह्रदादौ वह्न्यादिसाधन-मादाय च सर्वत्रैव दुष्टत्वव्यवहारदृष्ट स्तथापि धूमसाधने वह्नित्वे-नायं दुष्ट इत्यादौ वह्नित्वाद्यवच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबन्धक

---

* ननु संशये वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयभानात् असम्भववारणाय यथार्थ-पदं सार्थकं। तथाच वैयर्थ्यशङ्का न सङ्गच्छते। नच संशयान्यत्वमेव निवेश्यं संशय-व्यावर्त्तनाय यथा सन्निवेशे वैयर्थ्यविरहात्। अत्र केचित् संयोगाभाववद्वृक्षकपबाधा-दावव्याप्तिः। तादृश विशिष्टविषयतायाः संयोगवान्नवेति प्रमासंशये सत्वात् अतस्तद्व्या-वर्त्तनाय संशयान्यत्वनिवेशस्यावश्यकतया यथार्थपदवैयर्थ्यशङ्का इत्याहुः। इदमत्र चिन्त्य-मेतन्मते निरवच्छिन्नविशेषणतया संयोगाभाववत्पक्षस्य बाधतया तादृशविशिष्ट-विषयतायाः प्रमात्मकसंशयेऽसत्त्वात् संशयान्यत्वनिवेशस्यानावश्यकता हृदे तादृश-विशेषणतया संयोगाभावस्य वृत्तौ भ्रमत्वात्।

दोषप्रकारकज्ञानविषयत्वस्य प्रत्ययात् वक्ष्यमाणसम्बन्धावच्छिन्न-ताद्दशानुमितिप्रतिबन्धकधूमाभाववद्वृत्तित्वविशिष्ट वज्रादिरूप-प्रसिद्धदोषप्रकारताशालिभ्रममादाय रासभादितात्पर्य्येणापि तथा व्यवहारः स्यात्। न च तत्र विशेष्ये तृतीयान्तार्थवह्नित्ववैशिष्ट्य-भानाद्रासभे तद्बाधेन नायमतिप्रसङ्ग इति वाच्यं। तथा सति दोष-पदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वालाभात् तल्लाभानु-रोधेन हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटक-हेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य तत्प्रकारकतायाम्वा स्वाव-च्छिन्नत्वार्थकतृतीयान्तलभ्यवह्नित्वाद्यवच्छिन्नत्वस्यान्वय इत्येवोप-गन्तव्यत्वात्। न च विशेष्ये वह्नित्वादिधर्म्मवैशिष्ट्यबोधकपद समभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वावच्छिन्नहेतुकानु-मितिप्रतिबन्धकोऽर्थः। अथवा अनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वाद्यवच्छिन्नहेतुकानुमितिरूपविशेषलाक्षणिकत्वं। धात्वर्थे ऽनुमित्यन्तर्भावे साधनपदार्थानन्वयप्रसङ्गात् तथा च विशेष्य एव तृतीयार्थवैशिष्ट्यान्वयोपगमान्नोक्तातिप्रसङ्ग इति वाच्यं। एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादायाति प्रसङ्गादिति यथार्थपदसार्थक्यं।* अथवा इतरभेदानुमापकमेवेदं

* यथार्थपददानेऽपि वह्निमान् द्रव्यादित्यादौ वज्राभाववद्वृत्तिद्रव्यादिरूपसव्य-भिचारस्य ताद्दशद्रव्यत्वादिमत्वसम्बन्धेन धूमादि सद्धेतावपि सत्वेन द्रव्यत्वाव-च्छिन्नेन वह्निसाधने द्रव्यत्वावच्छिन्नं दुष्टं इत्यस्येव द्रव्यत्वावच्छिन्नेन वह्निसाधने धूम-त्वावच्छिन्नो दुष्ट इत्यस्यापि व्यवहारस्य प्रसङ्गात्। तद्रूपावच्छिन्नलिङ्गकानुमितिप्रति-बन्धकप्रकारकज्ञानविषयत्वं तद्रूपावच्छिन्नस्य दुष्टताव्यवहारनियामकमिति वक्तव्यं। अतोनोक्तदोष इति कथं यथार्थपदमित्यस्वरसादाह अथवेति।

लक्षणं। तथा च पर्व्वतपक्षकधूमसाध्यकवह्निहेतुकदुष्ट-लक्षणस्य तथाविधानुमिति-विरोधिज्ञानविषय-व्यभिचारादि--भ्रममादाय सद्धेतावितरभेदव्यभिचारित्वात् यथार्थपदसार्थक्यं। ज्ञानस्यात्र स्वज्ञानविषय-प्रकृतहेतुतावच्छेदकवत्त्व--सम्बन्धावगाहि-ग्राह्यं। तेन प्रकृतहेतुभिन्नस्यापि सम्बन्धान्तरेण दोषप्रमाविषयत्वेपि नातिप्रसङ्गः। अग्रेपीदृशसम्बन्धेनैव तद्वत्त्वं वाच्यं। अथ ज्ञायमान पक्षनिष्टसाध्याभावत्वादिना वाधादिदोषाणां प्रतिवन्धकता न सम्भवति। साध्याभावत्वादिना पदार्थान्तरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतयाऽविरोधित्वेनानुमित्यापत्तेः। किन्तु ज्ञानीयपक्षतावच्छेदकाद्यवच्छिन्नविषयतानिरूपितसाध्याभावत्वाद्यवच्छिन्न विषयतावत्त्वेन तादृशविषयतया ज्ञानविशिष्टत्वेन वा। तच्च रूपं तादृशभ्रमविषयपदार्थान्तरसाधारणमेवेति। तेषामेव तादृशभ्रमदशायां विरोधित्वान्नोक्तापत्तिः। एवञ्च सद्धेतूनामनुमिति प्रतिवन्धकतावच्छेदकनिरुक्तविषयताश्रयनिरुक्तवह्न्यभावादि प्रमाविशेष्यत्वादतिव्याप्तिरितिचेन्न। यद्रूपावच्छिन्नविषयतासामान्यं प्रतिवन्धकतावच्छेदकं, तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयं। ह्रदोवह्निमान् धूमादित्यादौ च तादृशरूपं ह्रदविशिष्टवह्न्यभावत्वादिकं, ह्रदे वह्निर्नास्तीत्यादिज्ञाननिरुपित तद्रूपावच्छिन्नविषयतासामान्यस्यैव ह्रदत्वाद्यवच्छिन्नविषयतानिरूपितवह्न्यभावत्वाद्यवच्छिन्नविषयतात्वेन दोषनिष्ठानुमितिप्रतिवन्धकतायामवच्छेदकत्वात्। सद्धेतुस्थले च न केवलवह्न्यभावत्वादिकं तथा। तदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्मिर-

विषयकज्ञाननिरूपिततादृशविषयतानामनुमितिप्रतिबन्धकतानवच्छेदकत्वात् । पर्व्वतविशिष्टवह्न्यभावत्वादिविशिष्टञ्च न किञ्चिद्वस्तु प्रसिद्धमिति नातिप्रसङ्गः । तृतीयमपि लक्षणमनयैव रीत्या परिष्कार्य्यमिति । यद्यपि अस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबन्धकतामतानाश्रयणेऽपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्वमित्यर्थकतामुपगम्य, यथार्थपदसार्थक्यमुपपादयितुं शक्यते । तथापि दुष्टस्य दोषघटितत्वानुरोधेन तन्मतमवलम्ब्य षष्ठीसमास आदृत इति ।

ननु द्वितीयतृतीयलक्षणयोर्दोषेऽतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ यत्पदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रवृत्तित्वादत आह तत्त्वमित्यस्येति । प्रथममात्रस्य दुष्टहेतुलक्षणत्वे नैवोपपत्तौ चरमयोर्दोषलक्षणत्वमेवोचितं । तत्त्वमित्यस्य यथाश्रुतार्थकत्वानुरोधादतस्तथैवाहाद्यस्यैवेति । ईदृशव्याख्यायानिर्दोषत्वात् प्राहुरित्युक्तं ॥

लिङ्गमविवक्षितं यद्विषयत्वेन यादृशविशिष्टविषयत्वेन तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धेत्वादिनिष्ठे नातिप्रसङ्गः ।

लिङ्गज्ञानस्येति । लिङ्गांशनिवेशस्य* निष्प्रयोजनकतया तस्या-

---

* वस्तुतस्तु सर्वैरेव साध्यतावच्छेदकादिरूपेण हेतुसाध्यादिविषयकज्ञानमादाय लक्षणगमनान्नाव्याप्तिरिति निष्प्रयोजनकत्वमुक्तमिति ।

विवक्षितत्वमाह लिङ्गमिति। यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽव-च्छेदकत्वं तच्च यद्यनतिरिक्तवृत्तित्वरूपमिदानीं निविश्यते तदाऽस-म्भवः। विशिष्टस्यानतिरिक्ततया वह्न्यभावविशिष्टह्रदादिरूपदोष विषयकत्वस्य शुद्धह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमिति-प्रतिबन्धकतातिरिक्तवृत्तित्वादतः स्वरूपसम्बन्धरूपमेव तद्वाच्यं। तथा च पर्व्वतोवह्निमानित्याद्यनुमितिप्रतिबन्धकभ्रमविषयवह्न्य-भावादावतिव्याप्तिस्तद्विषयकत्वस्यापि प्रतिबन्धकतावच्छेदकघट-कत्वात्। असम्भवभयेन चावच्छेदकतापर्य्याप्तिनिवेशासम्भ-वात्। अतोयद्विषयकत्वेनेतिपदं व्याचष्टे याद्दशविशिष्टविषय-त्वेनेति। यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थः। एवञ्च तत्त्वमि-त्यस्य तद्रूपावच्छिन्नत्वमर्थः। व्याख्याप्रयोजनं स्फुटयति तेनेति। यत्प्रकारकत्वेन प्रतिबन्धकत्वमित्युक्तौ पक्षविशेषणकभ्रम-मादाय वह्न्यभावादौ नातिप्रसङ्गसम्भवः। पर्व्वतादावतिप्रसङ्ग-सम्भवेपि यत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारताकत्वेनानुमितिविरो-धित्वं, तेन सम्बन्धेन तद्वत्त्वस्य दुष्टताव्यवहारनियामक-त्वोपगमे, पर्व्वतादिविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्व्वतनिष्ठप्रकारताकत्वेन प्रति-बन्धकत्वात् तेन सम्बन्धेन पर्व्वतादिमत्तायाः पर्व्वतमज्ज्ञान-सान्यतरत्वादिरूपसद्धेतौ सत्त्वेपि, प्रसिद्धधूमादिरूपहेता-वसत्त्वात्तत्र दुष्टताव्यवहारापत्तेरयोग इति, तदनुरोधेन पक्षविशेष्यकेत्युक्तं। भ्रमपदं निश्चयसामान्यपरं तेन सद्धे-त्वादौत्यादपदग्राह्यसाध्यशून्यपक्षकदुष्टहेतौ प्रतिबन्धकप्रमा-

विषयसाध्याभावादेरेव सत्वेपि नातिप्रसङ्ग इति । उक्तख्याख्यानेऽनतिरिक्तवृत्तित्वमेवावच्छेदकत्वं विषयतयोर्थः । विशेषणीभूतवह्न्यभावाद्यविषयके शुद्धह्रदत्वादिना ह्रदादिविषयकज्ञाने वह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्वेनोक्तासम्भवानवकाशात् । तथाच केवल वह्न्यभावत्वाद्यवच्छिन्नविषयताकत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वान्नातिप्रसङ्ग इत्यर्थः ॥

अवच्छेदकत्वञ्च, इष्टानतिरिक्तवृत्तित्वं । तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः । विशेषणांशस्य तादृशविशिष्टान्तराघटितत्वेन । तेन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः ।

ननु स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽयमेवातिप्रसङ्गो दुर्वारः । अप्रामाण्यज्ञानाभावविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयत्वं प्रतिबन्धकतावच्छेदकतापर्य्याप्त्यधिकरणमीदृशविवक्षया तादृशातिप्रसङ्गवारणे पुनरसम्भवः । वह्न्यभावत्वादिना घटाद्यवगाहिनो वह्न्यभाववान् ह्रद इत्यादिज्ञानस्यापि प्रतिबन्धकतया तत्साधारण्यानुरोधेन वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताक निश्चयत्वेनैव प्रतिबन्धकताया वाच्यतया वह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयतायास्तादृशप्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविषयतात्वेनावच्छेदकत्वेपि अप्रामाण्यज्ञानाभावादिविशिष्टवह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नवि-

षयताकनिश्चयत्वस्यावच्छेदकतापर्य्याप्त्यनधिकरणत्वादतः तृतीयायां अनतिरिक्तवृत्तित्वरूपावच्छेदत्वार्थकत्वं स्फुटयति अवच्छेदकत्वञ्चेति। इह लक्षणे घटकत्वं सप्तम्यर्थः। न च विशिष्ट विषयकत्वस्याप्रतिबन्धकसंशयादौ सत्वात् पुनरसम्भव इतिवाच्यं। ज्ञानस्येत्यत्र ज्ञानपदमनाहार्य्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरं, षष्ठ्यर्थश्चाधेयत्वं तस्य यद्विषयकत्वेऽन्वयः। एवञ्च तादृशनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षणीयतया असम्भवाभावात्। अनतिरिक्तवृत्तित्वं, स्वव्यापकतत्कत्वं। ननु तच्छून्यावृत्तित्वं तादृशनिश्चयवृत्तित्व विशिष्टस्य विशिष्टविषयकत्वस्य विशेष्यीभूतविशिष्टविषयकज्ञानतिरिक्ततया तस्यातिप्रसक्तत्वे विशिष्टे तस्मिन्ननतिप्रसक्तत्वस्य दुर्घटत्वात्॥

यत्तु प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वमेवानतिरिक्तवृत्तित्वं। अतीनोक्तरीत्या असम्भव इति तदसत्। तथासति मूलोक्तस्य ज्ञानस्येत्यस्य वैयर्थ्याद्ध्रदत्वाद्यवच्छिन्ना या वह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयकयत्किञ्चिज्ज्ञानीयविषयता तन्निरूपकत्वस्य प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वेन शुद्धह्रदत्वाद्यवच्छिन्नेऽतिप्रसङ्गाच्च। भवति चानुमितिप्रतिबन्धकताया स्तादृशनिश्चयवृत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयतात्वावच्छिन्नव्यापकताविरहेणातिप्रसङ्गानवकाशात्॥

अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान् वह्न्यभाववानित्यादिज्ञानस्यापि वह्न्यभाववद्ध्रदत्वाद्यवच्छिन्न

विषयकतया तस्य च ह्रदो वह्निमानित्याद्यनुमित्यविरोधित्वादस-
म्भवः। जलवान् वह्निमानित्यादिस्थलीयदोषासंग्रहेण अवि-
शेषितधर्म्मावच्छिन्नपक्षकादिस्थलीयस्य किञ्चिद्विशिष्टतद्घटित
स्यासंग्रहेण च पक्षतावच्छेदकांशेऽन्याप्रकारकत्वादिनिवेशस्या-
शक्यत्वात्, तादृशविशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषण-
त्वोपगमे सर्व्वमाकाशवदित्यादिस्थलीयबाधादौ तदघटकाप्रसिद्ध्या-
ऽव्याप्तिः। यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघट-
कता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नकिञ्चिदवच्छिन्नविष
यताशून्यत्वं ज्ञाने निवेश्यं। जातित्वाद्यवच्छिन्नस्य ह्रदत्वादेर्न
वह्न्यभाववद्ध्रदत्वावच्छिन्नघटकतेति जातित्वाद्यवच्छिन्नह्रदत्वादि
विषयता तादृशविषयताभिन्नैव तच्छून्यत्वञ्च नोक्तज्ञानस्येति न
दोष इत्यपि न सत्। तथासति ह्रदो जात्यभाववानित्यादिस्थलीय-
बाधादेरेव दुःसंग्रहत्वात्, जातित्वादिना ह्रदत्वादिरूपधर्म्मिता-
वच्छेदकावगाहिनो जातिमान्जातिमानित्यादिज्ञानस्य जाति-
त्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्म्मितावच्छेदकतारूपविषयताया नि-
रुक्तविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमित्यप्रतिबन्ध-
कस्य शून्यत्वात्तेनावारणात्। मैवं यद्रूपावच्छिन्नविषयतात्वं
तादृशविशिष्टविषयतासमानाधिकरणाभावप्रतियोगितावच्छेदकं
तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञाने विशेषणतया साम-
ञ्जस्यात्। अप्रतिबन्धकज्ञानविषयतावच्छेदकजातित्वादिविशे-
षितह्रदत्वादिघटिततद्रूपावच्छिन्नविषयितात्वावच्छिन्नाभावस्य

दोषात्मकविशिष्टविषयतासमानाधिकरणत्वात् तज्ज्ञानव्यावृत्ति-रिति। विशिष्टस्य विशिष्टविषयकत्वस्य असत्वेऽपि वह्न्यभाववत्वादिना घटाद्यवगाहिभ्रमेऽसत्वेऽपि तथाच विशिष्ट विषयकत्वेन प्रति-बन्धकता न सम्भवतीति भावः। भ्रमाप्रतिबन्धेऽपि तादृश-भ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेऽपि न क्षतिः नोक्तयुक्त्यापर्य्याप्ति-निवेशेऽपि असम्भवस्तदनिवेशे पूर्वोक्तातिप्रसङ्गो वा।

ननु विशिष्टदोषघटकीभूततदेकदेशविषयतायां स्वरूप-सम्बन्धरूपावच्छेदकत्वसत्वेऽपि, यादृशविशिष्टविषयतासामा-न्यस्य तादृशावच्छेदकत्वविवक्षया अतिप्रसङ्गवारणसम्भवात् तदेव कथं न विवक्षितमिति। न च सामान्यपदस्य व्यापकतार्थ-कतया प्रतिबन्धकतावच्छेदकतायां विशिष्टविषयतात्वव्याप-कत्वं प्रवेश्यं, तदपेक्षया प्रतिबन्धकतायां विशिष्टविषयता व्यापकत्वनिवेशनमेवोचितमिति वाच्यं। यतो वह्न्यभावविशिष्ट-ह्रदादिनिरूपितविषयताया अनुमित्यप्रतिबन्धकसंशयाहार्य्याप्रा-माण्यज्ञानानास्कन्दितज्ञानसाधारणतया नानुमितिप्रतिबन्धकतायां तद्व्यापकत्वमित्यनाहार्य्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्व-विशिष्टायाविशिष्टविषयताया व्यापकत्वं प्रतिबन्धकतायां भवता विवक्षणीयं। तदपेक्षया लाघवेन च स्वरूपसम्बन्धरूपावच्छेदक-तायां बाधादिरूपदोषविषयतात्वव्यापकत्वं वक्तुमुचितं। तथा सति निश्चयत्वाद्यनिवेशात्, समानाकारकज्ञानस्य विषयिताया भेद-स्याप्रामाणिकतया संशयादिज्ञानीयविषयिताया अपि निश्चयत्वा-दिविशिष्टीयतयैव प्रतिबन्धकतावच्छेदकतया बाधादिरूपदोष-

निरूपितविषयतात्वव्यापकताया अक्षतत्वात्। नच वह्न्यभाववान् ह्रदो वह्निमानित्याहार्य्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयिता नानाहार्य्यज्ञानसाधारणी, तादृशाहार्य्यज्ञान समानाकारकानाहार्य्यज्ञानाप्रसिद्धेः ह्रदोवह्न्यभाववानित्यनाहार्य्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयतायाश्च वह्न्यादिप्रकारतानिरूपिततादृशाहार्य्यज्ञानीयविशिष्टह्रदादिविषयतायाभिन्नत्वात् तथाचानाहार्य्यत्वविशिष्टविषयतायां एव प्रतिबन्धकतावच्छेदकतया न प्रतिबन्धकतावच्छेदकतायांदर्शिताहार्य्यज्ञानीयविषयितासाधारणविशिष्टविषयितात्वव्यापकत्वमिति वाच्यं तथासति अनाहार्य्यज्ञानीयविशिष्टविषयितात्वव्यापकताया एव विवक्षणीयत्वात् तावतापि संशयान्यत्वाप्रामाण्यज्ञानानास्कन्दितत्वाप्रवेशेन लाघवानपायात्। नैवं स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वादिविशिष्टस्य पक्षादेर्ज्ञानस्य वह्न्यनुमितिप्रतिबन्धकतया तदवच्छेदकविषयिताकपाषाणमयत्वविशिष्टपक्षादावतिव्याप्तिः। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्व निवेशपक्षे तादृशविशिष्टविषयतायाः पाषाणमयत्वावच्छेदेन वह्न्यभाववत्तानिश्चयाविशिष्टज्ञानसाधारणतया अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेनातिप्रसङ्गानवकाशात्। नचानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशपक्षेपि जलाद्यवच्छेदेन वह्न्यभाववत्ताघटितस्य वह्न्यभाववज्जलादिमद्वृत्तिजलादिविशिष्टस्य ह्रदादिरूपपक्षस्य जलवान्वह्न्यभाववानित्यादिज्ञानसहितस्य जलवांश्च ह्रद इत्यादिज्ञानस्य तादृशज्ञानविशिष्टतादृशज्ञानत्वेनैव

प्रतिबन्धकतया तादृशप्रतिबन्धकताशून्यज्ञानाविषयस्य सत्-
प्रतिपक्षाद्यनात्मकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य
प्रतिबन्धकतायामवश्यं निवेशनीयतया असतीपि तत्राति
प्रसङ्ग इति वाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्ध-
कताविशेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धे-
तुमत्पक्षरूप सत्प्रतिपक्षाव्याप्तेः। साध्याभावांशे तद्व्या-
पकताग्रहविशिष्टतद्वत्ताज्ञानत्वेन स्वतन्त्रसाध्याभावधर्मिक
तद्व्यापकताग्रहविशिष्टतद्वत्ताज्ञानसाधारण्यानुरोधेनावश्यकल्प्य-
प्रतिबन्धकतयैवोपपत्तेः तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्या-
नवच्छिन्नप्रतिबन्धकतान्तरे मानाभावादुक्तविशिष्टेतिप्रसङ्गस्तु
विवक्षणीयविशिष्टान्तराघटितत्वनिवेशनेनैव वारणीयः। नच
ज्ञानद्वयसाधारणप्रतिबन्धकतायाः प्रत्येकज्ञानविषयविशिष्ट-
विषयकत्वं नानतिरिक्तवृत्तित्वरूपावच्छेदकत्वं तथाच दर्शि-
तविशिष्टघटकस्य प्रत्येक ज्ञानविषयस्य न निरुक्तविशिष्टात्मकते-
ति निरुक्तविशिष्टान्तराघटितत्वमुक्तविशिष्टस्याक्षतमेवेति वाच्यं।
वक्ष्यमाणविशिष्टान्तराघटितत्वस्यैव यादृशविशिष्टविषयकनिश्च-
यविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं. प्रतिबन्धकतानतिरिक्त-
वृत्ति, तादृशविशिष्टद्वयाघटितत्वस्यापि निवेशनीयतया उक्तवि-
शिष्ट वारणसम्भवात्। नचैवं तादृशविशिष्टद्वयघटितोक्तसत्प्रति-
पक्षेऽव्याप्तिः स्तस्य प्रतिहेतुव्यापकताविशिष्टसाध्यभाव प्रतिहेतु-
विशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादिति वाच्यं। सत्प्रति-
पक्षघटकतादृशविशिष्टद्वयविषयताभिन्ननिरुक्तविशिष्टद्वयविषयता-

स्यावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदक
रूपं तद्रूपावच्छिन्नाविषयकप्रतीतिविष
यतावच्छेदकत्वं यद्रूपे निवेशनीयम्

शुन्यप्रतीतिविषयत्वस्य विशिष्टद्वयाघटितत्वार्थकत्वात्। यत्र
सत्प्रतिपक्षाप्रसिद्धि स्तत्र भिन्नान्तमनुपादेयमेव, साध्यादिभेदेन
लक्षणभेदात्। भ्रमात्मकज्ञानीयविषयतासाधारणरूपेणैव वा प्रति-
हेतुव्यापकताविशिष्टसाध्याभावादि विषयतोपेया।

वस्तुतस्तु दर्शित विशिष्टस्य सत्प्रतिपक्षरूपता नस्वीक्रियते
ऽपितु हेतुतावच्छेदकरूपाघटितसाध्याभावाभाववदवृत्तिमत्प-
क्षात्मकविशिष्टस्यैव व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टस्य
उक्तरीत्या संग्रहे तद्धर्मव्यापकसाध्याभावकालीनतद्धर्मविशिष्टपक्षा-
दिव्यावृत्तिरप्यशक्या स्यादित्यविशेषेण व्यापकताघटितविशिष्ट-
मवस्यालक्ष्यताया एव युक्तत्वात्। नचोक्तप्रयासमपेक्ष्य ज्ञानवैशि-
ष्ट्यानवच्छिन्नप्रतिबन्धकतानिवेशनमेवोचितमिति वाच्यं। एव-
मपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्य
मतभेदेनासाधारण्यविरोधरूपस्य विषयतायाः पक्षधर्मि-
क प्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायामेवाऽवच्छे-
दकत्वात् प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशा-
सम्भवात्। दर्शितातिप्रसङ्गवारणाय च निरुक्तविशिष्टद्वयाघटित-
त्वस्यैव निवेशनीयत्वात्। नच पक्षवृत्तित्वविशेषितं प्रकृ-
तहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरूपं
वाच्यं पक्षवृत्तित्वाघटितविशिष्टविषयताया अप्रतिबन्धकज्ञान-
साधारणतया प्रतिबन्धकतानवच्छेदकत्वात् तादृशस्य चासाधा-
रण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतु साध्यव्यापकाभावप्रति-
योगित्वविशिष्टप्रकृतहेत्वादिरूपनिरुक्तविशिष्टद्वयघटिततया मिथ-

न्नविशिष्टद्वयाघटितत्वनिवेशोपि न सम्भवतीति वाच्यं। पक्षवृत्तित्वाद्यघटितविशिष्टस्यैवासाधारण्यादिरूपतया विरोधोपि फलतः प्रतिरोध एव तदन्यत्वेन वा विरोधि विशेषणीय मिति पङ्क्तिव्याख्यानावसरे सम्पादनीयत्वादिति निष्कर्षः॥

स्वन्यनतिरिक्तवृत्तित्वरूपा वच्छेदकत्वनिवेशेऽपि व्यभिचारादिघटितपदार्थाऽन्तरेतिव्याप्तिस्तद्विषयकत्वस्यापि प्रतिबन्धकतानतिरिक्तवृत्तित्वादत आह विशेषणीयस्येति। तादृशलक्षणमिति शेषः। तादृशविशिष्टेति। अनुमितिप्रतिबन्धकतायां यद्रूपावच्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः। व्यभिचारत्वाद्यवच्छिन्नस्य व्यभिचारत्वादि रूपतादृशरूपावच्छिन्न घटितत्वादसम्भव इत्यतोऽन्तरेति। स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकावच्छिन्नार्थकं। अतः शुद्धव्यभिचारादेर्मेयत्वविशिष्ट व्यभिचाराद्यभिन्नत्वेपि न क्षतिः। तदघटितत्वं तदविषयकप्रतीति विषयत्वं एवञ्चानुमितिप्रतिबन्धकतायां यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकं तादृशं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् तदवच्छिन्नत्वं समुदितार्थः। यद्रूपावच्छिन्ने लक्षणं सङ्गमनीयं तदेव स्वपदार्थः। भवति हि व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीति विषयतावच्छेदकीभूता ये बाधत्वादय स्तदवच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकं व्यभिचारत्वादीति तदवच्छिन्ने लक्षणसङ्गतिः। मेयत्वविशिष्ट व्यभिचारत्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छे-

दकत्वाभावान्न तदवच्छिन्नेऽतिव्याप्तिः । मेयत्वविशिष्टव्यभिचारादेरपि मेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वात्तद्दोषः स्यादतस्तादृशरूपाश्रयधर्म्मिणं तदवच्छिन्नाविषयकप्रतीतिविषयत्वेनाविशिष्य स्वमेव तादृशविषयतावच्छेदकत्वेन विशेषितं । मेयत्वविशिष्टव्यभिचारत्वाद्याश्रयाविषयकत्वस्य व्यभिचारत्वाद्यवच्छिन्नविषयक प्रतीतौ दुर्घटत्वात्तद्दोषः स्यादतः स्वाश्रयाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्व निवेशः ।

स्वावच्छिन्नाविषयक प्रतीति विषय वृत्तित्वस्य तादृश धर्म्म विशेषणत्वे, व्यभिचारत्वादेरपि मेय त्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयक प्रतीति विषये व्यभिचारादौ वर्त्तमानत्वादसम्भव इत्यतस्तादृश विषयतावच्छेदकत्वेन धर्म्मो विशेषितः । प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाविषयक प्रतीति विषयतावच्छेदकं यद्गगनाभाववन्मेयत्वादि, तदाश्रयाविषयक प्रतीत्यप्रसिद्ध्या व्यभिचारादौ तादृश प्रतीति विषयत्वस्य दुरुपपादतयाऽव्याप्तिरतस्तदवच्छिन्नाविषयकत्व निवेशः । अत्र च तादृश विशिष्टान्तरा विषयक प्रतीति विषयतावच्छेदकत्वस्य, दोषतावच्छेदक धर्म्मे विशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञान पदार्थे तादृशविशिष्टान्तराविषयकत्व निवेश एवोचितः । एवञ्च निष्कृष्ट वक्ष्यमाण कल्पे यद्विषयक निश्चयस्येत्यत्र च निश्चयएव तन्निवेश्यं लाघवादित्यवधेयं ।

अथ धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ बाधादेर्व्यभिचारादि घटिततया तन्न व्याप्तिः । नच यद्रूपावच्छिन्न-

विषयकत्वं स्वावच्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्या- वच्छेदकं तादृश रूपान्तरावच्छिन्नाघटितत्वस्य विवक्षितत्वान्नदोषः। व्यभिचारस्य उक्तबाध विषयकत्वान्यूनवृत्ति व्याप्तिज्ञान प्रतिबन्ध- कतावच्छेदकविषयिताकत्वेपि तादृश प्रतिबन्धकता सामान्यान्त र्गतानुमितिप्रतिबन्धकतावच्छेदकविषयिताकत्वविरहेण तादृश घटितत्वस्या किञ्चित्करत्वादितिवाच्यं, व्यभिचारत्वादि विशिष्ट- विषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकविषयिता निरूपकतावच्छेदकस्य तदवच्छिन्नाविषयक प्रतीति विषयतावच्छे- दकस्या प्रसिद्ध्याऽसम्भवा द्व्यभिचारत्व मेयत्व विशिष्ट व्यभि- चारत्वादेरेवतथाविध विषयिता निरूपकतावच्छेदकत्वःत् तस्यच व्यभिचारत्वा द्यवच्छिन्ना विषयक प्रतीति विषयतावच्छेदकत्वा भावात्॥ नच स्वावच्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामा- न्यावच्छेदक विषयिता निरूपकतावच्छेदकः कश्चित् स्वावच्छि- न्नाविषयक प्रतीति विषयतावच्छेदकोयस्य एवम्भूतं यद्यत्त्वं, प्रमेयत्व विशिष्ट व्यभिचारत्वादि, तदवच्छिन्नाविषयक प्रतीति विषयतावच्छेदकत्वस्यविवक्षणीयतया न दोष इति वाच्यं तथा सति धूम व्यभिचारि वह्निमान् धूमवान् वह्नेरित्यादौबाधत्वाद्य वच्छिन्न घटक तावच्छेदकस्य धूमव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकीभूतस्वावच्छिन्नविष- यकत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदक विषयिता निरू- पकतावच्छेदक व्यभिचारत्वकत्वादव्याप्तेर्दुर्व्वारत्वात्। नच स्वाव- च्छिन्नविषयितावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकीभूत

यत् किञ्चित् विषयित्वं यादृश यादृश धर्मावच्छिन्ना निरूपितं तादृश धर्मावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकं यत्त्वं तद्रूपावच्छिन्नत्व मेव समुदितार्थः । मेयत्व विशिष्ट व्यभिचार त्वाद्यव.च्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकी भूतायाः शुद्धव्यभिचारत्वाद्यवच्छिन्न निरूपित विषयितया मेयत्व विशिष्ट व्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन तदवच्छिन्ना-विषयक प्रतीति विषयतावच्छेदकत्वस्य च स्वभिन्नसत्वेन. मेयत्व विशिष्ट व्यभिचारत्वादेः स्वपदेनोपादातुमशक्यत्वात् । व्यभि-चारत्वादिशिष्टविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदि कायाः कस्याश्चिदपि विषयितायाः व्यभिचारत्वादि विशिष्टा-निरूपितत्वासम्भवात् तादृश विषयितायाः यादृश यादृशविशिष्टा निरूपितत्वं, मेयत्व विशिष्ट व्यभिचारत्वादेरेव तादृशत्वात्, तद-वच्छिन्नाविषयक प्रतीति विषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनोपादातुं शक्यत्वाच्च न कश्चिद्दोषः । अथवा यद्धर्मावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकीभूत विषयिता त्वं यद्धर्मावच्छिन्न निरूपितत्व व्याप्यं तद्धर्मवत्त्व मेव समुदि-तार्थं इति वाच्यं, बाधविशिष्ट व्यभिचारत्वाद्यवच्छिन्नेऽति प्रसङ्गः। तादृश धर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञान प्रतिबन्ध-कतायां केवलव्यभिचार विषयितायाः, तादृश व्यभिचारज्ञान प्रतिबन्धकतायाञ्च केवलबाध विषयितायाः अनवच्छेदकत्वेन बाध विशिष्ट व्यभिचारत्वाद्यवच्छिन्नविषयितायाः एव तथाविध प्रतिबन्धकता सामान्यावच्छेदकत्वं, तस्याश्च तादृश धर्मद्विशिष्ट

तद्घटकतावच्छेदकविशिष्ट निरूपितत्वस्यावश्यकत्वात् प्रथम कल्पेत्व पदेन चरमकल्पेयत् पदेनतस्योपादान सम्भवात ।

अथ वह्न्यभावादि धर्म्मितावच्छेदकक वह्न्यादि प्रकारक बुद्धेरिव धूम व्यभिचार विशिष्ट वह्न्यादि धर्म्मितावच्छेदककस्य धूमव्याप्यतया बह्न्यादि प्रकारक ग्रहस्यानाहार्य्यस्या सम्भवेन तादृश पक्षतावच्छेदकावच्छिन्न पक्षक समूहालम्बनानु मिते रप्रसिद्धया तादृशानुमिति प्रतिबन्धकता घटित यथा श्रुत लक्षणस्य तद्रूपावच्छिन्न पक्षक वह्न्यादि हेतुक दोषेऽव्याप्तिं स्वय मेव वक्ष्यति तद्वारणप्रयासोऽवृथेति चेत् भवतु तावदेवं, तथापि विशेषगुणाभाववान् घटोगुणसामान्याभाववानित्यादौ विशेष गुणवद्घटादिरूपा श्रयासिद्धेर्गुणवद्घटादि रूपबाध घटितायाः संग्रह आवश्यकः । यद्यपि तत्र घटत्वावच्छेदेन गुणवत्त्व मेव बाधः, आश्रयासिद्धिश्च तत्सामानाधिकरण्येन तदवच्छेदेन वा विशेष गुणवत्वं, तस्याश्च गुणत्वरूपसामान्यधर्म्मावच्छिन्नं घटत्व व्याप- कता घटितोक्त बाधस्य न प्रवेशः, विशेष गुणत्वेन घटत्व व्यापकताया स्तत्र प्रवेशेऽपि सामान्य रूपेण व्यापकताया स्तद- नन्तर्भावादिति न तादृशा सिद्धसंग्रह प्रसङ्ग इत्युच्यते तथापि विशेष गुणाभाववान् द्वितीयक्षणावच्छिन्नो घटोगुणसामा न्या भाववानित्यादौ द्वितीयक्षणावच्छिन्ने घटेविशेषगुणवत्त्वरूपा श्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वरूप बाध प्रवेश स्यावश्य कत्वात् लक्षणेच तत् संग्रहस्यावश्यकतया उक्तविशेषणदा नानुपपत्तिः । वस्तुतस्तु अत्र वदन्तीत्यादि निष्कृष्ट कल्पेयत्व

विशिष्ट व्यभिचारादि वारणाय विशिष्टान्तरा घटितत्वस्य निवेश नीयतयातन्मते दर्शित वाधाद्य संप्रश्नोदोष एव। एतेन स्वावच्छिन्न-निरूपित विषयितावच्छिन्नयत् किञ्चित् प्रतिवन्धकतावच्छेदक विषयिताक विशिष्ट निरूपित विषयितात्व व्यापक स्वावच्छिन्न निरूप्यताकत्वं समुदितार्थः। मेयत्व विशिष्ट व्यभिचारत्वादिकं नैतादृशंस्वं तदवच्छिन्नविषयकत्वावच्छिन्न प्रतिवन्धकतावच्छेदक व्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्याप्यत्वादुक्तस्थ-ले च विशेषगुण विशिष्ट घटादि रूपाश्रया सिद्ध्यादि विषयकत्वाऽ-वच्छिन्न विशिष्ट पक्ष ग्रहादि निरूपितयत् किञ्चित् प्रतिवन्धकता वच्छेदक विषयताक विशिष्ट निरूपित विषयितात्वस्य तादृशाश्रया सिद्ध्यादि निरूपितत्व व्याप्यत्वात्तत्र लक्षण समन्वयः। प्रतिवन्धक-तायां यावत्स्वानिवेशानोक्तरीत्या वाध विशिष्ट व्यभिचारादावति प्रसङ्गः। स्वावच्छिन्ना निरूपिता यादृश यादृशविशिष्ट विषयिता, तादृश विशिष्टविषयितानवच्छिन्नप्रतिवन्धकतावच्छेदकस्वावच्छिन्न विषयिताकोद्देधर्म्म स्तदत्त्वंसमु दितार्थः। मेयत्व विशिष्ट व्यभि-चारत्वादिकं नैता दृशं स्वं तदवच्छिन्ना निरूपित शुद्ध व्यभिचार-त्वाद्य वच्छिन्नविषयितावच्छिन्नाया मेव प्रतिवन्धकतायां तदव-च्छिन्न विषयितायाश्चावच्छेदकत्वात् उक्तस्थले तादृश विशिष्ट वाध विषयकत्वस्य तद निरूपित व्यभिचारविषयितानवच्छिन्नायाश्चानु मिति प्रतिवन्धकतातदवच्छेदकत्वा ल्लक्षण समन्वय इति परास्तं यद्विषयक निश्चयस्य विरोधिविषयिता प्रयुक्त इत्यादि निष्कृष्ट कल्पेऽनु मिति प्रतिवन्धकताया अघटकत्वात् प्रतिवन्धकतायां

विशिष्टान्तर विषयकत्वानवच्छिन्नत्व विशेषणदानस्या सम्भवेन यत् पदार्थस्य तादृश पदार्थान्त रा घटितत्वेन विशेषणीय तया-उक्तावाधा व्याप्तेरशक्यपरीहारात् ॥

अत्र केचित् स्वसजातीय विशिष्टान्तरा घटितत्व मेव यत् पदार्थे विशेषणं देयं। साजात्यञ्च हेत्वाभास विभाजक रूपेण, तच्चरूपं वाधत्व व्यभिचारत्वादि, तेन रूपेण व्यभिचारादेर्न वाधादि साजात्य मिति व्यभिचार घटित वाधादीनाव्याप्तिः। नचैवं यद्विषय कनिश्चयस्य विरोधि विषयता प्रयुक्त उभयाभाव सत्त्वमित्यत्र विरोधि विषयता प्रयुक्तपदस्यवैयर्थ्यं। घटादेः तादृश रूपेण सजातीयत्वा प्रसिद्धैरवाति प्रसङ्गाभावादिति वाच्यं स्वसजातीय विशिष्टान्तर घटितं यत्स्वं तद्विषयक प्रतीति विषय त्वस्य विवक्षयाऽनुयोगिनिस्वत्वानन्तर्भावेण पदार्थान्तरेष्वति प्रसङ्ग वारकतयातद्दल सार्थक्यात् नच व्यभिचार विशिष्ट मेयत्वादेर्हेत्वा भासत्व विरहाद्धेत्वाभा सविभाजक रूपेण सजातीया प्रसिद्ध्या तस्य स्वपदेनोपादातुमशक्यतया मेयत्वविशिष्टव्यभिचारादेरेयस्वपदेनो पादेयतया तद्भिन्नतया तत्राति प्रसङ्ग इति वाच्यं विशिष्टान्तरा घटितत्वेना घटितस्य साध्यसाधनग्रहाविरोधिज्ञाननिष्ठविषयिता सम्बन्धेन व्याप्तिग्रहप्रतिवन्धकता नतिरिक्तवृत्तित्वादि रूपस्य व्यभिचारादि विभाजकस्यात्र निवेशात्तादृश रूपस्य च व्यभिचार विशिष्ट मेयत्वादि साधारणत्वादित्याहुः। अत्रेदं वोध्यं प्रतियोगिनि स्वत्वान्तर्भावेण तादृश लक्षण करणेपि व्यभिचार घटित वाधा दावव्याप्तिवारण मशक्य मेव तत्र सजातीय विशिष्टान्तर घटितं

यत् स्वं धूम व्यभिचारि वह्निमत्त्वं, तदघटितत्वस्य तद्घटित बाधादावसत्त्वात् यदि तदघटितत्वम् तदपर्य्याप्त विषयता पर्य्याप्त्यधिकरणत्वं तच्च तत्र सुघट मेव एकदेशापर्य्याप्त विषयताया अपि समुदाये पर्य्याप्तिरित्युच्यते तदाप्य व्याप्ति र्दुर्वारैव निरुक्त व्यभिचारत्वेन सजतीय विशिष्टान्तर घटित स्तादृश बाध एवतदपर्य्याप्तविषयतायास्तत्रा भावात् । नच स्ववृत्ति यावद्धेत्वाभासविभाजक रूपेण साजात्यं विवक्षणीयं । तथाच बाधादि घटक व्यभिचारादौ बाधत्वाद्यसत्त्वान्न तादृश बाधादि सजातीयत्वं अतस्तत् संग्रह सम्भव इति वाच्यं एवं सति बाध विशिष्ट व्यभिचारादौ स्ववृत्ति बाधत्व व्यभिचारत्वादियावद् धर्म्मेण व्यभिचार बाधादौ सजातीयत्वा प्रसिद्ध्या ऽतिव्याप्तेः तस्मात् व्यभिचारादि घटित बाधादेः संग्रह प्रकारोऽग्रे प्रदर्शनीय एवादरणीयः । मेयत्वविशिष्टव्यभिचारादौ* तादृश व्यभिचारत्वाद्यवच्छिन्ने । नाति प्रसङ्गः नदोष व्यवहार प्रसङ्गः । अत्र मेयत्व विशिष्ट व्यभिचारो दोष इत्यादि व्यवहाराभावान्नेष्टापत्तिः सम्भवति । नच विशिष्टव्यभिचारादेः शुद्धव्यभिचारत्वादिना दोषत्वस्याक्षततयोक्तविशेषणदानेऽपि तादृश व्यवहारापत्तिर्दुर्व्वारैवेति, तन्नेष्टापतौ व्यर्थं विशेषण मिति वाच्यं दोषादि पदस्य निरुक्त विशेषणावच्छिन्नानुमिति प्रतिबन्धकतावच्छेदक त्वावच्छिन्न निरूपितविषयताकत्वेनान्वयितावच्छेदक धर्मबोधकतायाव्युत् पन्नतया प्रकृतेच मेयत्व विशिष्ट व्यभिचारत्वादिरूपस्यान्वयितावच्छेदकस्योक्त विशेषणासत्त्वेनाति प्रसङ्गा

---

* दीधितौ मेयत्वविशिष्टव्यभिचारा दाविति पाठाभिप्रायेणेदं ।

भावादिति हृदयम्। नन्वा श्रया सिद्ध्यादिस्थले पक्षतावच्छेदका भाववत् पक्षकत्वादिक मेव दोषस्तस्यैव हेतुनिष्ठतया हेतोर्दुष्टत्व व्यवहार निर्वाहकत्वात् तादृश धर्म्मस्य तादृशा भाववत्पक्षादिरूप तादृश विशिष्टान्तर घटित तया ऽव्याप्ति रित्यतआह

एवञ्च पक्षतावच्छेदकादि विरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहोवा। साध्याभाववद्वृत्तिसाधनं, साधनवद्वृत्ति साध्याभावोवा हेतुदोषोयेन केनापि सम्बन्धेन तद्वांश्च प्रकृतोहेतुर्दुष्टः।

एवञ्चेति तादृश विशेषणदानेचेत्यर्थः आदिपदात् साध्यादि परिग्रहः पर्व्वतादिधर्म्मिककाञ्चनमयत्वादिविशिष्टबुद्धौ पर्व्वतः काञ्चनमयत्वाभाववानित्यादि धर्म्मिविशेष्यक निश्चयस्येव पर्व्वते काञ्चनमयत्वं नास्तीत्यादि धर्म्मिविशेषणक निश्चयस्यापिविरोधित्वमानुभविक मतस्तद्विषयस्यापि, दोषत्व माह पक्ष निष्ठ इति आधेयतासम्बन्धेन पक्षविशिष्ट इत्यर्थः। समुच्चयार्थं कोवाकारः साधनवद्वृत्तिः साध्याभाव इति। साध्याभाववद्वृत्तित्वप्रकारकज्ञानं साधनधर्म्मिकव्याप्तिग्रह प्रतिबन्धकं, साधनवति साध्याभाव इति ज्ञानेऽपि साधने साध्याभाववद्वृत्तित्वं तुल्यवित्तिवेद्यतयानियमतो भासत इत्यभिप्रायेण। साधनवति साध्याभाव इति ज्ञानस्यासमानविशेष्यकस्यापि प्रतिबन्धकत्वमिति प्राचीनमताभिप्रायेणवेदं। दोष इति न पक्षत वच्छेदका भाववत् पक्षकत्वादिक मिति शेषः।

तथा चा लक्ष्यत्वावतचा व्याप्ति रिति भावः नंनुपक्षतावच्छेदका-भाववत् पक्षादीनां हेत्ववृत्तित्वात् कथं हेतौदुष्टता, अवह.र इत्यत आह येनकेनापीति । एक ज्ञानविषयत्वादिनेत्यादिः । तद्वान्नदव-च्छिन्नः, दुष्टः इष्टपदप्रतिपाद्यः, तथाचहेतोः तादृशदोषानधिकर-णत्वेऽपि नक्षतिः । दुष्टइत्यादौसामान्यतः सम्बन्धिन एवनिष्ठार्थ-त्वात् नचैवमेकज्ञान विषयत्वादिनावह्न्यभाववद्ह्रदादिरूपदोषस्य धूमादौसत्वेपि पर्वतादौवह्न्यादि साधनेतस्य दुष्टव्यवहारापत्ति रितिवाच्यं यतस्तद्रूपावच्छिन्नपक्षसाध्यहेतुवाचकपदसमभिव्याहार-स्थले तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमिति प्रतिबन्धकतावच्छेदका-वच्छिन्ननिरूपितविषयिताक धर्म्मावच्छिन्न सम्बन्धी दुष्टपदेन बोध्यते ईदृश व्युत्पत्त्या पूर्व्वव्यवहारेपि पूर्व्ववदेव वह्न्याधूम-साधनेऽसभो दुष्टइत्यादि व्यवहारोन्निरुक्तदोषमात्रस्य दुष्टत्वव्यव-हारविषयतावच्छेदकत्वे दुर्व्वार इति । प्रकृतहेतुतावच्छेदका-विशिष्ट सम्बन्धोनिष्ठार्थतावच्छेदकोवाच्य एतल्लाभाय प्रकृतोहेतु रित्युक्तं । ह्रदेवह्नेः साधने धूमोदुष्टइत्यत्रह्रदत्वावच्छिन्नपक्षक वह्नित्वावच्छिन्नसाध्यक धूमत्वावच्छिन्नलिङ्गकानुमिति प्रतिबन्धक-तावच्छेदकत्वावच्छिन्नविषयिताक धर्म्मावच्छिन्न सम्बन्धीधूम इत्यन्वयबोधः, तत्र प्रतिबन्धकतावच्छेदकत्वावच्छिन्नविषयिताक धर्म्मविशिष्ट एव दुषधातोरर्थः । साधनपदं लक्षणया धूमत्वा-वच्छिन्नहेतुकानुमितिपरं, तत्रह्रदइति सप्तम्यन्तार्थह्रदत्वावच्छिन्न-पक्षकत्वस्य, वह्नेरितिषष्ठ्यन्तार्थस्यवह्नित्वावच्छिन्न साध्यकत्वस्य-चान्वयः, तादृशानुमित्यन्वित सप्तम्यर्थं निरूपितत्वस्य दुषधात्वर्थैं

कादेशेप्रतिबन्धकत्वेऽन्वयः। एवञ्च पर्व्वतेवह्नेःसाधने धूमोदुष्ट इत्यत्र पर्व्वतत्वावच्छिन्नपक्षकावह्नित्वावच्छिन्न साध्यकधूमत्वावच्छिन्नहेतुकानुमिति प्रतिबन्धकतावच्छेदक स्वावच्छिन्नविषयताका धर्म्मविशिष्ट सम्बन्धी धूमइत्येव प्रतीयते, तत्र तादृश धर्म्मस्या प्रसिद्ध एवेतिनतथा व्यवहारः। पक्षविशेषादिक मनन्तर्भाव्य धूमं दुष्ट इति व्यवहार स्त्वबाधित इष्यतएवेतिदिक्॥

साधननिष्ठसाध्याभाववद्वृत्तित्वादेरेवव्यभिचारतया प्रसिद्धिर्न्तुतद्विशिष्ट साधनादेरतोनतस्य दोषत्वमितिकश्चिदाह व्याचष्टेपि लक्षणा मन्यथैवान्यथाति प्रसङ्गात् तादृशन्यायस्यासुपन्य स्यति

याद‍ृश धर्म्मिणि, यादृशधर्म्मवत्ताज्ञान मनुमिति प्रतिबन्धकं, तद्धर्म्मिणि, स्तादृशधर्म्मवत्त्वं, हेतुदोष इत्यपि कश्चित्।

यादृशेति। यद्रूपावच्छिन्नेत्यर्थकं। ज्ञानं, ज्ञानत्वावच्छिन्नं। तस्य धर्म्मिणि, स्तद्धर्म्मावच्छिन्नस्य, तेनसम्बन्धेनेति शेषः। तादृग धर्म्मवत्त्वं, तद्रूपावच्छिन्नधर्म्मवत्त्वं। साधनादिविशेषणक साध्याभाववद्वृत्तित्वादि विशेष्यक ज्ञानस्य सामान्यव्याप्त्यादिज्ञान प्रतिवन्धकत्वेपि साध्याभाववद्वृत्तित्वादेराधेयतासम्बन्धेन साधनीयत्वादिकं न दोषः, साधनादेः साध्याभाववद्वृत्तित्वादि धर्म्मताविरहात्। अतोऽवच्छेदकत्वं पूर्व्ववन्नतु स्वरूप सम्बन्ध विशेषः। पक्षतावच्छेदकावच्छिन्ननिष्ठ केवलाभावत्वावच्छिन्नवत्त्वादावति प्रसङ्गात्तदव-

च्छिन्नधर्म्मिकतद्रूपावच्छिन्नवत्ता ज्ञानत्वस्यापि प्रतिबन्धकताव-च्छेदक कोटि प्रविष्टत्वा दवच्छेदकतापर्य्याप्ति विवक्षणेतु ह्रदत्वावच्छिन्ननिष्ठवह्न्यभावत्वाद्यवच्छिन्नवत्त्वे ऽव्याप्तेः, वह्नि-त्वादिना घटाद्यवगाहिनोह्रदोनवह्निमानित्यादि निश्चयस्य ह्रदोवह्निमानित्याद्यनुमितिप्रतिबन्धकतया ह्रदत्वावच्छिन्न विशेष्यक वास्तवह्न्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वेन न प्रतिबन्धकता इति अपितुतद्विशेष्यकवह्नित्वावच्छिन्न प्रकारता निरूपिताभावत्वावच्छिन्नप्रकारताकनिश्चयत्वेनैवातस्तादृश मेव रूपं प्रतिबन्धकतावच्छेदकता पर्य्याप्त्यधिकरणं, नतुह्रद-त्वावच्छिन्न धर्म्मिकवह्न्यभावत्वावच्छिन्न प्रकारकत्वमिति यद्रूप-पदेनवह्न्यभावत्वाद्युपादानं न सम्भवति, पर्व्वतोवह्न्यभाववानि-त्यादौ पर्व्वतत्वावच्छिन्न निष्ठवह्नित्वावच्छिन्न रूपबाधादेरसंग्रहभये-न यद्रूपावच्छिन्न धर्म्मिणि यद्रूपावच्छिन्नप्रकारतानि रूपित यद्रूपावच्छिन्नप्रकारताक निश्चयत्वेन प्रतिबन्धकता तद्रूप विशिष्टे तद्रूपावच्छिन्न विशेषित तद्रूपावच्छिन्नवत्त्वं दोष इत्यादि विवक्षाया असम्भवात। अत्र साधननिष्ठसाध्याभाव वहृत्ति त्वादेरिवसाध्याभाववद्वृत्ति साधनादेरपिदोषत्वेचतिविरहात् एतत्-वानायासोऽनर्थक इत्यस्वरसः कश्चिदित्यनेन सूचितः॥

अथ पर्व्वतत्वेन पक्षत्वे, वह्नित्वेन साध्यत्वे, वि-शिष्टधूमत्वेन च हेतुत्वे, पर्व्वतादेः काञ्चनमयत्व विरहो, ह्रदस्य वह्निधूमशून्यत्वं, मेयत्वस्य केवलधूम-

स्य वा वह्निव्यभिचारो, विशिष्ट धूमस्य वा पर्व्वतीय-वह्नि व्यभिचारो नदोषः। न वा तत् सम्बन्धेन तत्र तस्य हेतोर्दुष्टत्वं, अतस्तद्धर्म्मावच्छिन्न तत् पक्षक तद्धर्म्मावच्छिन्न तत् साध्यक तद्धर्म्मावच्छिन्न तद्धेतुकानुमिति प्रतिबन्धकत्वं वाच्यम्।

यथा व्याख्यात यथा श्रुतार्थे निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ प्रकृत पक्षतावच्छेदक विशिष्टे प्रकृतसाध्यतावच्छेदकावच्छिन्न प्रकारकानुमितेर प्रसिद्धया ऽव्याप्तिर्दर्शयिष्यते, तत्रविशिष्य पक्षतावच्छेदकाद्य प्रवेशे ना प्रसिद्धिरतस्तन्निवेश प्रयोजन माह अथेति। पर्व्वतादेः काञ्चनमयत्वविरह इत्यादौ सर्व्वत्र नदोष इति सम्बध्यते। तथाचपक्षतावच्छेदकाद्य प्रवेशे पूर्व्वोक्त युक्त्या ऽसम्भवात् तद्वारणाय यत् किञ्चिद्धर्म्मावच्छिन्नपक्ष साध्य-हेतुकानुमितिसामान्य प्रतिबन्धकत्व मेव निवेश्य मिति पर्व्वतोवह्निमान धूमादित्यादौपर्व्वतादिनिष्ठकाञ्चनमयत्वा भाववदावृत्ति व्याप्तिःतस्यापि काञ्चनमयत्वादि सहित पर्व्वतत्वादि रूपयत्किञ्चिद्धर्म्मावच्छिन्न पक्ष साध्यहेतुकानुमिति प्रतिबन्धक ज्ञानविषयत्वादितिभावः। आदिपदञ्च वस्त्वन्तर संग्राहकं। प्रकृतानुमित्यविषयपदार्थाभावे ऽति व्याप्तिं सूचयित्वातद्विषय साध्याद्यभावे, तां सूचयति ह्रदस्येति। ह्रदनिष्ठं वह्निशून्यत्वं धूमशून्यत्वञ्चेत्यर्थः। ह्रदादि निष्ठाभावेऽति व्याप्तिसूचनञ्च प्रकृतपक्षतावच्छेदकावच्छिन्न प्रकृत पक्षकत्वरूप समुदायदलस्यैवा निवेशे बोध्यं।

महानसीयेति महानसीयं वह्न्यभावो महानसीयधूमाभावो वेत्यर्थः अत्राति व्याप्तिसूचनञ्च प्रकृतसाध्यतावच्छेदक, प्रकृतहेतुतावच्छेदकयोरनिवेशे बोध्यं ॥

इदमुपलक्षणं साध्यहेत्वोरनिवेशेऽपि जलत्वाभावादावतिव्याप्ति र्बोध्या । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे, पक्षधर्म्मताज्ञानप्रतिबन्धकतामादायाति व्याप्तिं सूचयित्वा, व्याप्तिज्ञानप्रतिबन्धकतामादायातिव्याप्तिं सूचयति मैयत्वस्येति । वह्नि व्यभिचार इत्यनेनान्वयः । अत्राति व्याप्तिस्तादृशदल समुदायस्यैव अनिवेशे बोध्या। प्रकृतहेतुकत्वनिवेशेऽपि एतद्दोषस्याशक्यवारणतया हेतुतावच्छेदक निवेशनायाह केवलधूमस्येति । वह्निशून्यदेशान्तरवृत्तिधूमव्यक्तिव्यावर्त्तकविशेषणानवच्छिन्नेत्यर्थः । साध्यतावच्छेदकानिवेशे पूर्व्वं साध्यवत्ता ज्ञानविरोधिन्यतिव्याप्ति दर्शिता, इदानीं व्याप्तिज्ञानविरोधिन्यतिव्याप्तिं दर्शयति विशिष्टधूमस्यवा पर्व्वतीयवह्निव्यभिचार इति, दोष लक्षण इव दुष्ट लक्षणेऽपि पक्षतावच्छेदकादिनिवेशस्यावश्यकतां दर्शयति नवातत् सम्बन्धेनेति । तत्रपर्व्वतत्वावच्छिन्ने, वह्नित्वावच्छिन्नवह्निसाधने । तस्य विशिष्टधूमत्वावच्छिन्नस्य । पक्षादौ पक्षतावच्छेदकादेर्यादृश सम्बन्धेन विशेषणत्वं यत्राभिमतं तत्र तत् सम्बन्धेन तदवच्छिन्नत्वं निवेश्य मिति सूचयितुं तत्पक्षकेत्युक्तं, पक्षतावच्छेदकादि निवेशेपक्षादि निवेशस्या प्रयोजकत्वादिति । वाच्यं, तद्रूपावच्छिन्नपक्ष साध्यहेतुक दोष लक्षणे निवेशनीयं ।

तथा च निर्व्वह्निः पर्व्वतोवह्निमान्, पर्व्वतावृत्ति वह्निमान् वा, तद्व्यभिचारिणः, पर्व्वतावृत्तित्वां धर्म्मादित्यादौ न कोपि हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धत्वात्।

तथाचेति, निर्व्वह्निः पर्व्वतोवह्निमान् इत्यत्र पक्षतावच्छेदक निर्व्वह्नित्व विशिष्ट पर्व्वते, वह्नि वैशिष्ट्यावगाहित्व मनुमितेर्न सम्भवति स्वविरोधिधर्म्मधर्म्मितावच्छेदकक स्वप्रकारकानाहार्य्यज्ञानस्यानभ्युपगमात्। पर्व्वतः पर्व्वतावृत्तिवह्निमान् इत्यत्र पर्व्वते पर्व्वतावृत्तित्व रूपसाध्यतावच्छेदकावच्छिन्नप्रकारकत्व मनुमितेर्न सम्भवति स्वस्मिन् स्वावृत्तित्वाद्यवच्छिन्न प्रकारकानाहार्य्यज्ञानस्याननुभविकत्वादेवं पर्व्वतो वह्निमान् वह्निव्यभिचारिण इत्यत्र वह्निव्यभिचारित्व रूपहेतुतावच्छेदकावच्छिन्ने वह्निव्याप्यत्व वैशिष्ट्यावगाहित्व मनुमितेर्न सम्भवतीति पूर्व्वोक्त युक्तेः। पर्व्वतोवह्निमान् पर्व्वतावृत्तेरित्यत्र पर्व्वतेपर्व्वतावृत्तित्वरूपहेतुतावच्छेदकावच्छिन्न वैशिष्ट्यावगाहित्वं नानुमितेः सम्भवति उक्तयुक्तेरिति, यथाविवक्षितानुमित्य प्रसिद्धि प्रयोजकभेदेन नानास्थले ऽव्याप्ति कथनं। नकोपिहेत्वाभासः स्यादिति, तथाचापार्थकरूपनिग्रहस्थानत्वेन तथाप्रयोक्तु र्निग्रहोपपत्तावपि, निर्व्वह्नित्वेन पर्व्वते वह्नेः साधने धूमोदुष्ट इत्यादि व्यवहारोऽनुपपाद इति भावः। तादृशानुमितेस्तथा

विवक्षितानुमितेः । अप्रसिद्धत्वादिति । आहार्य्येतरज्ञानानुपगमादिति भावः ॥

अत्र वदन्ति यद्विषयकनिश्चयस्य विरोधिविषयता प्रयुक्त स्तदुत्तरमनुमितावनाहार्य्यं मानसज्ञाने वा, पक्षतावच्छेदकविशिष्टपक्षे, साध्यतावच्छेदकविशिष्ट साध्यवैशिष्ट्यावगाहित्वस्य, साध्यतावच्छेदकविशिष्ट साध्यनिरूपित व्याप्तिविशिष्टहेतुतावच्छेदकविशिष्ट हेतुमत्तावगाहित्वस्य च, द्वयोर्व्यतिरेकस्तत्त्वं हेतुदूषणत्वं ।

यद्विषयकनिश्चयस्येति, यद्रूपावच्छिन्नविषयकनिश्चयस्येत्यर्थः । उत्तरपदस्योत्तरकालीनार्थकतया, तदुत्तरमिति धातूपस्थाप्यानुमितिरूप क्रियाविशेषणमतोद्वितीया । अग्रिमकल्पे तादृशज्ञानरूपक्रिया विशेषणं, अतोज्ञानपदमपिसार्थकं । तत् पदञ्च, तादृशनिश्चय परामर्शकं । उत्तरपदञ्चाव्यवहितोत्तरार्थकं । कालाध्वनोरत्यन्तसंयोग इत्यनेनद्वितीयाधिकरणे, उत्तरपदस्य उत्तरकालपरत्वादिति तु न युक्तं, व्यापकतात्मकस्यात्यन्तसंयोगस्य प्रकृतेऽविवक्षितत्वादिति । अनुमितावनुमितिसामान्ये । द्वयोर्व्यतिरेक इत्यभि सम्बन्धः । तत्त्वं, तद्रूपावच्छिन्नत्वं । अत्र च तज्ज्ञानानन्तरज्ञाननिष्ठ तादृशोभयाभावेतज्ज्ञानीयाया एव विरोधि विषयितायाः

प्रयोजकत्वात् विरोधि विषयितायां तादृश निश्चयीयत्व कथनं स्वरूप कीर्त्तन मात्रं, नतु लक्षण घटकं। तथाच यद्रूपावच्छिन्न निश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधि विषयिता प्रयुक्तोभयाभाववत्त्वं, तादृशरूपावच्छिन्नत्वं दोषत्वमिति समुदितार्थः। वह्न्यभाववद्विशिष्ट ह्रदत्वावच्छिन्न विषयक निश्चयानन्तरं ह्रदोवह्निमान् वह्नि व्याप्य धूमवांश्चेत्याकारकानुमितेः कदाचिदप्यनुत्पत्त्या घटाद्यनुमितय एव तादृश निश्चयाव्यवहितोत्तरानुमिति सामान्यान्तर्गतास्तासुच ह्रदत्वादि विशिष्टे यत् वह्नित्वाद्यवच्छिन्नवैशिष्ट्यावगाहित्वं, वह्नित्वावच्छिन्नवह्निव्याप्तिविशिष्टधूमत्वावच्छिन्नवैशिष्ट्यावगाहित्वञ्च, तदुभयाभाववत्त्वमक्षत मेव, तत्र तादृश निश्चयीय विरोधिविषयिताप्रयुक्तत्वमपि, स्वनिष्ठ प्रतिबन्धकतावच्छेदक धर्म्मस्य स्वानन्तरोत्पन्नज्ञाननिष्ठप्रतिबध्यतावच्छेदक धर्म्माभाव प्रयोजकत्वात्, तत्रह्रदत्वादि विशिष्टविशेष्यकत्वावच्छिन्नवह्नित्वादि विशिष्ट प्रकारकत्वावच्छिन्न प्रतिबध्यता निरूपित प्रतिबन्धकतावच्छेदकीभूताया, ह्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नवह्नित्वावच्छिन्नाभावीय प्रकारितायास्तादृशवह्नित्वादि विशिष्ट प्रकारकत्व घटितोभयाभावेतथात्वात्। नच तादृशविशिष्ट प्रकारकत्वमात्रं न विरोधि निश्चय प्रतिबध्यतावच्छेदकं, अपितुनद्विशेषितानाहार्य्य ज्ञानत्वं, तत् कथं तत्प्रकारकत्वाभावस्य तथाविध विरोधि विषयिता प्रयुक्तत्वमिति वाच्यं, विशिष्टाभाव प्रयोजकस्य विशेष्यव न्निष्ठविशेषणाभाव प्रयोजकत्वात् अनाहार्य्यज्ञानत्वाद्याश्रयानुमिति निष्ठ तादृश विशिष्ट प्रकारकत्वा भावस्य, विरोधिविषयिता प्रयुक्तत्वाच्चेतिरीति

र्व्वतोवह्निमान् धूमादित्यादौ वह्न्यभावविशिष्टकत्वाद्यवच्छिन्ने लक्षण समन्वयः। निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ तादृशानुमितेरप्रसिद्धावपि वह्निमत् पर्व्वतादिरूपाश्रयासिद्ध्यादिविषयकनिश्चयानन्तरप्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदक विशिष्टविषयकत्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रकारकत्वघटितोभयाभाववत्त्वमक्षतमेवेति तत्र लक्षणसमन्वयः। न चाहार्य्यज्ञानमात्र प्रसिद्धस्य निर्व्वह्नि पर्व्वतत्वावच्छिन्नविशेष्यक वह्नि प्रकारकज्ञानत्वस्य विरोधिविषयकज्ञानप्रतिवध्यतानवच्छेदकतया तादृशधर्म्मावच्छिन्ने वह्न्यादिप्रकारकत्वस्याभावे विरोधिविषयताप्रयुक्तत्वमप्रामाणिकमितिवाच्यं। तादृशज्ञानत्वस्य प्रतिवध्यतानवच्छेदकत्वेपि तद्व्यापकस्य पर्व्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नाभावप्रकारकज्ञानत्वस्यैव वह्निविशिष्टपर्व्वतविषयकज्ञानप्रतिवध्यतावच्छेदकतया व्यापकाभावप्रयोजकस्य सुतरां व्याप्याभाव प्रयोजकतयातादृशविशिष्टविशेष्यकत्वावच्छिन्नवह्न्यादिप्रकारकत्वाभावे तादृशदोषविषयिताप्रयुक्तत्वस्यावश्यकत्वात्। नचविरोधि ज्ञानासत्त्वेपि निर्व्वह्निः पर्व्वतोवह्निमानित्यादिज्ञानस्यानाहार्य्यस्यानुत्पत्त्या इच्छादि घटित तादृशाहार्य्यज्ञानसामग्र्यभावस्यैव निर्व्वह्नित्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वं नतु विरोधिविषयित्वस्य, क्वचिदप्युक्तत्वादिति वाच्यं। अभावाधिकरणतायामेव विरोधिविषयताप्रयुक्तत्वस्य निवेश्यतया अधिकरणतानाञ्चाभावाभेदेप्यधिकरणभेदेन भिन्नतया विरोधिज्ञानानन्तरोत्

पर्व्वतज्ञाने तादृशवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनिगमना विरहेण पूर्व्वज्ञानीयविरोधिविषयिताया अपि प्रयोजकत्वात् ॥

यद्विरोधिविषयताप्रयुक्त स्तादृशोभयाभावस्तत्त्वमित्येतावन्मात्रे कृते ह्रदोवह्न्यभाववानित्यादिज्ञानीयवह्न्यभावादिविशिष्टह्रदादि-विषयिताया एव तदन्तःपातिवह्न्यभावत्वादि विशिष्ट विषयि-ताया अपि प्रतिबन्धकतावच्छेदककोटि प्रविष्टतया प्रतिबध्य-तावच्छेदकस्य ह्रदत्वादिविशिष्टे वह्न्यादि वैशिष्ट्यावगाहित्वस्य विरहप्रयोजकतया वाधाद्येकदेशे वह्न्यभावादिरूपविशिष्टे ऽति-व्याप्तिरिति यद्विषयक निश्चयाव्यवहितोत्तरानुमिति सामान्यस्य विरोधिविषयिताप्रयुक्तोभयाभाववत्त्वं निवेशितं । नच यादृश विशिष्टविषयितासामान्यस्य प्रयुक्तस्तादृशोभयाभावस्तत्त्वमित्येव सम्यक् ह्रदत्वादिविशिष्टविषयितासामान्यान्तर्गतायां ह्रदद्रव्या-दि ज्ञानीयविषयितायामुभयाभावप्रयोजकत्वासत्त्वादतिव्याप्तेरन-वकाशादितिवाच्यं । पाषाणमयोन वह्निमानिति ज्ञानसहि-तस्य पर्व्वतः पाषाणमय इतिज्ञानस्य पर्व्वतोवह्निमानितिज्ञान प्रतिबन्धकतया ज्ञानभेदेन विषयिताभेदाभावात् पाषाणमयत्व-विशिष्ट पर्व्वतादि विषयितासामान्यस्यैव उभयाभावप्रयोजक-त्वात् पाषाणमयत्वविशिष्ट पर्व्वतादावतिव्याप्तेर्दुर्व्वारत्वात् । ह्र-दोवह्न्यभाववानित्यादिह्रदादिविषयकनिश्चयानन्तरोत्पन्नघटाद्यनु-मितौ विरोधिविषयिताप्रयुक्तोभयाभावसत्त्वात् केवल ह्रदादा-वतिव्याप्तिरतः सामान्यपदं पूरणीयं । तथासति ह्रदादि निश्चयानन्तरोत्पन्नानुमिति सामान्यान्तर्गतायां ह्रद द्रव्या-

दिनिश्चयानन्तरजात ह्रदोवह्निमान् वह्निव्याप्यधूमवांश्चेत्या-द्यनुमितौ विरोधिविषयिताप्रयुक्ततादृशोभयाभावासत्त्वान्नाति-व्याप्तिः। ह्रदत्वादिना वह्न्यभावविशिष्ट ह्रदादिविषयक निश्चया-नन्तरमुक्तसमूहालम्बनानुमित्युत्पत्त्या तादृशविशिष्टस्यापि दोष-त्वानुपपत्तिरतोयत्पदं यद्रूपावच्छिन्नपरतयोपवर्णितं। वह्न्य-भावविशिष्ट ह्रदादिविषयकस्य ह्रदोवह्निमानवेत्यादि ज्ञान-स्यानन्तरं तादृश समूहालम्बनानुमित्युत्पत्त्या तद्दोषतादवस्थ्य-मतो निश्चयेति। अनाहार्याप्रामाण्यज्ञानानास्कन्दित संशयान्य-ज्ञान परं, तेनाहार्यस्याप्रामाण्यज्ञानास्कन्दितस्यापि दोष विषयकनिश्चयस्यानन्तरं तादृशानुमित्युत्पत्तावपि न क्षतिः। दोषविषयकनिश्चयनाशे सति तादृशानुमितेरुत्पत्त्या तद्दोषापत्ति-रतोऽव्यवधान निवेशः। एवं दोषविषयकलौकिकनिश्चयाव्यवहित पूर्व्वमनुमित्युत्पत्त्या तद्दोषः स्यादत उत्तरेति। तत्सामानाधिकर-ण्यमनुमितौ निवेश्यमत एकस्य वाधनिश्चयानन्तरमन्यस्यानु-मितावपि न क्षतिः। वाधादिनिश्चयानन्तरं पक्षतावच्छेदका-वच्छिन्ने साध्यादिप्रकारकस्याहार्य्यस्य लौकिकस्य च प्रत्यक्षस्य उत्पत्त्या ज्ञानसामान्यमुपेक्ष्यानुमितिसामान्यनिवेशः। यत् पक्षक यत्साध्यकयद्धेतुकस्थले यादृशदोषविषयकनिश्चया-नन्तरं कस्याप्यनुमितिर्न जाता तत्र तादृशानुमितेरप्रसिद्ध्या ऽव्याप्तिरतोऽनुमितिस्थलेऽनाहार्य्यदोषविशेषाजन्य ज्ञानं निवेश्य कल्पान्तरमाहानाहार्य्येति। तथाच यत्र तादृशानुमित्यप्रसि-द्धिस्तत्र तथा विधमानसोपनीतभानादिकमादायैव लक्षणं सङ्ग-

मनीय मिति भावः। बाधादि निश्चयानन्तरं आहार्य्य साध्यादिप्रकारकप्रत्यक्षोत्पत्त्याऽसम्भवोऽव्याप्तिर्व्वेत्यत आहानाहार्य्येति। शङ्खो न पीत इत्यादिनिश्चयानन्तरं शङ्खादौ पीतत्वादिप्रकारकस्य दोषविशेषजन्यचाक्षुषादेरुत्पत्त्या शङ्खःपीतः शङ्खत्वादित्यादिस्थलीयबाधादावव्याप्तिरतोमानसेति। मानसपदं दोषविशेषाजन्यज्ञानपरं, तेन नाहं गौर इत्यादिनिश्चयानन्तरं मिथ्याज्ञानजन्यवासनादिरूपदोषविशेषजन्यात्मविशेष्यकगौरत्वादिप्रकारकमानसज्ञानस्योत्पत्तावपि अहं गौरआत्मत्वादित्यादिस्थलीयबाधादौ नाव्याप्तिः। एतेन यादृशपक्षसाध्यहेतुक स्थले यद्विषयकनिश्चयानन्तरं विरोधिसामग्र्यादिवशेन मानस ज्ञानं कदापि न जातं तत्राव्याप्ति रित्यपि निरस्तं। तत्राप्यनुमिति शाब्दबोधादिकमादाय लक्षणगमनसम्भवात्। पक्षतावच्छेदकेत्यादिदलद्वयनिवेशस्य व्यावृत्तिः पूर्व्वोक्तरीत्या बोध्या। विरोधिविषयिताप्रयुक्तत्वनिवेशप्रयोजनं स्वयमेवाग्रे वक्ष्यति। यत्र विषयविशेषे समूहालम्बनज्ञानं न कस्यापि जातं तत्र पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वविशिष्टसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहित्वाभावरूपविशिष्टाभावाप्रसिद्ध्या ऽव्याप्तिरतोविशिष्टाभावमुपेक्ष्योभयाभावनिवेशः कृतः। तादृशोभयाभावप्रयोजकविरोधिविषयितावत्त्वं यद्रूपविशिष्ट विषयकत्वव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्य सम्यक्त्वेऽपि यथासन्निवेशे न वैयर्थ्यं। ननुकाञ्चनमयः पर्व्वतोवह्निमानित्यादौ पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्ध्या विशिष्टपक्षे विशिष्टसाध्यादिवैशिष्ट्या-

वगाहित्वाद्यप्रसिद्धिरित्याश्रयासिद्ध्यादावव्याप्तिरित्यत आह ।

पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकं न तु वास्तविकं ग्राह्यं । व्याप्तिश्चान्वयतो व्यतिरेकतश्च ग्राह्या, तादृशावगाहित्व प्रसिद्धिराहार्य्यज्ञान एवाभ्युपेतव्या अनन्यगतिकत्वात् ।

पक्षतावच्छेदकेति । आदिपदात् साध्यतावच्छेदकवैशिष्ट्यादिपरिग्रहः । वैज्ञानिकमिति तत्तत्प्रकारेणज्ञायमानत्वरूपमित्यर्थः, तथा च पर्व्वतादेः काञ्चनमयत्वादिवैशिष्ट्यस्य वास्तविकस्य विरहेऽपि तेन रूपेण ज्ञायमानत्वमादाय लक्षणसमन्वय इति भावः । नच ह्रदो न वह्निमानित्यादिनिश्चयानन्तरं जायमाने ह्रदोद्रव्यं जलमयोवह्निमानित्याद्याकारक समूहालम्बने ह्रदत्वादिना ज्ञायमाने वह्न्यादिवैशिष्ट्यावगाहित्वसत्वादसम्भव इति वाच्यं । पक्षतावच्छेदकावच्छिन्ना या पक्षनिष्ठविशेष्यता तन्निरूपिता या साध्यतावच्छेदकावच्छिन्ना साध्यप्रकारता याच साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितव्याप्यत्वप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारता तत्प्रतियोगित्वयोरवगाहित्वान्तद्द्वयेन विवक्षणात् विशिष्टविषयाप्रसिद्धावपि पर्व्वताद्यंशे काञ्चनमयत्वाद्यवगाहिभ्रमविषयताया व्यधिकरणकाञ्चनमयत्वाद्यवच्छिन्नायाः प्रसिद्ध्या लक्षणसमन्वयात् । व्याप्तिप्रकारतास्थलेच निरूप्यनिरूपकभावापन्ना व्याप्तिघटक-

तत्तत्पदार्थप्रकारता निवेशनीयाः। तेन धूमवान्वह्नेरित्यादौ वह्निव्यापकधूमसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धावपि न क्षतिः। नन्वत्र व्याप्तिपदेनान्वयव्याप्तिर्विवक्ष्यते तदा व्यतिरेकव्याप्ति ज्ञानविरोधिनि हेत्वादिनिष्ठाभावाप्रतियोगित्वादिरूपानुपसंहारित्वेऽव्याप्तिस्तज्ज्ञानस्यान्वयव्याप्तिज्ञानाविरोधित्वात्। व्यतिरेक व्याप्तिविवक्षणे च हेतुनिष्ठसाध्याभाववद्वृत्तित्व साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादावव्याप्तिः, तज्ज्ञानस्य ग्राह्याभावाद्यनवगाहितया व्यतिरेकव्याप्ति ज्ञानविरोधित्वे मानाभावादत आह व्याप्तिश्चेति। अन्वयत अन्वयनिरूपिता प्रकृतहेतुनिष्ठा साध्यनिरूपितेति यावत्। साचात्यन्ताभावान्योन्याभावभेदेन भिन्ना अव्यभिचरितत्वहेतुव्यापक साध्यसामानाधिकरण्यरूपा नानाविधैव ग्राह्या अतोऽत्यन्ताभावादिगर्भव्याप्तिज्ञाने अन्योन्याभावादिगर्भव्यभिचारज्ञानस्य व्यापकत्वादिज्ञाने साध्याभाववद्वृत्तिहेत्वादिज्ञानस्य ग्राह्याभावाद्यनवगाहितया अविरोधित्वेऽपि न क्षतिः। व्यतिरेकतः व्यतिरेकनिरूपिता साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा ग्राह्या व्याप्तिपदेन विवक्षणीया, तथा च तत्तद्व्याप्ति प्रकारता निरूपितहेतुतावच्छेदकावच्छिन्नप्रकारता प्रतियोगित्व कूटाभावोनिवेशनीय इति भावः। ननु निर्व्वह्निः पर्व्वतो वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमिति तत्र कथं लक्षणसमन्वय इत्यत आह तादृशावगाहित्वप्रसिद्धिरिति, आहार्य्यज्ञान

वर्त्तते। निर्व्वह्नित्वविशिष्टपर्व्वते वह्निप्रत्यक्षं जायतामित्याकारकेच्छाजन्य प्रत्यक्ष एवेत्यर्थः ।

एवञ्च वस्तुमात्र निश्चयानन्तरं निर्व्वह्नित्वविशिष्टे वह्नेरग्रहेऽपि न क्षतिस्तस्य विरोध्यविषयकत्वात्। एवं साध्यनिश्चयोत्तरं तस्यानुमितावपि, मानसज्ञानाविरोधित्वात् ।

विरोधिविषयिताप्रयुक्तत्वनिवेशनप्रयोजनमाह एवञ्चेति । विरोधिविषयिताप्रयुक्तत्व निवेशेचेत्यर्थः, न क्षतिः न निर्व्वह्निः पर्व्वतो वह्निमानित्यादौ घटादावतिव्याप्तिस्तस्य घटादिनिश्चयस्य विरोध्यविषयकत्वात् स्वानन्तरोत्पन्नानुमितिसामान्यनिष्ठतादृशोभयाभावप्रयोजक विरोधिविषयिताकत्वविरहात् । वह्निमत् पर्व्वतादि विषयक समूहालम्बनात्मक घटादि निश्चयानन्तरजातज्ञाननिष्ठतादृशोभया भाववत्त्वस्य तज्ज्ञानीय विरोधि विषयिता प्रयुक्तत्वेऽपि घटादि निश्चयाव्यवहितोत्तरानुमितिसामान्यान्तर्गतसमूहालम्बनात्मकघटादिनिश्चयाव्यवहितोत्तरानुमिते र्व्विरोधिविषयिता प्रयुक्तोभयाभाववत्त्वविरहान्नातिव्याप्तिरिति भावः। प्रयोज्य प्रयोजकभावश्चानुभवसिद्धः स्वरूपसम्बन्धविशेषः। विरोधिपदप्रयोजनमाह एवमिति । अननुमितावपीति । न क्षतिः तस्य विरोध्यविषयकत्वादित्यनुषज्यते। न क्षति न साध्यवत् पक्षेऽतिव्याप्तिः । विरोधिविषयितापदेन तादृशोभयाभावप्रति-

योगितावच्छेदककोटौ यद्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपित तद्रूपावच्छिन्नाभावतद्व्याप्यान्यतर विषयितायाः साध्यविशिष्ट पक्षविषयतान्य विषयताया वा विवक्षितत्वादिति भावः। नच सिषाधयिषाधीनायां साध्यनिश्चयानन्तरं समूहालम्बनानुमितौ तादृशोभयाभावासत्वात् सिद्धिविषयेऽतिप्रसङ्ग एव नास्ति। एवं पक्षे साध्यनिश्चयान्तरं तदतिरिक्ताविषयक साध्यविषयकानुमितेरनुत्पादेऽपि पक्षांशे साध्यांशे वाऽधिकावगाहिन्यां अनुमितेः साध्यधर्म्मितावच्छेदककान्यविधेयकानुमितेः साध्यावच्छिन्नपक्षविधेयकानुमितेश्चोत्पत्त्या तत्रोभयाभावासत्त्वादपि नातिप्रसक्तिरिति वाच्यं। यत्र विषयविशेषे सिषाधयिषा बलात् सिद्ध्युत्तरं तादृशानुमितिः कदापि न जाता तत्रैवाति व्याप्तिसम्भवात्। द्वितीय कल्पे विषयितामात्रं निवेश्यं नतु विरोधिविषयितापर्य्यन्तमित्याशयेनाह मानसज्ञान इति साध्यनिश्चयस्येत्यादिः॥ क्रोड़पत्रमिदं।

प्रमेयत्वविशिष्टव्यभिचारादि वारणाय यथा श्रुत विशिष्टान्तराघटितत्वनिवेशे उपदर्शित व्यभिचारघटित बाधाद्य व्याप्तेः विशिष्टान्तरविषयित्वाप्रयोज्यत्वविषयिताप्रयोज्य तादृशोभयाभाव-प्रयोजकाभावाधिकरणताकत्वरूपं तादृशविशेषणं निवेशनीयं। प्रमेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्याया उभयाभाव-प्रयोजकव्याप्त्याद्यवगाहित्वाभाववत्तायाः शुद्ध व्यभिचारादिविषयिताप्रयोज्यत्वनियमेन प्रमेयत्वविशिष्ट व्यभिचारादौ न विशिष्टा-

न्तरविषयित्वाप्रयोज्यत्वविषयिता प्रयोज्य निरुक्तोभयाभावप्रयोजकाभावाधिकरणताकत्वमिति नातिप्रसङ्गः। उपदर्शितव्यभिचारादिघटितबाधादि विषयिताप्रयोज्यायाः पक्षे साध्यावगाहित्वाद्यभावाधिकरणतायास्तद्घटकव्यभिचारादिविषयित्वाप्रयोज्यतया तत्संग्रहः। नच विशिष्टपक्षे विशिष्टसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदिकाया स्तादृशबाधादिविषयतान्तःपातिव्यभिचारादिविषयितायाः अपि तादृशबाधादिविषयिताप्रयोज्यायां विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्याद्यवगाहित्वाभावाधिकरणतायां प्रयोजकतया तादृश बाधादे र्दुःसंग्रह इति वाच्यं। यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यतानिवेशेन तत्संग्रहसम्भवात् व्यभिचारादिविषयतायाबाधविषयतान्तःपातिविषयतामात्रवृत्तिरूपेणैव उपदर्शितसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदकतया तेनैव रूपेण तादृश साध्यावगाहिताविरहवत्ता प्रयोजकत्वात्तादृशस्य च रूपस्य बाधादिविषयतानन्तःपातिव्यभिचारादिविषयतासाधारणव्यभिचारादि रूपविशिष्टविषयतात्वाव्यापकत्वात्तद्व्यापकरूपावच्छिन्नाप्रयोज्यत्वस्य उक्तबाधादिविषयिताप्रयुक्तसाध्यावगाहित्वाभाववत्तायामक्षतत्वात्। मेयत्वविशिष्टव्यभिचारादि विषयताया येन रूपेण व्याप्त्यादिग्रहप्रतिबन्धकतावच्छेदकता तद्रूपेण निरुक्तविषयतात्वव्यापकेन मेयत्वविशिष्टव्यभिचारादि विषयतान्तःपातिव्यभिचारादिविषयतात्वेन मेयत्वविशिष्ट व्यभिचारादि विषयताप्रयोज्यव्याप्त्याद्यवगाहित्वाभाववत्तायां नियमतः प्रयोजकत्वान्नातिप्रसङ्गावकाशः। बाधसत्-

प्रतिपक्षादिविषयकज्ञानस्य नानाविधबाधविषयकज्ञानस्य वानन्तरं जायमानायामनुमितौ या बाधादिविषयताप्रयोज्याभावाधिकरणता तस्या विशिष्टान्तरविषयिताप्रयोज्यत्वेऽपि स्वपूर्व्ववर्त्तिज्ञानीयविरोधिविषयताया एव स्वनिष्ठप्रतिबध्यतावच्छेदकधर्म्माभावाधिकरणताप्रयोजकत्वात्तन्नैकविध बाधादिज्ञानानन्तरजातज्ञाने या तत्तद्बाधादि—विषयिता—प्रयोज्यावगाहित्वाभावाधिकरणता तस्या विशिष्टान्तरविषयित्वाप्रयोज्यतया बाधादौ लक्षणसमन्वयः। व्यभिचारघटितबाधादि विषयिताप्रयोज्यायां दीधितिकारोक्तोभयाभावाधिकरणतायां व्याप्त्याद्यवगाहिताविरहप्रयोज्यत्वेन यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नबाधादिविषयतान्तःपाति व्यभिचारादिविषयिताप्रयोज्यत्वनियमात्तत् संग्रहाय तादृशोभयाभाव—प्रयोजकाभावाधिकरणतापर्य्यन्तनिवेशः। तथा सति दर्शितोभयाभावाधिकरणताया उक्तरूपावच्छिन्नव्यभिचारादि विषयित्वप्रयोज्यत्वनियमेऽपि तादृशोभयाभावप्रयोजक साध्यादिमत्तावगाहित्वाभावाधिकरणताया उक्त रूपावच्छिन्नव्यभिचारादिविषयत्वाप्रयोज्यत्वेन तादृशबाधादेः संग्रहः। बाधादिविषयिताप्रयोज्यस्य साध्यादिमत्तावगाहिताविरहस्य सत्प्रतिपक्षादिरूपविशिष्टान्तरविषयताप्रयोज्यत्व नियमादसम्भवः स्यादित्युभयाभावप्रयोजकाभावे विशिष्टान्तरविषयत्वाप्रयोज्यत्वमनिवेश्य तादृशाभावाधिकरणतायां तन्निवेशः। तथा सति अधिकरणताया अधिकरणभेदेन भिन्नतया पूर्व्ववर्त्तिनिष्ठप्रतिबन्धकतावच्छेदकधर्म्म एव तदुक्त-

रोत्पन्न निष्ठप्रतिबध्यतावच्छेदकधर्म्माभावाधिकरणताप्रयोजकत्वे-नैव बाधादिनिश्चयानन्तरोत्पन्नानुमितिनिष्ठसाध्यादिमत्त्वावगाहित्वाभावाधिकरणतायाः सत्प्रतिपचान्यादृशबाधादि विषयताया अप्रयोजकत्वेन सामञ्जस्यात् । एतत्पर्य्यन्तं क्रोड़ं ॥

अथैतादृशोभयाभाववत्त्वघटितलक्षणकरणेऽपि केवल निर्व्व-ह्नित्वादिपक्षतावच्छेदकवह्न्यादि साध्यकस्थलीयनिर्व्वह्निनिष्ठव-ह्न्यभावादिरूपबाधादिरूपदोषेऽव्याप्तिस्तादृशबाधादिरूपदोषज्ञान-स्याप्रतिबन्धकतया तदीयविषयतायाः प्रतिबन्धकतानवच्छेदक-तया तथाविधोभयाभावाप्रयोजकत्वात् तस्य दोषत्वानुपगमे तत्र हेतोर्दुष्टत्वव्यवहारानुपपत्तेः इष्टापत्तौ निर्व्वह्निः पर्व्वतोवह्निमा-नित्यादावपि तत्सम्भवेन एतादृशप्रयासवैफल्यात् । नच तत्र अभा-ववान् वह्निमानित्यनाहार्य्यज्ञानस्य प्रसिद्ध्या तत्प्रतिबन्धकी-भूताभाववान् निर्व्वह्निरित्यादिज्ञानविषय एव दोष इति वाच्यं । अभाववत्त्वसामानाधिकरण्येन निर्व्वह्नित्वग्रहस्य तादृशवह्नि-मत्त्वग्रहाविरोधित्वात् अभाववत्त्वावच्छेदेन वह्न्यादिमत्ता-ग्रहविरोधित्वेऽपि तादृशवह्न्यादिमत्तावगाहित्वस्य वह्न्यभावादि मत्त्वरूपपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वाव्याप-कतया तदवच्छिन्ननिरूपितप्रतिबन्धकतावच्छेदक विषयिता या स्तथाविधोभयाभावाप्रयोजकत्वात् तद्विषयस्य दोषत्वानु-पपत्तेः । अभाववत्त्वावच्छेदेन निर्व्वह्नित्वग्रहस्य भ्रमरूपतया तद्विषयविशिष्टस्याप्रसिद्धेः । एवं वह्निमान्निर्व्वह्निरित्यादि स्थली-यदोषे नितरामव्याप्तिर्व्वह्निमद्विष्ठवह्निमत्त्वादेरेव तत्र दोषत्व

सम्भवात् तद्विषयकस्य ज्ञानस्य क्वचिदपि प्रतिबन्धकत्वायोगात्। एवं यत्र निर्व्वह्निः पर्व्वतो वह्निमानित्यादौ पर्व्वतत्वादि सामानाधिकरण्येन वह्न्यभावादिमत्त्वस्य पक्षतावच्छेदकघटकता तत्र पर्व्वतत्वसामानाधिकरण्येन वह्न्यादिमत्त्वं न दोषः विशिष्टपक्षग्रहाद्यविरोधित्वेनाश्रयासिद्ध्यादिरूपत्वानुपपत्तेः। उक्तरीत्यैतल्लक्षणानाक्रान्तत्वाच्च। पर्व्वतत्वाद्यवच्छेदेन वह्न्यादिमत्त्वञ्चाप्रसिद्धं वह्निशून्यपर्व्वतादेरपि सत्वात्। नापि पर्व्वतत्वादिसामानाधिकरण्येन निर्व्वह्निपर्व्वतत्वाद्यवच्छेदेन वा वह्न्यभावादिमत्त्वरूपबाधादि दोषः तज्ज्ञानस्य पक्षतावच्छेदक विशिष्टे साध्यवैशिष्ट्यावगाहित्वव्यापकविषयताघटितधर्म्मावच्छिन्नाप्रतिबन्धकतया तत्र लक्षणगमनायोगात्। नापि पर्व्वतत्वावच्छेदेन वह्न्यभावादिमत्त्वं, अप्रसिद्धत्वादिति तत्र को दोषः। यत्तु प्रयुक्तत्वं व्यापकत्वं यद्विषयकनिश्चयनिष्ठविरोधि विषयिताया उभयाभावव्याप्यत्वञ्च, स्वाश्रयतादृशनिश्चया व्यवहितोत्तरानुमितित्वसम्बन्धेन तादृशसम्बन्धलाभायैवतदुत्तरमनुमिताविल्युक्तं। एवञ्च विरोधिविषयकयद्विषयक निश्चयाव्यवहितोत्तरानुमितित्वव्यापक स्वादृशोभयाभावस्तत्त्वं। इति पर्य्यवसितं। एवञ्च निर्व्वह्निःपर्व्वतोवह्निमानित्यादिस्थलीयबाधादि विषयितायां स्वरूपसम्बन्धरूपोभयाभावप्रयोजकत्वासम्भवेऽपि उभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छिन्नविशेष्यक तद्रूपावच्छिन्नाभावतद्व्याप्यान्यतरप्रकारकत्वस्यैव विरोधिविष-

यत्वार्थकतया तत्र लक्षणं सुसमन्वयमेव ताहृशप्रयोजकत्वस्यानिवेशात् । नचैवं वस्तुमात्रेऽतिव्याप्ति र्दुर्वारैव ताहृशोभयाभावस्य विरोधिविषयकसमूहालम्बनरूपघटादिविषयक निश्चयाव्यवहितोत्तरानुमितित्वव्यापकताया अक्षतत्वादिति वाच्यं । विरोधिविषयितानतिरिक्तवृत्तिर्यद्विषयिता तच्छालिनिश्चयस्य निश्चयान्तेन विवक्षणाद् घटादि विषयिताया स्तत्र निरुक्तविरोधिविषयितानतिरिक्तवृत्तित्वविरहात् । नचैवं विरोधि विषयितानतिरिक्तवृत्तिर्यदीयविषयिता तत्त्वमित्येतावतैव सामञ्जस्ये शेषवैयर्थ्यमिति वाच्यं । यत्र पर्व्वतत्वादिसामानाधिकरण्येन वह्न्यादेः साध्यता तत्र पर्व्वतत्वादि सामानाधिकरण्येन वह्न्यभावादिमत्त्वविषयिताया निरुक्तविरोधिविषयितानतिरिक्तवृत्तितया तत्रातिव्याप्तिवारकतया शेषसार्थक्यात् । तदुपादाने ताहृशवह्न्यभावादिमत्त्वविषयकनिश्चयानन्तरं पर्व्वतत्वादि सामानाधिकरण्येन वह्न्याद्यनुमित्युत्पत्त्या ताहृशानुमितौ तथाविधोभयसत्त्वेनातिव्याप्त्यनवकाशादिति तत्तुच्छं । निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ यत्र पर्व्वतत्वादिसामानाधिकरण्येन वह्न्यभावादेः पक्षतावच्छेदकता तत्र पर्व्वतत्वसामानाधिकरण्येन वह्न्यादिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वादाश्रयासिद्ध्यात्मकस्य हेत्वाभासान्तरताभयेनासम्भवलक्षणभावस्य निरुक्तविरोधिविषयितानतिरिक्तवृत्तिविषयिताकतयाऽतिव्याप्तेः ताहृशोभयाभाव प्रतियोगितावच्छेदकगर्भे यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यं निविशते तद्रूपावच्छिन्नविशेष्य-

कतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्न प्रति-बध्यतानिरूपितप्रतिवन्धकतावच्छेदकत्वरूपविरोधित्वस्य विष-यितायां निवेशेतु शेषवैयर्थ्यं उक्तरीत्या निर्व्वह्निर्व्वह्निमानि-त्यादि स्थलीयदोषे ऽव्याप्तिश्च। यत्तु पक्षतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयितैव विरोधि-विषयितापदार्थः तथाच यन्निरूपिततादृशविषयिताशालि निश्च-योत्तरानुमितित्व व्यापकोभयाभावस्तत्त्वमिति समुदितार्थः। निश्चयत्वञ्च विशेषणविशेष्यतावच्छेदकभावानापन्नविरोधिकोटि-द्वयप्रकारकैकधर्म्मिविशेष्यकज्ञानान्य ज्ञानत्वं। कोटिद्वये विशे-षणविशेष्यतावच्छेदकभावानापन्नत्वनिवेशात् निर्व्वह्निः पर्व्वतो-वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यादिवैशिष्ट्यग्रहस्य एकत्र विरोधिद्वयप्रकारकत्वनियमेऽपि न तादृशवैशिष्ट्यावगा-हिनिश्चयाप्रसिद्धिः। यदीयविषयिता, तादृशनिश्चयावृत्तिस्तत्त्वमित्ये-तावति कृते ह्रदोवह्निव्याप्यधूमवानित्यादौ ह्रदादिनिष्ठवह्न्यभावा-दिमत्त्वे ऽतिव्याप्तिर्व्वह्न्यादिव्याप्यवत्तानिश्चयस्यापि वह्न्यादिनिश्चय-वत् कार्य्यसहभावेन वह्न्यभावादिग्रहविरोधित्वाद् वह्न्यभावादि मत्त्वविषयितायाः स्वादृशनिश्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति। तदपि न वह्निव्याप्यवान् वह्निव्याप्यव्याप्यवांश्च ह्रदोवह्न्यभाववा-नित्येतादृशाहार्य्यज्ञानोपगमेन वह्न्यभावादिमत्त्वविषयितायाः वह्निव्याप्यादिमत्त्वनिश्चयवृत्तितया उक्तातिव्याप्त्यनवकाशेन शेष-सार्थक्यानुपपत्तेः। वह्निमान्वह्निव्याप्यवांश्च ह्रदोवह्न्यभाववानि-त्येतादृशाहार्य्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदोवह्निमानित्यादि-

स्थलीयबाधादिविषयितायाः सत्त्वेनासम्भवप्रसङ्गाच्च । वह्न्यादि-रूपधर्म्मितावच्छेदकानवच्छिन्नवह्न्यभावादिविशेषित ह्रदादि-निरूपितविषयितायाः साध्यादिनिश्चयावृत्तित्वेऽपि घटादि-निरूपिताया अपि दोषविशेषावच्छिन्नायाविषयितायाः साध्यादि-निश्चयावृत्तितया घटादावुदासीनेऽतिव्याप्तिवारणाय यादृश-विशिष्टविषयितासामान्यं तादृशनिश्चयावृत्ति तादृशविशिष्टनिरू-पितविषयिताया एव विरोधिविषयितात्वेनेन विवक्षणीयतया अप्रतीकारात् । अन्यमान्यवृत्तियदीयविषयितासामान्यं तादृश-निश्चयावृत्ति तदीयविषयिताविवक्षणेन निर्व्वाहेऽपि विरोधियद्वि-षयिताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयो र्व्यतिरेक इत्य-भिभाय यद्विषयकनिश्चयस्येत्यादि वक्राभिधानस्य ग्रन्थका-रीयरीतिविरुद्धत्वात् । एतेन विषयिताया उभयाभावप्रयो-जकत्व तादृशोभयाभावप्रतियोगितावच्छेदकं यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वघटितं तद्रूपावच्छिन्न विशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वे-नानाहार्य्यलौकिकसन्निकर्षाद्यजन्यज्ञानत्वेन वा अवच्छिन्ना या प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदकत्वं । एवञ्च यादृश-विशिष्टविषयिता, निरुक्ततथाविधोभयाभावप्रयोजकताश्रयस्तादृश-त्वमेव लक्षणं । विषयितादौ विरोधित्वादिकथनन्तु स्वरूपा-ख्यानमात्रमेव इति प्रलपित मप्यनादेयमेव । निर्व्वह्निर्व्वह्नि-मानित्यादिस्थलीयदोषस्य उक्तयुक्त्या दुःसंग्रहात् । अत केचित कश्चिदित्यन्ताग्रिमकल्प इवात्रापि कल्पे न दीधितिकृतानि-

कतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्न प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वरूपविरोधित्वस्य विषयितायां निवेशेतु शेषवैयर्थ्यं उक्तरीत्या निर्व्वह्निर्व्वह्निमानित्यादि स्थलीयदोषे ऽव्याप्तिश्च। यत्तु पक्षतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयितैव विरोधिविषयितापदार्थः तथाच यन्निरूपिततादृशविषयिताशालि निश्चयोत्तरानुमितित्व व्यापकोभयाभावस्तत्त्वमिति समुदितार्थः। निश्चयत्वञ्च विशेषणविशेष्यतावच्छेदकभावानापन्नविरोधिकोटिद्वयप्रकारकैकधर्म्मिविशेष्यकज्ञानान्य ज्ञानत्वं। कोटिद्वये विशेषणविशेष्यतावच्छेदकभावानापन्नत्वनिवेशात् निर्व्वह्निः पर्व्वतो-वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यादिवैशिष्ट्यग्रहस्य एकत्र विरोधिद्वयप्रकारकत्वनियमेऽपि न तादृशवैशिष्ट्यावगाहिनिश्चयाप्रसिद्धिः। यदीयविषयिता, तादृशनिश्चयावृत्तिस्तत्त्वमित्येतावति कृते ह्रदोवह्निव्याप्यधूमवानित्यादौ ह्रदादिनिष्ठवह्न्यभावादिमत्त्वे ऽतिव्याप्तिर्व्वह्न्यादिव्याप्यवत्तानिश्चयस्यापि वह्न्यादिनिश्चयवत् कार्य्यसहभावेन वह्न्यभावादिग्रहविरोधित्वाद् वह्न्यभावादिमत्त्वविषयिताया स्तादृशनिश्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति। तदपि न वह्निव्याप्यवान् वह्निव्याप्यव्याप्यवांश्च ह्रदोवह्न्यभाववानित्येतादृशाहार्य्यज्ञानोपगमेन वह्न्यभावादिमत्त्वविषयिताया वह्निव्याप्यादिमत्त्वनिश्चयवृत्तितया उक्तातिव्याप्त्यनवकाशेन शेषसार्थक्यानुपपत्तेः। वह्निमान्वह्निव्याप्यवांश्च ह्रदोवह्न्यभाववानित्येतादृशाहार्य्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदोवह्निमानित्यादि-

स्खलीयबाधादिविषयितायाः सत्त्वेनासम्भवप्रसङ्गाच्च । वक्त्यादि-रूपधर्म्मितावच्छेदकानवच्छिन्नवक्न्यभावादिविशेषित ह्रदादि-निरूपितविषयितायाः साध्यादिनिश्चयावृत्तित्वेऽपि घटादि-निरूपिताया अपि दोषविशेषावच्छिन्नाया विषयितायाः साध्यादि-निश्चयावृत्तितया घटादावुदासीनेऽतिव्याप्तिवारणाय यादृश-विशिष्टविशयितासामान्यं तादृशनिश्चयावृत्ति तादृशविशिष्टनिरू-पितविषयिताया एव विरोधिविषयितात्वेनेन विवक्षणीयतया अप्रतीकारात् । असामान्यवृत्तियदीयविषयितासामान्यं तादृश-निश्चयावृत्ति तदीयविषयिताविवक्षणेन निर्व्वाहेऽपि विरोधियद्वि-षयिताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयो र्व्यतिरेक इत्य-भिप्राय यद्विषयकनिश्चयस्येत्यादि वक्त्राभिधानस्य ग्रन्थका-रीयरीतिविरुद्धत्वात् । एतेन विषयिताया उभयाभावप्रयो-जकत्व तादृशोभयाभावप्रतियोगितावच्छेदकं यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वघटितं तद्रूपावच्छिन्न विशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वे-नानाहार्य्यलौकिकसन्निकर्षाजन्यज्ञानत्वेन वा अवच्छिन्ना या प्रतिवध्यता तन्निरूपितप्रतिवन्धकतावच्छेदकत्वं । एवञ्च यादृश-विशिष्टविषयिता, निरुक्ततथाविधोभयाभावप्रयोजकताश्रयस्तादृश-त्वमेव लक्षणं । विषयितादौ विरोधित्वादिकथनन्तु स्वरूपा-ख्यानमात्रमेव इति प्रलपित मप्यनादेयमेव । निर्व्वह्निर्व्वह्नि-मानित्यादिस्खलीयदोषस्य उक्तयुक्त्या दुःसंग्रहात् । अत केचित् कश्चिदित्यन्तायिमकल्प इवात्रापि कल्पे न दीधितिकृतानि-

भंरः निर्व्वह्निर्व्वह्निमानित्यादिस्थलीयदोषासंग्रहेणास्वरसस्य । ग्रिम-कल्पे कश्चिदित्यनेनैवात्रापि कल्पे वदन्तीत्यनेन सूचितत्वात् । निर्भरस्तु केचिदित्यादिकल्पएव अतएव तत्रप्रकर्षबोधनायप्राहुरित्युक्तमिति । परेतुघटाभावादिधर्म्मितावच्छेदकवह्न्यादिमत्वज्ञानस्यति तद्धर्म्मधर्म्मितावच्छेदकवह्न्यभावादिमत्वज्ञानप्रतिबन्धकत्वेकल्पनीये धर्म्मितावच्छेदकभेदेनानन्तं तदकल्पनप्रयुक्तलाघवानुरोधेन धर्म्मितावच्छेदकमनिवेश्यानाहार्य्यवह्न्यादिविशिष्टबुद्धित्ववह्न्यभावादि निश्चय त्वाभ्यां समानधर्म्मितावच्छेदकत्वप्रत्यासत्त्यैव प्रतिबध्य प्रतिबन्धक भावः कल्प्यते। एवञ्च तद्देशनिष्ठस्य पूर्व्ववर्त्तिप्रतिबन्धकज्ञान निरूपित प्रतिबन्धकतावच्छेदकसम्बन्धस्य उत्तरवर्त्तिज्ञाननिष्ठं प्रतिबध्यतावच्छेदकसम्बन्धेन तद्देशासम्बन्धित्वं प्रति प्रयोजकतया वह्न्यभावादिनिष्ठवह्न्यभावादि प्रकारकज्ञानीयधर्म्मितावच्छेदकताख्य विषयतायास्तदुत्तरोत्पन्नानाहार्य्यवह्न्यादि प्रकारकज्ञानस्य वह्न्यभावादिधर्म्मितावच्छेदकत्वविरहप्रयोजकत्वादुवह्न्यभावादिविशिष्टे वह्न्यादिवैशिष्ठ्यावगाहित्वविरहस्य वह्न्यभावादिधर्म्मितावच्छेदकताक वह्न्यभावादि प्रकारक निश्चयविषयिताप्रयुक्तत्व मक्षत मेवेति तादृशनिश्चयविषयस्य दोषत्वमव्याहतमेव । नच धर्म्मितावच्छेदकनिष्ठ प्रत्यासत्त्या विपरीत ज्ञानस्य प्रतिबन्धकत्वे निर्व्वह्निविशेष्यकवह्निज्ञानं जायतामित्याकारकेच्छाजन्यनिर्व्वह्निर्व्वह्निमान्घटाभाववांश्च वह्निमानित्याद्यांशिकाहार्य्यज्ञानस्य विपरीतज्ञान प्रतिबध्यतावच्छेदकानाक्रान्ततया घटाभाववान् वह्न्यभाववानित्यादि निश्चयकाले तथाविधेच्छासत्वे घटाभावविशिष्ट

विशेष्यकवह्निज्ञानं जायतामित्याकारकेच्छां विनैव तादृशज्ञानापत्तिरिति वाच्यं । यतः सामान्यतोवह्न्यादिज्ञानेच्छाविशिष्टान्यत्वरूपमनाहार्य्यत्वं न प्रतिबध्यतावच्छेदककोटौ निवेशनीयं किन्त्वाहार्य्यज्ञानोत्पत्त्यर्थं विशेष्यतानिष्ठं यत्स्वविषयतावच्छेदकत्वं तदवच्छेदकतावच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यादिज्ञानेच्छाविरहस्य या स्वाव्यवहितप्राक्क्षणावच्छिन्नाधिकरणता तद्विशिष्टधर्म्मितावच्छेदकताया एव प्रतिबध्यतावच्छेदकसम्बन्धत्वमुपेयते तादृशस्येच्छाविरहस्य प्रतिबन्धकविशेषणत्वमेव वा विशेषणताविशेष-धर्म्मितावच्छेदकतासम्बन्धघटितसामानाधिकरण्यसम्बन्धेनोपगन्तव्यं, उक्तस्थले च घटाभावादौ तादृशेच्छाविरहस्य सत्त्वान्नोक्तापत्तिरधिकमन्यत्रानुसन्धेयमिति वदन्ति ।

तादृशपक्षे तादृशसाध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहिनां ज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञानविरोधित्वं वा हेतुदोषत्वं, ज्ञानविरोधित्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वं । एवंविधैव रीतिरुत्तरत्र सर्व्वत्र सव्यभिचारलक्षणादावनुसर्त्तव्या इत्यपि केचित् ।

निर्व्वह्निः पर्व्वतोवह्निमानित्यादिस्थलीयदोषसाधारण्याय प्रकारान्तरेण लक्षणं वर्णयतां केषाञ्चिन्मतमाह, 'तादृशपक्ष-इति पक्षतावच्छेदकविशिष्टपक्ष इत्यर्थः, 'तादृशसाध्येति साध्य-तावच्छेदकविशिष्टसाध्येत्यर्थः, 'तादृशहेत्विति हेतुतावच्छेदक-विशिष्टहेत्वित्यर्थः, 'ज्ञानस्य विरोधिविषयकं यद्विषयकं ज्ञानमिति योजना, 'ज्ञानं' ज्ञानसामान्यं,तेन घटादिविषयकस्य यस्य कस्यचित् समूहालम्बनज्ञानस्य तादृशज्ञानविरोधिबाधादिविषयकत्वेऽपिनाति-प्रसङ्गः, स्वावच्छिन्नविषयकत्वव्यापकतादृशज्ञानविरोधिविषयिता-कधर्म्मवत्त्वमिति तु फलितार्थः, अत्र च विषयितानिष्ठं स्वरूपसम्ब-न्धात्मकतादृशज्ञानविषयविषयकग्रहप्रतिबन्धकतावच्छेदकतात्मक-तादृशज्ञानविरोधित्वमेव निवेशनीयं न तु विषयनिष्ठं निर्व्वाच्य-तादृशज्ञानविरोधित्वं, तस्यैव लक्षणत्वसम्भवेन शेषवैयर्थ्यप्रसङ्गात्, अत च विषयनिष्ठस्य निर्व्वाच्यतादृशज्ञानविरोधित्वस्यैव तद-पेक्षया लघुतया तदेवाह, 'तादृशज्ञानविरोधित्वं वेति, तादृशज्ञान-विरोधित्वं यदि तादृशज्ञानप्रतिबन्धकतावच्छेदकस्वावच्छिन्न-विषयिताकधर्म्मवत्त्वं तदा पूर्व्वनिरुक्तयथाश्रुतमूलार्थं एव पर्य्यवसानात् निर्व्वह्निः पर्व्वतोवह्निमानित्यादिस्थलीयदोषाव्याप्ति-तादवस्थ्यमिति तन्निर्व्वाहा, 'ज्ञानविरोधित्वस्यैति, 'तद्विषयविषयकें-ति, तथाच निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ तादृशज्ञानविरोधि-ज्ञानाप्रसिद्धावपि तद्विषयविषयकस्य निर्व्वह्निः पर्व्वत इतिज्ञानस्य प्रतिबन्धकं यद्वह्निमान् पर्व्वतइतिज्ञानं तद्विषयतामादायैव वह्निमत्त्वत्वादिरूपतत्स्वरूपीयाश्रयासिद्धादौ लक्षणसमन्वयः।

अथ घटवद्भूतलादिरूपोदासीनपदार्थविषयकसमूहालम्बनात्मकपक्षतावच्छेदकावच्छिन्नविशेष्यक--साध्यतावच्छेदकविशिष्टसाध्य-तद्व्याप्यहेतुप्रकारकज्ञानविषयविषयकघटवद्भूतलादिज्ञानप्रतिबन्धकज्ञानविषयघटाभाववद्भूतलादावतिव्याप्तिः । नच पक्षतावच्छेदकावच्छिन्नविशेष्यक-साध्यतावच्छेदकविशिष्टसाध्य-तन्निरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकग्रहत्वव्यापकविषयिताघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छिन्नविषयिताकधर्म्मवत्त्वनिवेशान्न दोषः घटवद्भूतलादिविषयितायास्तादृशग्रहत्वाव्यापकत्वादिति वाच्यं । यतः पर्व्वताद्यंशे वह्निमत्ताद्यनवगाहिनो निर्व्वह्निः पर्व्वत इतिज्ञानस्य या वह्निप्रकारकत्वाद्यनिरूपिता निर्व्वह्नित्वादिप्रकारितानिरूपितपर्व्वतादिविषयिता सैवानाहार्य्यत्वविशिष्टतया वह्निमान् पर्व्वतइत्यादिज्ञानप्रतिबध्यतावच्छेदिका तस्याश्च निर्व्वह्निः पर्व्वतोवह्निमानित्याहार्य्यज्ञानसाधारण्ये मानाभावात् आहार्य्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धेः विपरीतज्ञानाभावघटितायास्तादृशविषयिताप्रयोजकानाहार्य्यज्ञानसामग्र्याश्चाहार्य्यज्ञानाजनकत्वात् तादृशग्रहत्वव्यापिका च वह्निमत्त्वादिप्रकारितानिरूपिता तादृशपर्व्वतादिविषयिता सा च न प्रतिबध्यतावच्छेदिकेति निर्व्वह्नित्वादिप्रकारितानिरूपितपर्व्वतादिविषयितात्वेन* निर्व्वह्निः पर्व्वत इत्यादिज्ञानीयविषयितापि

* व्यापकतावच्छेदकधर्म्मप्रकारेणाव्यापकस्यापि व्यापकतास्वीकारात् ।

तथाविधग्रहत्वव्यापिकेतिचेत् तर्हि विषयितात्वादिना घटवद्भूतलादिविषयितानामपि तद्व्यापकतया उदासीनपदार्थवारणमशक्यं। मैवं, यद्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारकत्वत्वावच्छिन्नं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नविशेष्यक-तद्रूपावच्छिन्नप्रकारक-ग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्म्मवत्त्वस्य विवक्षणीयतया सर्व्वसामञ्जस्यादितिदिक्। अत्र चास्वरससूचनाय 'केचिदिति, स च उक्तयुक्त्या निर्व्वह्निर्वह्निमानित्यादिस्थलीयदोषासंग्रहेण। नच धर्म्मितावच्छेदकत्वप्रत्यासत्त्या वह्निप्रकारकज्ञानं प्रति वह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतामते निर्व्वह्निर्व्वह्निमानित्येतादृशज्ञानसमानविषयकानाहार्य्यवह्निमानित्याकारकज्ञानप्रतिबन्धकतामादाय लक्षणसमन्वयस्तत्रापि सम्भवतीति वाच्यं। तादृशमताश्रयणे पर्व्वतोवह्निमानित्यादौ वह्न्यभाववद्ध्रदादेर्दोषताप्रसङ्गात्*।

केचित्तु याद्दशपक्षक-याद्दशसाध्यक-याद्दशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वं, एक-

---

* न चात्र कल्पे तादृशग्रहत्वव्यापकं यद्रूपावच्छिन्नप्रकारकत्वत्वावच्छिन्न तादृशविषयिताघटितधर्म्मावच्छिन्नप्रतिबध्यतेत्यादि वक्तव्यं तथाच ह्रदो वह्निमानित्यादिज्ञानीयवह्निप्रकारितायाः पर्व्वतो वह्निमानित्यादिज्ञानीयवह्निप्रकारिताव्यापकतया तदघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका वह्न्यभावत्वावच्छिन्नप्रकारिता न तु वह्न्यभाववद्ध्रदत्वविषयिता इति कथं तत्रातिव्याप्तिरिति वाच्यं। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशात्।

मात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वं । स-चातिरिक्त एवान्योन्याभाव इति न वैयर्थ्यं । पञ्च-विधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण व्यभिचारादेः साध्यादिभेदनियन्त्रितत्वात् शब्दाभेदमात्रस्य चा-किञ्चित्करत्वादिति प्राहुः ।

'यादृशेति सर्व्वत्र यद्रूपावच्छिन्नार्थकं, 'तावदन्यान्यत्वमिति, अत्र च यादृशपक्ष-साध्य-हेतुकस्थले यादृशदोषज्ञानस्य प्रतिबध्य-ज्ञानं प्रसिध्यति यथा निर्व्वह्निः पर्व्वतोवह्निमान् धूमादित्यादौ वह्निविशिष्टपर्व्वतादिरूपाश्रयासिद्धि-धूमाभावविशिष्टनिर्व्वह्निरूप-स्वरूपासिद्ध्यादीनां ज्ञानस्य, तत्र तादृशदोषाणां ग्राह्याभाव-तद्व्याप्यरूपतद्घटकभेदेन विशेषण-विशेष्यभावभेदेन च भिन्नाना-मनुगतेन विशिष्टपक्षे विशिष्टसाधनवैशिष्ट्यग्रहविरोधित्वरूपा-सिद्धित्वादिनैव तादृशान्यान्यत्वघटकभेदप्रतियोगिविधया निवे-शोन तु वह्निविशिष्टपर्व्वतत्व-निर्धूमत्वविशिष्टनिर्व्वह्नित्वादिना, प्रयोजनविरहात्, यादृशदोषविषयकज्ञानस्य प्रतिबध्यज्ञानम-प्रसिद्धं यथा तत्स्थलीयस्य * निर्व्वह्निर्व्वह्निमानित्यादिस्थली-यस्य च बाधादेर्ज्ञानस्य, तादृशदोषाणामगत्या वह्न्यभावविशिष्ट-निर्व्वह्नित्व-वह्न्यभावव्याप्यविशिष्टनिर्व्वह्नित्व-निर्व्वह्निनिष्ठवह्न्यभाव-

---

* निर्व्वह्निः पर्व्वतोवह्निमानित्यादिस्थलीयस्येत्यर्थः ।

त्व-निर्व्वह्निनिष्ठवह्न्यभावव्याप्यत्वादिनाननुगतरूपेणैव निवेश-मत्र च विशिष्टभिन्नभिन्नत्वस्य शुद्धविशेष्यसाधारणतया सर्व्वमाकाशवदित्यादावाकाशाभावविशिष्टसर्व्वादिरूपबाधादि-मत्त्वस्याप्रसिद्धतया च तत्तद्विशिष्टनिरूपितविषयितान्यतमवि-षयितानिरूपकतावच्छेदकधर्म्मवत्त्वमेवाभिमतं। अयञ्च प्रकारः यादृशपक्ष-साध्य-हेतुकस्थले उक्तसमूहालम्बनानुमितेरप्रसिद्धिस्तत्रै-वादरणीयः। यत्र तु तत्प्रसिद्धिस्तत्र लाघवाद्यथाश्रुतमूललक्षणमेव साधीयः शब्दाभेदस्याकिञ्चित्करतायाः स्वयमेव वक्ष्यमाणत्वादि-त्यवधेयं। यत्राश्रयासिद्ध्यादिरेकविध एव दोषः प्रतिबध्यज्ञानञ्च प्रसिद्धं महानसत्ववान् पर्व्वतोवह्निमान्धूमादित्यादौ तत्र विशिष्टप-क्षग्रहविरोधित्वादिरूपाश्रयासिद्धित्वादेरेव दोषसामान्यलक्षणत्वमु-चितं न तु महानसत्वाद्यभावविशिष्टपर्व्वतत्वाद्यवच्छिन्नतादृशाभाव-व्याप्यविशिष्टपर्व्वतत्वाद्यवच्छिन्नभिन्नभिन्नत्वस्य निरुक्तसमूहालम्ब-नानुमितिविरोधित्वस्य च गौरवादित्याशयेनाह, 'एकमात्रदोष-स्थल इति एकविध एव यत्र दोषस्तद्विषयकज्ञानप्रतिबध्य-ज्ञानञ्च प्रसिद्धं तादृशस्थल इत्यर्थः, तेन ग्राह्याभाव-तद्व्याप्य-भेदेन विशेषण-विशेष्यभावभेदेन च सर्व्वत्र दोषाणां नानात्व-सम्भवादेकमात्रदोषस्थलस्याप्रसिद्धत्वेऽपि पर्व्वतान्यः पर्व्वतो-वह्निमान् धूमादित्यादावेकविधमात्रदोषस्थले ग्राह्याभाव-तद्व्या-

* वह्न्यभावविशिष्टह्रदादिभिन्नभिन्नत्वस्य ह्रदादिसाधारणतयेत्यर्थः विशिष्ट-स्यानतिरिक्तत्वात्।

ष्यरूपघटकादिभेदेन विभिन्नाश्रयासिद्ध्यादीनामनुगमकरूपाभावे-नान्यतमत्वस्य लक्षणताया आवश्यकत्वेऽपि न क्षतिः। 'तत्त्वं' तादृशत्वं निरुक्ताश्रयासिद्धित्वादिकमिति यावत् । इदमुपलक्षणं यत्र परामर्शविरोधिनो व्यभिचार-विरोधासिद्धयस्त्रयोदोषा न तु बाध-प्रतिरोधौ पर्व्वतोवह्निमान् ह्रदत्वादित्यादौ परामर्शविरोधित्वमेव सामान्यलक्षणं, यत्र च बाध-प्रतिरोधासिद्धयोदोषाः न तु व्यभिचार-विरोधौ ह्रदोवह्निमान् धूमात् काञ्चनमयह्रदोवह्निमान् धूमात् ह्रदः काञ्चनमयवह्निमान् धूमात् ह्रदोवह्निमान् काञ्चनमयधूमादित्यादौ च तत्र विशिष्टपक्षे विशिष्टसाध्यविशिष्टसाधनयोर्वैशिष्ट्यावगाहि यज्ज्ञानं तद्विरोधित्वमेव तथा, एवं यत्र व्यभिचारासिद्धी एव दोषौ काञ्चनमयः पर्व्वतो धूमवान् वह्नेरित्यादौ तत्र विशिष्टपक्षविषयक-व्याप्तिविशिष्टसाधनग्रहविरोधित्वादिकं तथेत्यपि बोध्यं । ननु तत्तद्धर्म्मावच्छिन्नभिन्नभिन्नत्वरूपलक्षणघटकतत्तद्धर्म्माणां भागासिद्धतया हेत्वाभाससामान्येतरभेदाननुमापकत्वेऽपि व्यभिचारावारकतया तदितरांशवैयर्थ्यं* इत्यत आह, 'स चेति, स चान्योन्याभावोऽतिरिक्त एवेति योजना। 'स च' तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकभेदकूटावच्छिन्नप्रतियोगिताकः, 'अतिरिक्तः' तत्तद्धर्म्मातिरिक्तः, तथाच धर्म्मिभेदान्न वैयर्थ्यं । तत्तद्धर्म्मावच्छिन्नभेदमात्रावच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगि-

---

* तत्तद्धर्म्मावच्छिन्नभिन्नभिन्नत्वरूपान्यतमत्वांशवैयर्थ्यमित्यर्थः ।

तावच्छेदकतत्तद्धर्मस्वरूपत्वेऽपि तादृशभेदकूटावच्छिन्नप्रतियोगितावाकभेदत्वस्य नानाधर्म्मेषु कल्पनापेक्षया तद्विशिष्टस्यैकस्य भेदस्य लाघवेन कल्पयितुं युक्तत्वादित्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेण, तत्तद्धर्मावच्छिन्ननिरूपितविषयितान्यतमविषयितानिरूपकतावच्छेदकधर्म्मवत्त्वस्य लक्षणत्वे चाधिकविकाशकतया विशेषणसार्थक्यमित्यवधेयं। ननु साध्यादिभेदेन लक्षणभेदे ह्रदोवह्निमान् धूमादित्यादिस्थलीयस्य लक्षणस्य पञ्चविधहेत्वाभाससाधारण्यासम्भवात्तादृशलक्षणाक्रान्तानां पञ्चविधत्वोक्त्यसङ्गतिरित्यत आह, 'पञ्चविधभेदोक्तिरिति पञ्चविधत्वोक्तिरित्यर्थः, 'तत्सम्भवस्थलेति यत्र पञ्चानामेव हेत्वाभासानां सम्भवः गौरश्वो घटत्वादित्यादौ तत्स्थलीयलक्षणाक्रान्तस्य पञ्चविधत्वाभिप्रायेणेत्यर्थः। ननु लक्षणाननुगमादितरभेदानुमाने भागासिद्धिरित्यत आह, 'व्यभिचारादेरिति, 'साध्यादिभेदनियन्त्रितत्वात्' साध्यादिभेदनियन्त्रितलक्ष्यतावच्छेदकत्वात्, तथाच लक्षणस्येव लक्ष्यतावच्छेदकस्याप्यननुगमान्न भागासिद्धिरिति भावः। नन्वेवमप्यनुगतोक्त्यसम्भवान्नायं प्रकारः साधीयानित्यत आह, 'शब्दाभेदस्येति। इदं पुनरिहावधेयं, तावदन्यान्यत्वं इतरभेदानुमापकमेव न तु दोषपदप्रवृत्तिनिमित्तं, तथा सति निर्व्वह्नित्वविशिष्टे वह्निसाधने धूमोदुष्टइत्यादौ दुष्टपदस्य वह्न्यभावविशिष्टनिर्व्वह्नित्वाद्यवच्छिन्नान्यतमवदर्थकतया निर्व्वह्नित्वविशिष्टे वह्निसाधने इत्यादेरनन्वितार्थकत्वप्रसङ्गादप्रसिद्ध्या तस्य हेत्वन्वयिनिर्व्वह्नित्वविशिष्टविशेष्यक-वह्न्यनुमितिप्रयोजकत्वार्थकत्वासम्भवात्, किन्तु अभावप्रयोजकत्व-

मान्यवृत्तिविषयितानिरूपकत्वमेव तथा, उक्तस्थले च प्रकारता प्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारता-चोभयमेव साधनपदार्थः, प्रकारतारूपपदार्थेऽपरपदार्थैक-देशव्याप्तिप्रकारतानिरूपकप्रकारतायाञ्च षष्ठ्यन्तवह्निपदप्रति-पाद्यस्य वह्निनिष्ठत्वस्य स्वरूपसम्बन्धेन, साधनपदार्थोक्तप्रका-ताद्वये च सप्तम्यन्तार्थस्य निर्व्वह्नित्वविशिष्टविशेष्यताया निरूपित-त्वसम्बन्धेनान्वयः, साधनपदोत्तरसप्तम्या निरूपकत्वं द्वित्वञ्चार्थः, निरूपकत्वे च निरुक्तसाधनपदार्थयोः पृथगन्वयः, तदन्वित-निरूपकत्वे च द्वित्वान्वयः, द्वित्वान्वितताद्दशनिरूपकत्वयोश्च दोषपदार्थघटकाभावेऽन्वयः, तथाच निर्व्वह्नित्वविशिष्टविशेष्य-तानिरूपितवह्निप्रकारतानिरूपकत्वस्य ताद्दशविशेष्यतानिरूपिता-यां वह्निप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्न-प्रकारता तन्निरूपकत्वस्य च द्वयोरभावप्रयोजकभ्रमान्यवृत्ति-विषयितानिरूपकत्वानित्येवान्वयबोधः। प्रतिबन्धकीभूतभ्रमविष-यितानिरूपकाभावादिमत्त्वमादाय पर्व्वते वह्निसाधने धूमोदुष्ट-इत्यादिप्रयोगवारणाय विषयितायां भ्रमान्यवृत्तित्वं निवेशितं। दोषघटके केवलसाध्याभावादौ दोषव्यवहाराभावात् अत्रायं दोष-इत्यादौ स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठताद्दशोभया-भावाधिकरणतात्वव्यापकविरोधिविषयिताप्रयोज्यताकधर्म्म एव दोषपदार्थ इति दिक्।

स्यादेतत्, शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधा-

रणोऽव्याप्तिः सर्व्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात्, एवं शब्दोऽनित्यः कृतकत्वादित्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यद्रव्यत्वादावपि पक्षस्य तद्वत्ताविरहादित्याशङ्कां तयोरलक्ष्यत्वेन निराकुरुते, 'दशाविशेष इति, 'हेत्वोः' सद्धेत्वोः, 'असाधारणः' पक्षमात्रवृत्तिः, सन् प्रतिपक्षोविरोधिपरामर्शो यस्य स तथा, तायोर्दशाविशेषे हेतौ सर्व्वसाध्यवद्व्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायां, 'आभासत्वात्' अनुमित्यजनकत्त्वात्, 'तद्बुद्धेः' हेत्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः, प्रतिबन्धकत्वं परमायाति, न तु तद्विषयस्य दोषत्वं, असत्त्वात् अन्यथा बाधभ्रमेणानुमित्यनुदयात् तस्यापि दोषत्वं स्यात्, कोहि साध्याभाव-तद्व्याप्यवत्ताभ्रमयोरनुमितिविरोधित्वे विशेषः। निर्युक्तिकस्तु प्रवादोन श्रद्धेयः।

असाधारणस्य पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगितात्मकस्य सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्रूपस्य बुद्धेर्व्विरोधिविषयकतया साध्यवत्ताज्ञानविरो-

धित्वं निर्व्विवादमेव, एवञ्च तज्ज्ञानदशायां हेतोरनुमित्य-जनकत्वात्तद्बुद्धेः प्रतिबन्धकत्वमावश्यकमित्येतादृशयथाश्रुता-र्थपरस्य 'दशाविशेषइत्यादिमूलस्यानुत्थितिः अन्यथा साधा-रण्यादिज्ञानस्य प्रतिबन्धकताया अपि व्यवस्थापयितुमुचितत्वा-दतस्तादृशमूलमन्यथा व्याख्यातुमवतारणिकामाह, 'स्यादेत-दिति, 'इत्यत्रासाधारणी' एतत्स्थलीयासाधारण्यरूपदोषे हेतुविशि-ष्यकभ्रमविषये सर्व्वसाध्यवद्व्यावृत्तत्वात्मके, 'अव्याप्तिरिति, तद्वि-षयकत्वस्य निरुक्तानुमित्यप्रतिबन्धकहेत्वविषयकज्ञानसाधारणतया तादृशप्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं सर्व्वसाध्यवद्व्यावृत्तत्वं न दोषः अपितु साधनत्वरिक्तत्वविशेषितं; तादृशविशिष्टविषयकत्वन्तु न प्रतिबन्धकतातिरिक्तत्तीत्यतआह,

'सर्व्वेति, 'तत्र' हेतौ, 'असत्वात्' अवृत्तेः, साध्यवति पक्षे हेतो-र्वृत्तेरिति शेषः, तथाच तादृशविशिष्टस्याप्रसिद्ध्या तस्य दोषत्वासम्भ-वेन प्रसिद्धस्याविशिष्टसाध्यवद्व्यावृत्तत्वस्यैव तत्र दोषताया आवश्य-कत्वमिति भावः। 'अद्रव्यद्रव्यत्वादाविति असमवेतद्रव्यत्वादावि-त्यर्थः, असमवेतत्वस्य ध्वंससाधारणतया नित्यत्वव्याप्यत्वासम्भवाद्वि-शेष्यांशनिवेशः। अत्राप्यनन्तरं अव्याप्तिरित्यनुषज्यते, तद्विषयक-त्वस्य पक्षाविषयकज्ञानसाधारणतया प्रतिबन्धकतातिरिक्तवृत्ति-त्वादिति भावः। ननु केवलं नित्यत्वव्याप्याद्रव्यद्रव्यत्वादिकं न तत्र दोषः अपि तु पक्षनिष्ठतद्वत्त्वैव तादृशविशिष्टविषयकत्वञ्च प्रति-बन्धकतानतिरिक्तवृत्त्येवेत्यत आह, 'पक्षस्येति, तथाच पक्षघटित-विशिष्टाप्रसिद्ध्या पक्षाघटितस्यैव दोषत्वमावश्यकमिति भावः।

'तयोः' तादृशस्थलीयदोषत्वेनाभिमतयोरुक्तधर्म्मयोः । शब्दोऽनित्यः शब्दत्वादित्यादौ शब्दत्वादिविशेष्यकनित्यत्वव्यापकत्वादिज्ञानविषयविशिष्टस्य प्रसिद्ध्या तत्राव्याप्तेः शङ्कानास्पदत्वादलक्ष्यत्वाभ्युपगमेन तत्परीहारस्यात्यन्तासम्भवदुक्तिकत्वात् हेतुपदं सद्धेतुपरतया व्याचष्टे, 'हेत्वोरिति, 'सद्धेत्वोः', साध्यवद्व्यावृत्तत्वादिरूपासाधारण्यस्य साध्याभावव्याप्यवत्पक्षकत्वरूपसत्प्रतिपक्षितत्वस्य चासम्भवादसाधारण-सत्प्रतिपक्षपदे अन्यथा व्याचष्टे, 'असाधारण इति, 'तथा' प्रकृते सत्प्रतिपक्षपदार्थः, सद्धेत्वोर्दुष्टत्वरूपाभासत्वायोगादाभासपदमन्यथा व्याचष्टे, 'आभासत्वादिति, 'तद्बुद्धेरित्यत्र तत्पदस्य हेतुपरत्वं न सम्भवति सत्प्रतिपक्षस्थले प्रतिबन्धकज्ञानस्य हेतुविषयकत्वानियमाद्धेतुविषयकत्वकथनस्याप्रयोजकत्वाद्बुद्धिपदस्यापि बुद्धिसामान्यपरत्वं न सम्भवति हेत्वादिमात्रविषयकज्ञानस्याप्रतिबन्धकत्वादतस्तत्पदस्य हेतु-पक्षोभयपरतया बुद्धिपदस्य साध्यवद्व्यावृत्तत्व-साध्याभावव्याप्यवत्त्वावगाहिबुद्धिपरतया तद्बुद्धिपदं हेतुविषयकसाध्यवद्व्यावृत्तत्व-पक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिपरतया व्याचष्टे, 'तद्बुद्धेरिति, तयोरलक्ष्यतालाभाय हेत्वोरित्यनन्तरं श्रुत एवकारोऽत्र योजनीयः, तदर्थमन्तर्भाव्य व्याचष्टे, 'प्रतिबन्धकत्वं परमायातीति, 'परं' केवलं, एवकारव्यवच्छेद्यं स्फुटयति, 'न त्विति, 'तद्विषयस्य'* तादृशबुद्धिविषयस्य, 'दोषत्वं' दोषलक्षणलक्ष्यत्वं, 'असत्त्वात्' लक्ष्यताप्रयोजकस्यासत्त्वात्, प्रतिबन्धकीभूतज्ञानप्रमात्वस्यैव तद्विषय

* प्रतिबन्धकीभूतज्ञानविषयस्येत्यर्थः ।

लक्ष्यताप्रयोजकत्वादिति भावः । 'असत्त्वात्' विशिष्टस्याप्रसिद्धत्वादिति तु नार्थः, एकदेश एवाव्याप्तेराशङ्कितया विशिष्टाप्रसिद्धेस्तदलक्ष्यतानिर्व्वाहकत्वविरहेणानुपयोगात् । 'अन्यथा' प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वे, 'बाधभ्रमेण' पक्षे साध्याभावभ्रमेण, 'तस्य' तद्विषयसाध्याभावादेः । नन्वेवमुक्तस्थले दशाविशेषे हेतोर्दुष्टताप्रवादोनोपपद्यत इत्यतआह, 'निर्युक्तिकस्त्विति ।

यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकतावच्छेदकं तद्वत्त्वं तत्प्रकारकप्रमाविषयत्वञ्च लक्षणार्थः । तच्च द्विविधं विषयरूपं साधारण्यादि, बाधे च प्रमितसाध्याभाववान् पक्षः, तद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वात् । अविषयरूपञ्च विरोधिसामग्रीकालीनत्वादिकं, तद्वत्त्वञ्च ज्ञानस्येव तद्विषयस्य हेतोरपीति । तन्न, तद्वत्त्वं हि हेतोर्नाभेदेन, बाधे तदभावात् । अतएव नाश्रयतया, वह्निव्यभिचारिद्रव्यत्वादिमति धूमेऽतिप्रसङ्गाच्च, साध्याभाववत्पक्षस्येव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबन्धकत्वात् साधारण्यादिविषयकत्वस्य ज्ञाननिष्ठस्यैव प्रतिबन्धकतावच्छेदकत्वात् । सत्तादिसा-

ध्यके ज्ञाने अतिप्रसङ्गाच्च यथाकथञ्चित् तद्वत्त्वस्य चातिप्रसञ्जकत्वात्, विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यकानुमितेः प्रतिबन्धको-मणिसमहितो वह्निरिव दाहस्य ।

उपदर्शितस्थलेऽपि दशाविशेषे हेतोर्दुष्टत्वमङ्गीकुर्व्वन्तस्तत्-साधारण्याय लक्षणमन्यथा व्याचक्षते ये तन्मतमुपन्यस्य दूषयति, 'यत्त्विति, 'ज्ञानस्येति, षष्ठ्यन्तार्थस्य यत्पदार्थेऽन्वयः, तथाच ज्ञानसम्बन्धित्वविशिष्टं यद्रूपावच्छिन्नं यत्किञ्चित्सम्बन्धेन* अनुमितिप्रतिबन्धकतावच्छेदकमित्यर्थः, अत्राप्यवच्छेदकत्वं अनतिरिक्तवृत्तित्वं उक्तयुक्तेः, तत्पदमुभयत्र यद्रूपविशिष्टपरं, 'लक्षणार्थः' व्युत्क्रमेण लक्षणयोरर्थः । नन्वेतावतैव कथं दर्शितसत्प्रतिपक्षादौ लक्षणसमन्वयः तत्र प्रतिबन्धकतावच्छेदकीभूतविशिष्टविषयकत्वस्याप्रसिद्धेः कथं वा व्यभिचारादिकमादाय सव्यभिचारादावेव लक्षणगमनं व्यभिचारादिविषयकत्वस्यैव प्रतिबन्धकतावच्छेदकतया व्यभिचारादेरतथात्वादित्यत आह, 'तच्चेति तद्दशप्रतिबन्धकतावच्छेदकञ्चेत्यर्थः, भ्रमात्मकबाधप्रतिबन्धकतामादायापादितायाः सद्धेतोर्दुष्टताया असम्भवं स्पष्टीकर्त्तुमाह, 'बाधे चेति बाधज्ञाननिष्ठप्रतिबन्धकतायाञ्चेत्यर्थः, अवच्छेदक इति शेषः, पक्षस्य वास्तवं साध्याभाववत्त्वं निविशते न तु वैज्ञानिकं† इति सूचयितुं

* विषयित्व–स्वरूपान्यतरसम्बन्धेनेत्यर्थः ।

† भ्रमविषयतामादायेत्यर्थः ।

'प्रमितेति, तद्विषयस्यावच्छेदकत्वे युक्तिमाह, 'तद्विषयकत्वेनेति, तथाच विषयविषयकत्वस्येव विषयस्यापि विषयितया अवच्छेदकत्वमक्षतमिति भावः । 'विरोधिसामग्रीकालीनत्वादीति विरोधिकोऽनुमितिसामग्रीकालीनत्वेन परामर्शादेः प्रतिबन्धकत्वमित्यभिमानः, तथाच तदादायैव सत्प्रतिपक्षिते असाधारणे च सद्धेतौ* दुष्टत्वमिति भावः । ननु ज्ञाननिष्ठं विरोधिसामग्रीकालीनत्वमादाय कथं हेतोर्दुष्टत्वं तस्य ज्ञानएव सत्त्वादित्याशङ्कां परिहरति, 'तद्वत्त्वञ्चेति, 'तद्विषयस्य हेतोरपीति, तत्कालनिरूपिताधेयतात्मकस्य तत्कालीनत्वस्याधेयभेदेन भेदानभ्युपगमात् अभ्युपगमे वा आधेयतासम्बन्धेन तत्कालस्यावच्छेदकतया तमादायैव लक्षणसमन्वयादिति भावः । 'नाभेदेनेति, विवक्षितुं शक्यमिति शेषः । साध्याभाववद्वृत्तित्वादिविशिष्टसाधनरूपदोषस्याभेदसम्बन्धेन हेतौ सत्त्वात्तेन सम्बन्धेन तद्वत्त्वविवक्षायां न व्यभिचारादावप्रसक्तिरतः 'बाधे तदभावादिति वह्न्यभाववद्ह्रदादिरूपबाधे धूमादिरूपहेत्वभेदासत्त्वादित्यर्थः, तथाच तत्राव्याप्तिरिति भावः । 'अतएव' बाधेऽव्याप्तेरेव, 'नाश्रयतया' तद्वत्त्वं विवक्षार्हमिति शेषः । धूमादेर्वह्न्यभाववद्ह्रदाद्यनाश्रयतया एकज्ञानविषयत्वादिरूपसम्बन्धस्य आधारत्वानिर्वाहकत्वादिति भावः † । अव्याप्तिमुक्त्वा अतिव्याप्तिमप्याह, 'वह्निव्यभिचारीति । ननु हेतुनिष्ठसाध्याभाववद्वृत्तित्वादिरूपविषय एव प्रतिबन्धकताव-

---

* नन्वेवं पर्व्वतो वह्निमान्धूमादित्यादिकं कथं परित्यक्तं उक्तरूपेण तथापि धूमादौ दुष्टत्वसम्भवादिति चेन्न, प्राचां नये एतद्विषये शब्दत्वादिहेतोः प्रसिद्धत्वात् ।

† वृत्त्यनियामकसम्बन्धावच्छिन्नाधारत्वाप्रसिद्धिरिति भावः ।

च्छेदको न तु तद्विशिष्टद्रव्यत्वादिः तदाश्रयश्च न धूमादिरित्याशङ्कां निराकरोति, 'साध्याभाववदिति, 'साध्याभाववद्वृत्तिहेतोर्ज्ञानस्येति तादृशहेतुविषयकज्ञानस्येत्यर्थः. तथाच वह्न्यभाववद्वृत्तिद्रव्यत्वादिकमपि विषयतया अवच्छेदकमिति भावः। ननु धूमादेस्तादृशधर्म्मवत्त्वेऽपि वह्नौ साध्ये धूमोदुष्ट इत्यादिव्यवहारस्य नापत्तिसम्भवः उक्तयुक्त्या तद्धेतुकानुमितिविरोधिरूपवत्त्वस्यैव तत्र दुष्टताव्यवहारनियामकत्वात् अन्यथा तत्राप्यप्रतीकारादित्यतः अन्यत्रातिप्रसङ्गमाह, 'साधारण्यादिविषयकत्वस्येति, 'ज्ञाननिष्ठस्य' ज्ञानवृत्तित्वविशिष्टस्य, 'सत्तादीति सत्तावान् ज्ञानादित्यादौ ज्ञानहेतुकसत्ताद्यनुमितिप्रतिबन्धकतावच्छेदकं ज्ञानांशे सत्ताद्यभाववद्वृत्तित्वावगाहित्वमादाय सत्त्वे साध्ये ज्ञानं दुष्टमित्यादिव्यवहारापत्तेरित्यर्थः, येन केनापि सम्बन्धेन तद्वत्त्वं विवक्षणीयमित्यपि दूषयति, 'यथाकथञ्चिदिति, 'अतिप्रसञ्जकत्वादिति उक्तधर्म्ममादाय सत्तादिसाध्यकज्ञाने धूमाद्यंशे यद्वह्न्यभाववद्वृत्तित्वावगाहित्वं एकज्ञानविषयत्वादिसमन्धेन तद्वत्त्वमादाय वह्न्यादिसाध्यकधूमादावपि दुष्टत्वव्यवहारापत्तिरित्यर्थः, सत्प्रतिपक्षस्थले विरोधिसामग्रीसमकालीनत्वेन प्रतिबन्धकतामादाय यल्लक्षणसत्त्वमुपपादितं तद्दूषयति, 'विरोधिसामग्रीति, 'न स्वसाध्यकानुमितेः प्रतिबन्धक इति न स्वजन्यानुमितिप्रतिबन्धक इत्यर्थः, कारणत्वप्रतिबन्धकत्वयोरेकत्रानभ्युपगमादिति हृदयं। विभिन्नरूपेण तदुभयस्वीकारोपगमे प्रतिबन्धिसूचनायाह,'मणौति, न प्रतिबन्धकइत्यनुषज्यते, तथाच विरोधिकोव्यनुमितिसामग्रीकालीनत्वेन परामर्शादीनां

ऽनुमितिप्रतिबन्धकत्वे मणिसमवहितत्वेन वह्न्यादीनामपि दाह-प्रतिबन्धकत्वापत्तिः, मणिसमवहितत्वापेक्षया लाघवेन मणित्वे-नैव प्रतिबन्धकता कल्प्यते इति चेत्, तर्हि विरोधिसामग्रीकालीनत्वापेक्षया लाघवात् तादृशसामग्रीत्वेन विरोधिपरामर्शत्वे-नैव वा प्रतिबन्धकत्वं प्रकृतेऽपि कल्पयितुमुचितमिति कथं विरोधिसामग्रीकालीनत्वमादाय लक्षणं सङ्गमनीयं तस्य प्रतिबन्धकता-तिरिक्तवृत्तित्वादिति भावः ।

अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबन्धः तदेवात्र प्रतिबन्धकतावच्छेदकमुक्तं भवति च प्रतिबन्धकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत्, न वा कालादिसाधारण-कारणघटिता सामग्री क्वापि प्रतिबन्धिका विशेषत-स्तत्र तत्सत्त्वे कार्य्योत्पादस्य दुर्व्वारत्वात्। किन्तु विरोधिपरामर्शस्तथा। यदि च तत्सत्त्वेऽपि तत्साध्ये बाधावतारे नानुमितिप्रतिबन्धः प्रामाणिक-स्तदा अप्रामाण्यग्रहाभावस्येव तदभावस्यापि वैशि-ष्ट्यान्तव निवेश्यतां, यथा च भ्रम-प्रमासाधारणविरोधि-परामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहे-

पीत्यतिप्रसङ्गः। नचातीतादौ लिङ्गे विरोधिपरामर्शकालीनत्वमपि।

कार्य्यानुत्पत्तिव्याप्यतावच्छेदकत्वरूपं प्रतिबन्धकतावच्छेदकत्वमेवात्र विवक्षितं न तु कारणीभूताभावप्रतियोगितावच्छेदकत्वरूपं, तच्च विरोधिसामग्रीकालीनत्वेऽप्यक्षतमेवेत्याह, 'अथेत्यादिना, 'यद्धर्म्मेति यादृशधर्म्मविशिष्टनिश्चयाव्यवहितोत्तरक्षणत्वव्यापकोऽनुमित्यनुत्पादस्तादृशरूपपरमेवेत्यर्थः* निश्चयत्वनिवेशात् बाधादिविषयकसंशय-संस्काराव्यवहितोत्तरक्षणे कदाचिदनुमित्युत्पादेऽपि न क्षतिः, 'अत्र' एतल्लक्षणे, 'प्रतिबन्धकतावच्छेदकमुक्तं' प्रतिबन्धकतावच्छेदकपदेन विवक्षितं, 'भवति चेति, विरोधिकोट्यनुमितिसामग्र्याः प्रतिबन्धकत्वकथनं प्रतिबन्धकसमवहिताव्यवहितोत्तरक्षणे कार्य्यानुत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकतायां आवश्यकत्वदर्शनाय, 'तथा' अवश्यमनुमित्यनुत्पादः, विरोधिसामग्र्याः प्रतिबन्धकत्वं यदुक्तं तदेवादौ दूषयति, 'न वेति न हीत्यर्थः, 'कालादीति घटितान्त' हेतुगर्भविशेषणं, तथाच कारणसमुदायः सामग्री, सा च क्वचिदपि न प्रतिबन्धिका कालादिसाधारणकारणानामपि तदन्तर्निविष्टत्वात् तेषाञ्च प्रतिबन्धकतावच्छेदककोटौ निवेशस्य निष्फलत्वात् प्रतिबध्यकार्य्येऽपि तेषामनुगुणत्वादित्यर्थः। सत्प्रतिपक्षस्थले विरोधिकोट्यनुमिति-

---

* तादृशरूपवत्त्वमित्यर्थः इति पा०।

सामग्र्याः सत्त्वेऽप्यनुमितिप्रतिबन्धकत्वमत्यन्तासम्भवदुक्तिकमेव तत्र फलानुत्पादेन सामग्र्या एवासत्त्वादित्याह, 'विशेषतस्त्वित्यादिना, 'अत्र' सत्प्रतिपक्षस्थले, 'सामग्री न प्रतिबन्धिकेत्यनुषज्यते, 'कार्य्योत्पादस्य दुर्व्वारत्वात्', सामग्र्याः कार्य्यनियतत्वादिति भावः। ननु तर्हि तत्र परामर्शादिरूपानुमितिहेतुसत्त्वादनुमितिः कथं नोत्पद्यत इत्यत आह,'किन्त्विति, 'विरोधिपरामर्शः' साध्याभावव्याप्यवत्तानिश्चयः, 'तथा' अनुमितिप्रतिबन्धकः । ननु यत्र वह्न्यभावव्याप्यवत्तापरामर्शः वह्न्यभावाभाववान् पक्षइति बाधनिश्चयश्च वर्त्तते तत्र वह्निव्याप्यवत्ताज्ञानेन वह्न्यनुमितिर्जन्यते इत्यनुभवसिद्धं विरोधिपरामर्शमात्रस्य प्रतिबन्धकत्वे च तन्नोपपद्यते इत्यत आह, 'यद्विचेति, 'तत्सत्त्वेऽपि' विरोधिपरामर्शसत्त्वेऽपि, 'तत्साध्ये बाधावतारे' तादृशपरामर्शानुमेयविरोधिकोटेः पक्षेऽभावनिश्चयदशायां, 'नानुमितिप्रतिबन्धः' न प्रकृतसाध्यानुमित्यनुत्पादः, 'अप्रामाण्यग्रहाभावस्येत्यनन्तरं 'वैशिष्ट्यमित्यनुषज्यते, 'तदभावस्य' विरोधिकोटिविरहनिश्चयाभावस्य, 'तत्र' विरोधिपरामर्शप्रतिबन्धकतावच्छेदकगर्भे, 'निवेश्यतामिति, अत्र विपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटिविरहनिश्चयसत्त्वे तत्परामर्शे भ्रमत्वग्रहानन्तरमेवानुमितिर्न त्वन्यथेति भ्रमत्वग्रहाभाववैशिष्ट्यनिवेशेनैवोपपत्तौ तादृशबाधग्रहाभाववैशिष्ट्यनिवेशोव्यर्थं इत्यनिर्भरसूचनाय 'यद्विचेत्युक्तं', अप्रामाण्यग्रहाभाववैशिष्ट्यस्य दृष्टान्तविधया प्रतिबन्धकतावच्छेदकत्वञ्च दर्शितं । नन्वस्तु विरोधिपरामर्शमात्रं प्रतिबन्धकं तथापि तदघटितविरोधिसामग्रीका-

नीनज्ञानस्य फलानुत्पादनियतत्वात्तादृशसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकत्वं दुरपह्नवमेव, एवं विरोधितथाविधपरामर्शकालीनत्वमादायापि दशाविशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यतो विरोधिपरामर्शकालीनत्वसमशील-बाधादिभ्रमकालीनत्वमादाय सद्धेतावतिव्याप्तिमाह, 'यथा-चेति, 'तथाविधेति विरोधिभ्रमसाधारणेत्यर्थः, 'अपीत्यनन्तरं 'नानुमितिरित्यनुषज्यते, तथाच तादृशबाधादिकालीनत्वमपि निरुक्तप्रतिबन्धकतावच्छेदकत्ववद्भवत्येवेत्यतोऽतिप्रसङ्ग इति बाधादेरनित्यदोषतायाः केनाप्यनुपगमेन इष्टापत्त्यनवकाशादिति भावः।

यदपि यद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्वत्त्वमेव वाच्यं, सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वमपि हेतोस्तज्ज्ञानरूपसम्बन्धेन तस्य समूहालम्बनरूपतया हेतुद्वयविषयत्वादिति, तदपि तुच्छं, साध्याभाववत्पक्षविषयत्वेन साध्याभाववत्पक्षज्ञानप्रमात्वविषयत्वेन वा* ज्ञानस्य प्रतिबन्धकत्वं तस्य च साध्यवत्यपि पक्षे सम्भवादतिव्याप्तेः। विशिष्टविषयत्वेन प्रतिबन्धकत्वं विशिष्टस्य तत्राप्रसिद्धमिति चेत्, तत् किं सर्व्वत्र सत्प्रति-

---

* तादृशपक्षज्ञानप्रमात्वविषयत्वेन वेति पा०।

पक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः यथाकथञ्चित्-सम्बन्धेन तद्वत्त्वस्यातिप्रसक्तं धुमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादिमत्त्वात्, यादृशसम्बन्धावगाहित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन तद्वत्त्वञ्च न सर्व्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् सद्धेताविति कृतं पल्लवितेन ।

विरोधिपरामर्शकालीनत्वमादाय सर्व्वत्र सत्प्रतिपक्षिते दुष्टत्वं नोपपादयितुं शक्यत इत्याह, 'न चेति नहीत्यर्थः, 'अतीतादाविति, तथाचातीतादिसद्धेतौ विरोधिपरामर्शदशायां भवन्मतसिद्धं सत्प्रतिपक्षितत्वं नोपपद्यत इति भावः । सत्प्रतिपक्षिते सद्धेतौ विरोधिव्याप्यवत्पक्षस्याप्रसिद्धावपि प्रतिबन्धकीभूतभ्रमविषयप्रसिद्धविरोधिव्याप्यादिरेव वा दोष इति मतं दूषयति, 'यदपीति, 'यद्विषयकत्वेनेति, तृतीयार्थः स्वरूपसम्बन्धरूपावच्छेदकत्वं, न त्वनतिरिक्तवृत्तित्वं, तथा सति विरोधिव्याप्यादेर्दोषत्वानुपपत्तेः, प्रतिबन्धकतायां 'ज्ञाननिष्ठत्वविशेषणं कामिनीजिज्ञासादिनिष्ठप्रतिबन्धकतावच्छेदकधर्म्मेऽतिप्रसङ्गवारणाय । ननु विरोधिकोटिव्याप्यत्वस्य पर्व्वतोवह्निमान्धूमात्, पर्व्वतोन वह्निमान्जलत्वादित्यादौ प्रतिबन्धकीभूतज्ञानविषयसमवायादिसम्बन्धावच्छिन्नपक्षधर्म्मतायाश्च प्रकृते हेतावभावात् कथं तस्य दुष्टत्वमतआह, 'तद्वत्त्वमपीति विरो-

विरोधिव्याप्त्यादिमत्त्वमपीत्यर्थः, 'तज्ज्ञानरूपेति स्वविषयकज्ञानविषयतात्मकेत्यर्थः, सम्बन्धविशेषस्याविवक्षितत्वादिति भावः। तादृशसम्बन्धवत्तां प्रकृतहेतावुपपादयति, 'तस्येति विरोधिव्याप्त्यादिज्ञानस्येत्यर्थः, 'समूहालम्बनरूपतयेति। नचैवं क्रमिकपरामर्शद्वयस्थले सत्प्रतिपक्षतानुपपत्तिरिति वाच्यं। तत्रापि तादृशव्याप्त्यादिप्रकृतहेतुविषयकपरमेश्वरज्ञानादिकमादाय तद्वत्तोपपत्तेः। 'साध्याभाववत्पक्षविषयकत्वेन' साध्याभावप्रकारकपक्षावगाहित्वेन, 'साध्याभावत्पक्षज्ञानेति साध्याभावप्रकारकपक्षज्ञानांशे प्रमात्वविषयकत्वेनेत्यर्थः, मतभेदेन विकल्पः, 'तस्य' तादृशज्ञानस्य, 'साध्यवत्यपि पक्षे' पक्षे साध्यवत्यपि सति पक्षस्य साध्यवत्त्वे सत्यपीति यावत्, पर्व्वतोवह्निमान् धूमादित्यादौ भ्रमात्मकबाधादिज्ञाननिष्ठप्रतिबन्धकतावच्छेदकविषयितानिरूपकवह्न्यभावादेः स्वविषयकज्ञानविषयत्वादिसम्बन्धेन वैशिष्ट्यस्य हेतौ सत्त्वादिति भावः। इदमुपलक्षणं, वह्निमान् धूमादित्यादौ विरोधिपरामर्शशून्यकालेऽपि तद्विषयविरोधिव्याप्त्यादिकमादायापि हेतोर्दुष्टत्वप्रसङ्गो-बोध्यः, तत्रापि पक्षांशे तद्विशिष्टविशेषणकसमूहालम्बनज्ञानसम्बन्धेन हेतौ तद्वैशिष्ट्यसम्भवात्। अनतिरिक्तवृत्तित्वरूपमेवावच्छेदकत्वं विवक्षणीयमित्यभिप्रायेण बाधभ्रमप्रतिबन्धकतामादायातिप्रसङ्गस्य उद्धारमाशङ्कते, 'विशिष्टेति साध्याभावविशिष्टपक्षविषयकत्वमेव प्रतिबन्धकतानतिरिक्तवृत्ति न तु साध्याभावादिमात्रविषयकत्वमित्यर्थः, 'विशिष्टस्य' साध्याभाव-

विशिष्टपक्षः, 'तत्र' बाधस्थले सत्प्रतिपक्षस्थले, सर्व्वत्र तादृशविशिष्टं प्रसिद्धमित्यभिमानः, भ्रमं निराकरोति, 'तत्किमिति, पक्षावृत्ति-साध्यकसत्प्रतिपक्षे सांध्याभावव्याप्यविशिष्टपक्षस्य प्रसिद्धत्वात् 'सर्व्वत्रेति, 'सत्प्रतिपक्षे' सत्प्रतिपक्षतया भवन्मतसिद्धे इत्यर्थः, 'प्रसिद्ध इति, तथाचानतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं विवक्षितु-मशक्यमिति दर्शितातिव्याप्तिर्दुर्व्वारैवेति भावः। तद्वत्त्वघटक-सम्बन्धं वितर्क्यापि दूषयति, 'यथा कथञ्चिदिति, 'अतिप्रसक्तं' सद्धेतुसाधारणं, तथाच पर्व्वतादौ वह्न्यादिमत्त्वे साध्ये धूमादौ दुष्टताव्यवहारापत्तिरिति भावः। तादृशसम्बन्धस्य धूमादिरूप-सद्धेतुसाधारणत्वं स्फुटयति 'धूमादेरिति, 'ज्ञानरूपेण' स्वविषयक-ज्ञानविषयत्वेन, 'तदाश्रयाश्रयत्वादिना, आदिना एककालीन-त्वादिपरिग्रहः, 'व्यभिचारादिमत्त्वात्' वह्न्यभाववद्वृत्तित्वस-त्त्वात्। ननु यादृशसम्बन्धावच्छिन्नयत्प्रकारतानिरूपितधर्म्मि-विशेष्यताशालित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्व-मेव दुष्टत्वमिति वाच्यं। एवञ्च स्वरूपसम्बन्धावच्छिन्नसाध्याभाव-वद्वृत्तित्वादिप्रकारतानिरूपितहेतुविशेष्यताशालित्वेनैव व्यभि-चारादिज्ञानस्य प्रतिबन्धकतया तेन सम्बन्धेन तद्वत्त्वस्य च प्रकृत-हेतावभावात् नातिव्याप्तिरित्याशङ्कां निराकुरुते, 'यादृशेति, 'सर्व्वत्र सत्प्रतिपक्षित इति, ह्रदो वह्निमान् धूमादित्यादिस्थले धूमादिरूपहेतौ व्याप्यताघटक समवायादिसम्बन्धेन वह्न्यभावव्या-प्यधूमत्वादिमत्तायाः सत्त्वात् 'सर्व्वत्रेत्युक्तं। 'क्वचित् सद्धेताविति सद्धेतुतादशायां क्वचिदित्यर्थः, पर्व्वतो वह्निमान् धूमादित्यादौ

विरोधिपरामर्शासमवधानदशायामपि प्रतिबन्धकतावच्छेदक-प्रकारताश्रयवह्न्यभाव-तद्व्याप्यादेः ताद्दशप्रकारतावच्छेदक-स्वरूपादिसम्बन्धेन धूमादिवृत्तित्वादितिभावः।

यत्तु ज्ञानसम्बन्धेन तद्वत्त्वमेव दुष्टत्वं ज्ञानञ्च विशिष्टव्यव-हाराद्यनुरोधात् कदाचिदेव क्वचिदेव कस्यचित् सम्बन्धः, एवञ्च विरोधिव्याप्यादेर्ज्ञानं विरोधिपरामर्शदशायामेव प्रकृतहेतौ तत्-सम्बन्धः तदेव तत्र दुष्टताव्यवहारात् साध्याभावादेर्ज्ञानन्तु तत्र न कदाचिदपि तथा, परमेश्वरादिसाधारणं साध्याभावविशिष्ट-पक्षादेर्ज्ञानन्तु तत्र सर्व्वदैव इति, तत्तु हासास्पदमेव, सकला-भियुक्तपुरुषसाधारणस्य नियतव्यवहारस्यासिद्धत्वात् वासना-विशेषवतां ताद्दशव्यवहारस्य विपरीतस्यापि सम्भवात्, ज्ञानस्य नियतसम्बन्धत्वासाधकत्वादिति।

'यद्यपीति, स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्ष-शाब्दयोरनुदयात्। नचैवं नर-शिरःकपालं शुचि प्राण्यङ्गत्वादित्यादिनाप्यागम-प्रतिरोधः स्यात्, तत्रानुकूलतर्काभावेन बलवत्तरा-गमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्ते-रितिभावः। यद्वेत्याद्यभ्युच्चयमात्रं, प्रत्यक्षं प्रत्यानु-मानिकबाधादिनिश्चयस्याप्रतिबन्धकत्वेऽपि शाब्दं

प्रति प्रतिबन्धकत्वात् योग्यताज्ञानेनान्यथासिद्ध-त्वात् तदभावो न तत्र हेतुरिति चेदेवमप्युपनीत-भानविशेषं प्रति तत्त्वेन हेतुतायादुर्व्वारत्वात् ।

इति महामहोपाध्याय-श्रीरघुनाथशिरोमणि-भट्टाचार्य्यविरचिता हेत्वाभासे सामान्य-निरुक्तिदीधितिः समाप्ता ।

'यद्विषयकत्वेनेतियथाश्रुतकल्पे कामिनीजिज्ञासादिविषये अतिव्याप्तिरित्यसाधारणप्रतिबन्धकताघटितमेव लक्षणं करणीयं तत्रैवाशङ्कते, 'यद्यपीति, समाधानमपि 'ज्ञायमानं सदित्यादि-त्वादिद्वितीयलक्षणाभिप्रायेण 'तथापीत्यादिनेति बोध्यं । बाध-सत्प्र-तिपक्षज्ञानयोः प्रत्यक्ष-शाब्दज्ञानप्रतिबन्धकत्वमभिधाय बाध-सत्-प्रतिपक्षयोरनुमितिमात्रवृत्तिधर्म्मावच्छिन्नप्रयोज्यतानिरूपितप्रयोज-कताश्रयाभावप्रतियोगिज्ञानविषयत्वरूपं लिङ्गासाधारणदोषत्वं न सम्भवतीत्याक्षिप्तं मणिकृता तादृशप्रतिबन्धकतायाञ्च युक्तिर्नोक्तेति न्यूनतापरीहाराय तत्र युक्तिमाह, 'स्थाणुत्वाभावस्येति, 'स्थाणुत्वप्र-त्यक्ष-शाब्दयोरिति समानधर्म्मितावच्छेदककस्य स्थाणुत्वप्रकारकस्य लौकिकसन्निकर्षाद्यजन्यप्रत्यक्षस्य शाब्दस्य चेत्यर्थः, 'एवं' शाब्दबु-द्धौ बाध-तदभावव्याप्यवत्ताज्ञानयोः प्रतिबन्धकत्वे, 'नरशिरः कपा-

त्वमिति नरशिरःकपालस्य शुचित्वानुमापकेन तत्तद्धर्म्मिकप्राण्यङ्गत्वपरामर्शेन स्वतः फलद्वारा चागमजन्याशौचबोधविरोधः स्यादित्यर्थः, स चानुभवविरुद्धः तत्र प्राण्यङ्गत्वज्ञानदशायामपि शाब्दाशौचज्ञानस्यानुभवसिद्धत्वादिति भावः। समाधत्ते, 'तत्रेति तादृशाशौचज्ञानप्राक्काल इत्यर्थः, अनुकूलतर्काभावेन व्याप्तिनिश्चयस्य बलवत्तरागमविरोधेनानुमितेश्चानुत्पत्तेरिति योजना, एवञ्च वास्तवव्याप्यधर्मस्य येन केनापि रूपेण ज्ञानमेव न विरोधि अपि तु व्याप्यत्वरूपेण अत्र च प्राण्यङ्गत्वस्य ज्ञानेऽपि व्याप्तिग्राहकतर्कविरहेण व्यभिचारशङ्कया शौचव्याप्यत्वेन तज्ज्ञानं न सम्भवति कारणान्तरविरहेण यत्र व्यभिचारशङ्काविरहस्तत्र कथञ्चिद्व्याप्तिग्रहेऽपि गृहीताप्रामाण्यकागमतात्पर्य्यविषयविपरीतविषयकत्वेन तत्राप्रामाण्यं गृह्यते तथाच तादृशप्राण्यङ्गत्वज्ञानं न शौचानुमितिजनने शाब्दाशौचज्ञानप्रतिबन्धे वा प्रभवतीति समुदितार्थः। आगमे प्रामाण्यग्रहश्च शिष्टपरिग्रहादिनैव भवति, यावच्च तादृशपरामर्शो नाप्रामाण्यं गृह्णाति तावद्भवत्येवागमप्रवृत्तिरिति भावः। 'यद्वेत्यादिग्रन्थेन बाधादिज्ञानस्यानुमित्यतिरिक्तज्ञानाप्रतिबन्धकत्वं व्यवस्थाप्य बाधादेर्लिङ्गासाधारणदोषत्वमेवोपपादितं तत्र सङ्गच्छते, बाधितार्थस्य शाब्दबोधाभ्युपगमेऽनुमितिरप्यनपराधात्तत्राप्रामाण्यग्राहकतया बाधादिग्रहस्य प्रवृत्त्यादिविरोधितोपपत्तेरिति भावः। अत्र कल्पे ग्रन्थकृतोऽनिर्भरमाह, 'यद्वेत्यादीति, नन्वानुमानिकबाधादिनिश्चयदशायामपि लौकिकसन्निकर्षादितः प्रत्यक्षनिश्चयोत्पत्त्या बाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबन्ध-

कत्वं न सम्भवतीत्यनुमित्यसाधारणप्रतिबन्धकत्वं बाधनिश्चयत्वावच्छिन्नस्याच्चतमतीयद्विषयकनिश्चयत्वेनानुमित्यसाधारणप्रतिबन्धकत्वं तदत्तुस्य लक्ष्यताप्रयोजकत्वाभिप्रायेण 'यद्वेत्यादिग्रन्थस्य बाधे लक्ष्यतोपपादकत्वं सुसंगच्छते इत्यत आह, 'प्रत्यक्षं प्रतीति, समानेन्द्रियजन्यबाधनिश्चयसत्त्वे लौकिकप्रत्यक्षस्याप्यनुत्पत्ते-रानुमानिकेति बाधनिश्चयविशेषणं, 'शाब्दं प्रतीति, तथाच तावतैव लिङ्गासाधारणदोषत्वव्याघात इति भावः। तत्रापि तदप्रतिबन्धकत्वमाशङ्कते, 'योग्यतेति, 'अन्यथासिद्धत्वादिति, बाधादिनिश्चयदशायां योग्यताज्ञानरूपकारणविरहेणैव शाब्दबोधानुत्पादनिर्व्वाहादिति भावः। 'तदभावः' बाधादिनिश्चयाभावः, 'तत्र' शाब्दबुद्धौ, यद्यपि योग्यतासंशयद्वितीयक्षणे स्मरणाद्यात्मकायोग्यतानिश्चये सति तद्द्वितीयक्षणे शाब्दज्ञानवारणाय तदभावस्य शाब्दबोधहेतुत्वस्यावश्यकत्वं तथापि बाधादिज्ञानस्य शाब्दाप्रतिबन्धकत्वेऽपि निर्व्विवादोपनीतभाने विशेषप्रतिबन्धकतयैव बाधादेर्लिङ्गासाधारणदोषत्वनिराकरणसम्भवात्तत्रैव तन्निराकरोति, 'एवमपीति, 'उपनीतभानविशेषं' दोषविशेषाजन्योपनीतभानविशेषं, 'तत्त्वेन' बाधनिश्चयाद्यभावत्वेन, 'दुर्व्वारत्वादिति, बाधादिनिश्चयदशायां अनुमितेरिव तादृशोपनीतभानानुत्पादस्य सर्व्वानुभवसिद्धत्वादिति भावः॥

इति महामहोपाध्याय-श्रीगदाधरभट्टाचार्य्यविरचिता हेत्वाभासे सामान्यनिरुक्तिदीधितिविवृतिः समाप्ता॥

सामान्यनिरुक्तावतिरिक्तविवेचनं ।

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति लक्षणे भूतपदं षष्ठीसमासनिरासार्थमेवेति बोध्यं। नचानुमितिकारणप्रतियोगियथार्थज्ञानविषयत्वनिवेशेनैव सामञ्जस्ये अभावपदं व्यर्थमिति वाच्यं । सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपानुमितिकारणमादाय सिद्धिविषयेऽतिव्याप्तिरतः अभावपदं । तथाचाभावपददानेन तादृशसिद्ध्यभावभिन्नानुमितिकारणप्रतियोगियथार्थज्ञानविषयत्वं पर्य्यवसितं । नचानुमितिकारणीभूताभावप्रतियोगियथार्थीयविषयत्वनिवेशेनैव निर्व्वाहसम्भवे ज्ञानपदं व्यर्थमिति वाच्यं । कार्य्यमात्रं प्रति कामिनीजिज्ञासा पृथक् प्रतिबन्धिका तथाचानुमितिकारणीभूताभावमध्ये तादृशजिज्ञासाभावस्य प्रविष्टत्वात् तत्प्रतियोगियथार्थीयत्वस्य कामिनीविषयकज्ञानेऽपि सत्त्वात् अतिव्याप्तिरतोज्ञानपदं, तथेच्छायाः ज्ञानाभिन्नत्वाभावात् नातिव्याप्तिः । कारणतावच्छेदककोटिप्रविष्टाभावप्रतियोगित्वरूपप्रतिबन्धकतामादायाप्रामाण्यादावतिव्याप्तिवारणाय अनुमितिप्रतिबन्धकत्वमुपेक्ष्य अनुमितिकारणीभूताभावप्रतियोगित्वमुक्तं मणिकारेण । व्याप्ति-पक्षधर्म्मताविरोधितद्विरहवतोदुष्टहेतोः स्मरणादित्युक्तं भट्टाचार्य्येण । न च विरोधिपदं व्यर्थं इति वाच्यं । व्याप्ति-पक्षधर्म्मताघटैतत्त्वित्वावच्छिन्नाभाववतः सद्धेतोः स्मरणसम्भवेन दोषवारणाय विरोधिपदस्यो-

त्त्वात् तथाच व्याप्ति-पक्षधर्म्मताविरोधी यस्ताद्दशाभावः स च व्याप्तिर्नास्ति पक्षधर्म्मत्वं नास्तीति प्रतीतिसिद्धोऽभाव-एव स च दुष्टहेतावेव वर्त्तते न तु सद्धतौ इति भावः । सपरिकरं हेतुं निरूप्य इति दीधितिकारेणोक्तं, अथाच सपरिकरहेतुं निरूप्य इति समस्तपदं कथं नोक्तं, इति चेन्न, तदाभासनिरूपणमिति ग्रन्थस्यालग्नकतापत्तेः तत्पदस्य समस्तैकदेशपरामर्शकत्वासम्भवादिति भावः । मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः, यथार्थज्ञाननिष्ठानुमिति-प्रतिबन्धतावच्छेदकविषयताश्रयत्वपर्य्यन्तस्य समूहालम्बनज्ञान-विषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे अवश्यं विवक्षणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात् तत्र हेतावव्याप्तिरिति गदाधरेणोक्तं, अत्र प्रायःपदं ह्रदो वह्निमान् ह्रदादित्यादौ हेतुविषयताया अवच्छेदकत्वात् इत्यभिप्रायेणोक्तं । यत्तु स्वरूपासिद्धिप्रतिबन्धकतामादाय हेतुविषयताया अवच्छेदकत्वात् कथमव्याप्तिरिति तत्तुच्छं, असङ्कीर्णबाधस्थले उत्पत्तिकालावच्छिन्नो घटोगन्धवान् पृथिवीत्वादित्यादौ हेतुविषयताया-अनवच्छेदकत्वात् तत्र हेतावव्याप्तिरिति भावः । यद्विषयकत्वेनेत्यादिलक्षणे तृतीयाया अवच्छेदकत्वार्थकतया सुतरां तथेति भट्टाचार्य्येणोक्तं । अत्र ह्रदत्वपुरस्कारेण घटाद्यवगाहिवह्न्याभाववान् ह्रद इति ज्ञानीयप्रतिबन्धकतावच्छेदकीभूतघट-विषयतामादाय घटादावतिव्याप्तिवारणाय यद्रूपावच्छिन्न-

विषयत्वं अनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वनिवेशा-वश्यकतया सुतरामिति व्यर्थं इतिचेन्न, यद्विषयत्वस्य एतादृशा-र्थलाभायैव सुतरामित्युक्तं इतिभावः। अनुमितिपदस्य अनु-मितिसामान्यपरत्वेऽसंभवः यत्किञ्चित्परत्वेऽतिप्रसङ्गात् प्रकृ-तपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकमिति भट्टाचार्य्येणोक्तं, न-चात्र बाधादावव्याप्तिवारणाय प्रकृतपक्ष-साधकत्वनिवेशः, प्रकृत-हेतुकत्वनिवेशे प्रयोजनाभाव इति वाच्यं। पर्व्वतो वह्नि-मान् महानसीयवह्नीतरवह्न्यभाववत्पर्व्वतकालीनधूमादित्यादौ महानसीयवह्न्यभाववत्पर्व्वतरूपबाधेऽव्याप्तिः तस्य प्रकृतपक्ष-साधकानुमित्यन्तर्गतायां शुद्धपर्व्वतोवह्निमान् इत्यनुमितौ प्रति-बन्धकत्वाभावात् अतः प्रकृतहेतुकत्वनिवेशः, तन्निवेशे च प्रकृतपक्ष-साध्यहेतुकानुमितिपदेन महानसीयत्व-वह्नित्वोभयध-र्मावच्छिन्नप्रकारकवह्नित्वावच्छिन्नविधेयताशाल्यनुमितिरेव वा-च्या तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः उक्तबाधे सत्त्वान्नाव्याप्तिरितिभावः। अनुमितिनिष्ठकार्य्यतानि-रूपकसम्बन्धित्वेनानुमिति-तत्कारणज्ञानपरमितिदीधितिसन्दर्भः, अत्र सम्बन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कार-विषयतात्मकनिरूपकत्वस्य लाभाय सम्बन्धिपदमिति भट्टाचार्य्ये-णोक्तं; अत्र यद्यपि तदनुयोगित्व-तत्प्रतियोगित्वान्यतरात्मक-निरूपकत्वरूपसम्बन्धनिवेशेनैव तादृशान्यतरवन्निष्ठप्रतिबध्यता-निरूपितप्रतिबन्धकतानिवेशनिर्व्वाहे कथं साक्षात्कारविषय-तात्मकनिरूपकत्वमुक्तं भट्टाचार्य्येण, नचान्यतरत्वं भेदद्वया-

वच्छिन्नप्रतियोगिताकभेदवत्त्वं तथाच गौरवमिति वाच्यं। साक्षात्कारकल्पे जनकत्व-जन्यत्व-व्यापकत्वनिवेशस्यावश्यकतया अन्यतरत्वकल्पे महल्लाघवं इति वाच्यं। यतस्तत्कल्पे कार्य्य-कारणभावे गौरवं, तथाहि तव हेतुर्दुष्ट इति व्यवहारं प्रति व्यवहर्त व्यज्ञानस्य कारणत्वं तथाच तादृशकार्य्यतानुयोगिना नेतिभेदविशिष्टत्वे सति तत्प्रतियोगिता नेतिभेदविशिष्टोयस्तदवच्छिन्नप्रतियोगिताकभेदः तद्विशिष्टवद्ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वेन एवं विनिगमनाविरहेण तत्प्रतियोगिता नेतिभेदविशिष्टत्वे सति अनुयोगिता नेतिभेदविशिष्टोयः तदवच्छिन्नप्रतियोगिताकभेदः तद्विशिष्टवद्ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वेन ज्ञानस्य कारणत्वमवश्यं वक्तव्यं तदपेक्षया साक्षात्कारकल्पे महल्लाघवं तत्र कारणता एकैवेति बोध्यं। एवं अनुमितिनिष्ठकार्य्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयनिष्ठप्रतिबध्यताया एव तत्र निवेशनीयत्वं। साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारकानुमितिपरं वेतिदीधितिकारेणोक्तं। अत्र पक्षपदानुक्तौ बाध-सत्प्रतिपक्ष-स्वरूपासिद्ध्याश्रयासिद्धिष्वव्याप्तिरुक्ता भट्टाचार्य्येण। नच वह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्येऽप्यव्याप्तिसम्भवे कथं तन्नोक्तं इति वाच्यं। पक्षपदप्रवेशेऽपि तत्राव्याप्तेरनुद्धारः अतः तन्नोक्तं। केचित्तु साध्य-तदभाववद्वृत्तित्वस्यैवासाधारण्यरूपत्वात् अतः तन्नोक्तं। नच स्वरूपासिद्ध्याश्रयासिद्ध्योः कथं अव्याप्तिः द्वितीयदले पक्ष-

पदप्रवेशात् इति वाच्यं। पक्षपदस्य सकृदेव निवेशात्। निवेशस्तु साध्यतावच्छेदकावच्छिन्नप्रकारताविशिष्ट-साध्यव्याप्य-हेतुतावच्छेदकावच्छिन्नप्रकारताकानुमितित्वव्यापकप्रतिबध्यतात्वेन, वैशिष्ट्यञ्च स्वनिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावत्त्वसम्बन्धेन, विशेष्यतावत्त्वञ्च स्वनिरूपकज्ञानीयत्व-स्वावच्छेदकाच्छिन्नविशेष्यतानिरूपितत्वोभयसम्बन्धेन। अवच्छेदकत्वञ्च तत्पर्य्याप्त्यधिकरणत्वं तेनातेजस्वी पर्व्वतोवह्निमान् इत्यादौ बाधाश्रयासिद्ध्यादौ नाव्याप्तिरिति भट्टाचार्य्येणोक्तं। नचात्रापि सत्प्रतिपक्ष-स्वरूपासिद्धयव्याप्तिसम्भवे कथं तन्नोक्तं इति वाच्यं। पूर्व्वोक्तसमुदायस्याद्यन्तकथनेन तन्मध्यपातत्वस्यापि लाभसम्भवात्। वस्तुतस्तु सत्प्रतिपक्षत्वावच्छेदे नाव्याप्तिः व्यापकसामानाधिकरण्यघटितस्य सत्प्रतिपक्षत्वे तेजोभावव्यापकवह्न्यभावसमानाधिकरणतेजोभाववदतेजस्विपर्व्वते लक्षणगमनात् तज्ज्ञानस्य व्यावर्त्तकदर्शनविधया प्रतिबन्धकतया तज्ज्ञानस्य पर्व्वतो वह्निमान् इत्यनुमितिप्रतिबन्धकत्वात् समानाधिकरण्येन निश्चयस्य अवच्छेदावच्छेदेन बुद्धेरेव प्रतिबन्धकत्वमिति नियमस्तु बाधादिस्थल एव न तु अवच्छेदकधर्म्मदर्शनस्थले इति तर्कग्रन्थे मथुरानाथेन लिखितत्वात्। न च तथापि स्वरूपासिद्धयव्याप्तिसम्भवे तत् कथं नोक्तमिति वाच्यं। तत्रापि स्वरूपासिद्धित्वावच्छेदेन अव्याप्त्यसम्भवात्। अतेजस्वी पर्व्वतोवह्निमान् घटादित्यादौ अवच्छेदावच्छेदेन घटाभाववत्पर्व्वतरूपस्वरूपासिद्धौ लक्षणगमनात्। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकार-

प्र... ...योनुयोगित्वान्यतरसम्बन्धेन धर्मता ...त्वं समनापित्वं धर्म ॥

व्यधिकरणधर्म्मावच्छिन्नाभावः।

ओं नमोगणेशाय। अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्। न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः नच वाच्यत्वाभावस्तादृशो घटे इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिस्तथा चाप्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् अन्यथा निर्व्विकल्पादपि घटो नास्तीति प्रतीत्यापत्तेः। गवि शशशृङ्गाभावप्रतीतेरसिद्धेः शशशृङ्गं नास्तीति शशे शृङ्गाभाव इत्यर्थः। इति व्यधिकरणधर्म्मावच्छिन्नाभावमूलं समाप्तं।

व्यधिशि—

ओंशिवाय। समवायितयेति वाच्यत्वं यथा न समवायि तथा वच्यते घटादिसमवायितयेत्यर्थ इत्यप्याहुः। प्रमेयसाध्यके च भावत्वेनाभावानामभावत्वेन भावानां वह्नित्वेन निर्वह्निवद्वृत्तिमात्र-

व्यभिचारधीविरोधिधीविषयत्वं व्याप्तित्वम्

वृत्तिगगणत्वादिना विरुद्ध;घटत्व-पटत्वोभयाभयाच्च प्रमेयमात्रस्याभावः सुलभः । ननु पारिभाषिकमेवाव्यभिचरितत्वं तथाहि यत् समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्त्वं । सर्व्वत्र वाच्यत्वाद्यभावस्य तथात्वात् यावत्वोपादानं । अतएव भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्यातथात्वान्नातिप्रसङ्गः साधनसमानाधिकरणगोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि । येन सम्बन्धेन हेतुस्तेनैव तदधिकरणं वोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः । एवं दृष्टान्तरेऽपि सम्बन्धभेदनिवन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः । रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव, प्रलये परमाणावुत्पत्तिकाले चावयविनिच तत् सत्त्वात् । नच प्रतियोगिवद्ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वं मानाभावात् अतएवान्तरश्यामे रक्ते रूपं नास्तीति प्रत्ययः नचैष रक्तिमध्वंसाद्यवगाही पूर्व्वापररक्तिमध्वंस-प्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात् । तत्सामानाधिकरण्यञ्च स्वविशिष्टहेत्वधिकरणावच्छेदेन वोध्यं । तेन गोत्वजन्यद्रव्यत्व-प्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणक्षणावच्छेदेन तद्वति काले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसङ्गः हेतुमति प्रलये तत्सामानाधिकरण्याभावात् । स्वविशिष्टेति

विशेषणात् कपिसंयोगाभाववान् मेयत्वादित्यादौ संयोगाद्यात्म-
कस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः ।
जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो नतु
धूमाद्यभावः जलादावपि तदभावप्रत्ययप्रसङ्गात् ॥ ० ॥

यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकता-
वच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रति-
योगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत् ।
ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव शेषं दर्शितदिशा-
वसेयं अतश्चाह प्रतियोग्यवृत्तिश्चेति । केचित्तु व्याप्यवृत्तेर्हेतु-
समानाधिकरणस्य साध्याभावस्य प्रतियोगितायाः अनवच्छेदकं
हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य
वाभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्
साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः एवञ्च
व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते हेतौ साध्यतावच्छे-
दकावच्छिन्न-साध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदके हेतुम-
न्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् अव-
च्छेदकत्वञ्च तत् पर्य्याप्त्यधिकरणं तेन विशिष्टवह्न्यभावस्य
ह्रदत्व-वह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि
वह्नित्वस्य न क्षतिः सत्त्ववति च गुणादौ संयोगाद्यभावोऽपि व्याप्य-
वृत्तिः, वक्ष्यमाणस्या प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव
तदवच्छेदकत्वमिहापि बोध्यं भवति च गुणत्व-गुणावृत्तित्व-द्रव्य-
मात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभाव प्रतियोगि-
तावच्छेदक गुणत्वाद्यनतिरिक्तवृत्तेरेव संयोगत्वमित्याहुः ॥ ० ॥

साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकत्वसमानाधिकरणसाध्याभावत्वकत्वं । यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं व्याप्तिरिति तु न युक्तं सर्व्वत्र साध्याभावपदवैयर्थ्यात्, यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न अनुमित्यविरोधित्वज्ञानस्यानुमितिहेतुत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात् । केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वं साजात्यञ्च समानासमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साध्याभावाश्च पूर्व्वोक्तद्वितीयरीत्या प्रत्येतव्याः व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसमानाधिकरणो वा तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्व्वा साध्यस्याभाववति वृत्तावपि हेतोर्नाव्याप्तिः तत्तदधिकरणवृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तितात्वव्यापकव्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तसमानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिताको वा वोध्यः तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभाव मादाय नातिप्रसङ्गः अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं वोध्यं तेन वह्न्यभाववति स्वावयवे वृत्तावपि धूमस्य न दोषः । इत्थञ्च साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिरिति ।

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वं। साधनस्य तादृशव्यापकाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्य तु न वाच्यं द्रव्यं सत्त्वादित्यादौ सत्त्वादेस्तादृशाभावव्यापकगुणकर्म्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकाभाव प्रतियोगित्वादतिव्याप्तेः। ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः। यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः। परेतु वृत्तिमद्धेतयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः। येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन वृत्तिमद्धेतय इत्यत्रापि वृत्तिमत्त्वं बोध्यं तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्ति स्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादावसत्वेऽपि न क्षतिः साध्याभावश्च पूर्व्ववद्बोध्यः तद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तितात्वव्यापक-प्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तेन समानाधिकरणेन-वृत्तित्ववृत्तिनावा-धर्म्मेणानवच्छिन्नप्रतियोगिताको वा बोध्यः तेनालोकावृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यत्नेन्धनत्वाद्यवच्छिन्न वह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वभिन्नसत्त्वेऽपि न

त्यतिरित्याहुः। अन्ये तु वृत्तिमत्त्वयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्वं तादृशवृत्तित्वाभावः स्वव्यापकतादृशवृत्तित्वत्वव्यापक-प्रतियोगिताको वोध्यः प्रयोजनञ्चोक्तप्रायं साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य च व्यधिकरणधर्म्मावच्छिन्नस्यैवाभावस्य वृत्तिमत्त्वित्वाद्यभिचारिण्यतिव्याप्तिरतो समुदायेति साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन वोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्व्वतवह्न्यवयवसंयोगि च पर्व्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्भिन्नवृत्तित्वाद्यवच्छिन्न-प्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च व्याप्ति रतिव्याप्तिर्व्वा नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभाव-कुटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्याहुः। तन्न पृथिवीत्व-द्रव्यत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः। अपिच इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरण-गुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तिः, द्रव्यत्वत्वाद्यवच्छिन्न-प्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्। किञ्च रूपाभावसाध्यकसद्धेतौ साध्याभावसमुदाय-निविष्टसकलरूप-व्यक्त्यधिकरणाप्रसिद्धिः। यावता

मभावानामैकाधिकरण्यं सम्भवति तावतां समुदाये विवक्षितेऽपि इदं पृथिवीवृत्तिगुणशून्यं सत्त्वान्यपृथिवीसमवेत-शून्यं वा वायुत्वात् रूपवदन्यत्वादित्यादावतिव्याप्तिः तत्रसाध्याभावस्तोमस्य नियमतोरूपादिघटितत्वेन तद्वति हेतोरवृत्तेः। वस्तुतो निखिलानामेवरूपाणां तादृशाभाव-सहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणा-प्रसिद्धिर्दुर्व्वारैव इति। किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववतिवृत्ति स्तदभावो वक्तव्यः अन्यथाधूमादाववाप्तिः साध्यतावच्छेदकसम्बन्धेन साध्याभाववति महाकाले वृत्ति-मन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसङ्गो वा तथाच सत्तादि-साध्यके संयोगेन समवायेन वा हेतावव्याप्तिः साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः। साधनसमानाधिकरणत्वेन साध्याभावाविशेषणीया इति चेत् विशेष्यन्तां तथापि भूतत्व-मूर्त्त-त्वान्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः तादृश-साध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणता-विशेषेण हेतावतिव्याप्तिः तादृशसाध्याभाव-समुदायवति महाकाले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः। एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियो-गिताकव्याप्यवृत्ति स्वसमानाधिकरण-यावदभावाधिकरणवृत्ति-त्वाभावा वृत्तिमद्वृत्तयो यावन्तस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्ति-

कालावच्छेदेन वर्त्तमानोऽपि नव्याप्यवृत्तिः उक्तरूपावच्छिन्न-प्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न साधनसमानाधिकरणा उक्तसमुदायाधिकरणवृत्तित्व तदभाव-वृत्तिमत्त्वानि पूर्व्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तं तद्विशि-ष्टेति विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्य प्रत्यये-हेतुत्वात् अभावप्रत्ययोर्हि घटत्वादिविशिष्टस्य घटादेः प्रति-योगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्व-मवगाहते न स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः तदिहाभाव-प्रत्ययो यदि व्यधिकरणेन धर्म्मेण विशिष्टं प्रतियोगिनं नावगा-हते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वं अथावगाहते तर्हि भ्रम एव नहि ततोऽर्थसिद्धिरिति भावः यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यादि-रनुभवस्तदातादृशाभावनिवारणं गीर्व्वाणगुरूणामप्यशक्यमिति-मन्तव्यं इति व्यधिकरणधर्म्मावच्छिन्नाभावीय-रघुनाथशिरोमणि-कृत दीधिति-टीका समाप्ता ।

अथ व्यधिकरण-धर्म्मावच्छिन्नाभावीय-जागदीशी टीका ।

ओं नमः शिवाय । नन्वीश्वरेच्छारूपवाच्यत्वस्य गुणत्वादि-समवायित्वात्तद्व्यधिकरणधर्म्मो न समवायित्वमित्यत आह

क्षणावेयमहावंशे सार्व्वभौमोपनामकः मूलग्रामनिवास्यासीत् शिवचन्द्रः शिवप्रभः ।१। वाचष्पत्युपाधिकश्च गङ्गाधरस्तदात्मजः तत्तनयो महेश्वर न्यायवागीश तार्किकः ।२। तस्य पुत्रो जितेन्द्रियः क्रियावान् कर्म्मवित् सुधीः राजेन्द्रचन्द्रो राजेन्द्रपूजिताङ्घ्रिद्वयाब्जकः ।३। न्यायपञ्चाननख्याति रामगोपालधीमता तत्तनुजेन तपसा लब्धा कीर्त्तिं गतोदिवि ।४।

घटपदं वा – घटत्वं च – घटपद ज्ञानजन्यबोध विषयत्व कारता निरूपेक्ष ईश्वरीय विषय ... निरोधश्च पेरा ... न्यायत्वानुपपत्ति तादृशी ...

वाच्यत्वमिति अस्माच्छब्दादय मर्थो बोद्धव्य इतीश्वरेच्छाविषयत्वं पदार्थान्तरमेवा (१) वाच्यत्वं नतु तादृशेच्छामात्रमतिप्रसक्तत्वात् (२) तच्च न कस्यापि समवायीति भावः । समवायितयेति

तर्कव्याकरणाङ्ग-वेदकवितावेदान्त-सांख्यावली-मीमांसाचयसंहिताभिरञ्चितः शास्त्रैश्च युक्त्यादिभिः ॥ ध्वस्तब्रह्मनिरूपणाहृत मनः पापण्डगर्व्वावलि बांशीरेश्वरमन्दिरे शिवमणा देवीश शक्तिङ्गतः ।५। न्यायभूषणोपनाम चन्द्रमणिस्तदात्मजः भारते सुयशो यस्य रवेः रंशुरिवाभवत् ।६। राधाकान्तस्तदग्रजो धार्म्मिकस्तत्त्वशास्त्रविद्वत्तमल्लानघशिष्यः कीनाव हृष्ट धूर्जटिः ।७।

विद्याम्बरोध्यापितदुर्गतर्कोदिङ्मण्डलव्यक्तयशोदयाचित् शिवेति काशीति सदाप्रभाषी जितेन्द्रियोधर्म्मवचोणरक्तः ।८। तर्कालङ्कार विख्यात रामकुमारनामकः राजा गोपालबालेन स्थापितस्तत् सुतः शुचिः ।९। तस्य पुत्राः पञ्च जाताः प्रथम स्तर्कशास्त्रवित् काशीनाथ तर्करत्नो ज्योतिर्व्वित् सुतपाः सुधीः ।१०। गौरीनाथो द्वितीयश्च ज्योतिर्व्विद्धार्म्मिकः शुचिः चतुर्थपञ्चमौ पुत्रौ दिवङ्गतौ विपश्चितौ ।११। तृतीयस्तपसाश्रेष्टस्तन्त्रमन्त्रविशारदः । श्रीप्रसन्नचन्द्र नामा सरलो दम्भवर्जितः ।१२। तदात्मजो राजमणीति नाम्नी, तपोवरिष्ठाच सती गरिष्ठा ॥ प्रसन्नचित्ता, जननीहि यस्य स तर्कवागीशकनामलब्धः ।१३। समालोक्य पुस्तकस्थां पूर्व्वलोकेन निर्म्मितां टीप्पनीं सङ्गतां काञ्चित् मन्दाचरणः श्रिया । १४ सदाशिवाङ्घ्रिद्वयमाशिवाय प्रवन्द्य वृन्दारकवृन्दवन्द्यं उपाधिलाभीपञ्चतिप्रयामः प्रभेति टीकां तनुते यथाधि ।१५।

अथ प्रभा ।

श्रीं नमो गणेशाय । भगवदनभ्युपगन्तृनये ईश्वरेच्छाविषयत्वरूपवाच्यत्वं न सम्भवतीति आह पदार्थान्तरस्यैति (१) ननु वाच्यत्वमीश्वरेच्छा सा च घटपदात् घटोबोद्धव्य इत्याकारिका घटो घटपदजन्य बोधविषयतावान् भवतु इति पर्य्यवसायिनी सा च पटःपट पदजन्य बोधविषयतावान् भवतु इत्याकारिकापि ईश्वरेच्छायाः सर्व्वविषयकत्वात् तथाच घटोघटपदवाच्यइत्यस्य वचधातोर्ब्बोधविषयत्वप्रकारकेश्वरेच्छारूपोऽर्थः तदेकदेशे बोधे घटपदस्य जन्यतासम्बन्धेनान्वयः यदि तादृशेच्छायाविषयता सम्बन्धेनान्वयस्तदा घटपदजन्य बोधविषयत्वप्रकारकेश्वरेच्छायाएव पटपदजन्य बोधविषयत्वप्रकारकेश्वरेच्छारूपत्वात् तस्या विषयतासम्बन्धेन पटेऽपि सत्त्वात् पटेऽपि घटपदवाच्यत्वापत्तिरतो घटपदजन्यबोध-

मूलस्य समवायिकारणतयेत्यर्थं इत्याहुः नन्विदं वाच्यं ज्ञेयत्वा-
दित्यादौ समवायितया वाच्यत्वाभावस्य प्रसिद्धावपि प्रमेयवान्
वाच्यत्वादित्यादौ तदप्रसिद्धेरनुद्धाराम्मूलस्य न्यूनत्व (३) अत आह
प्रमेयेति भावत्वेनाभावानामभावः सर्व्वत्र सुलभ इत्यन्वयः।
ननु भावत्वेनाभावो नास्तीति प्रतीतिरभावस्यैव प्रतियोगित्व-
मवगाहते नचैतावता प्रमेयमात्रप्रतियोगिकाभाव प्रसिद्धि (४)
रत आह वह्नित्वेनेति वह्नित्वेन निर्व्वह्नौ सर्व्वेषामभावः सुलभ
इति योजना ननु जले वह्नित्वेन प्रमेयं नास्तीति प्रतीतिरेव ~~प्रमेय~~-
र्वह्निमात्रप्रतियोगिकाभावमात्रमवगाहते नतु प्रमेयसामान्य-
प्रतियोगिकं वह्निमति तादृशप्रतीत्यनुत्पत्त्या वह्निप्रतियोगिका-

---

विषयत्वप्रकारतानिरूपितेश्वरेच्छीयविषयत्वमेव घटपदवाच्यत्वं वक्तव्यं तथाचेश्वरेच्छाया
एकत्वेऽपि प्रकारतायाभेदेन तादृशविषयताया भेदात् घटपदवाच्यत्वस्य पटे विरहान्न
घटपदवाच्यः पट इति व्यवहारापत्तिः। नच घटपदजन्य बोधविषयतावान् भवत्विती-
श्वरेच्छैव नटपदवाच्यत्वमस्तु तादृश वाच्यत्वन्तु स्वीयतत्तत्पदजन्य बोधविषयत्व निष्ठप्रकारता-
निरूपित विषयत्व सम्बन्धेन पदार्थे वर्त्तते तथाच घटपदवाच्यः पट इति व्यवहारस्य
नापत्तिः कथं मतु तादृशेच्छामात्रमतिप्रसक्तत्वादिति ग्रन्थसङ्गतिरिति वाच्यं धातुनैव शक्ति-
प्रतिपादनात् प्रत्ययस्य निरर्थकत्वापत्तेः। अतिप्रसक्तत्वपदेन प्रत्ययस्यनिरर्थकत्वसूचनाग्र-
न्थासङ्गतिरितिध्येयं केचित्तु तादृशसंसर्गास्वीकारेण ग्रन्थावतार इत्याहुः (२)
अकथन प्रयोज्यानुमितावोधकतावत् पुरुषोच्चरितत्वं मूलनिष्ठं न्यूनत्वं (३) प्रमेयमात्रस्याभावः
सुलभ इत्यादिग्रन्थेन सार्व्वभौमीय समुदाय पदघटितलक्षणाभिप्रायेण अभावाः भियन्ते
इति तात्पर्य्यमवश्यं वक्तव्यं ननु भावत्वेनाभावः कथं धृतः स्वव्यापक साध्यतावच्छेदक
व्यापक प्रतियोगितायाः तत्र निविष्टत्वात् इतिचेन्न समनियताभावानामैक्यमते स्वनिरूपका-
भावनिरूपितप्रतियोगितावत्त्वसम्बन्धेनाच !साध्यतावच्छेदकव्यापकप्रतियोगित्वं निवेशनीयं
तथाच भावत्वेनाभावाभावस्याभावत्वेन भावाभावस्य चैक्यात् तादृशाभावीयप्रतियोगित्वस्य
तादृश सम्बन्धेन सर्व्वत्र सत्त्वात् तादृशप्रतियोगिताकाभावस्य लक्षणघटकत्वात् नच सम
नियताभावानामैक्यमते यदि ग्रन्थस्तदा समवायित्वेन वाच्यत्वाभावस्योपेक्षाया निर्व्वीजत्वमिति

भावावगाहित्वस्यावश्यकत्वा (५) इत आहाहृत्तीति तथाच गगणत्वेन प्रमेयं नास्तीति प्रतीतेरेव प्रमेयसामान्यप्रतियोगिकाभावप्रसिद्धि र्नहि तत्रापि गगणमात्रप्रतियोगित्वं भाषत इति शक्यते वक्तुंविनिगमकाभावेन (६) प्रमेयमात्रस्यैव प्रतियोगित्वमवगाह्यते बाधकाभावात् । कालिकसम्बन्धेन गगणत्वादिविशिष्टस्य प्रमेयस्य सर्व्वत्र नाभाव: सम्भवतीत्यत उक्तं अवृत्तिमात्रवृत्तीति तथाच यादृशेन सम्बन्धेन गगणत्वादेर्वृत्तिमदवृत्तित्वं

वाच्यं समवायित्वस्य वाच्यत्वव्यधिकरणधर्म्मत्वे सर्व्वसम्मतत्वाभावेन तदुपेक्षितत्वादिति धेयं (४) ननु (५) स्वरूपेण साध्यतायां वह्निमत्यपि साध्यतावच्छेदकसम्बन्धेन वह्नित्वेन प्रमेयाभावस्य सत्त्वात् ग्रन्थासङ्गति, रत्र केचित् स्वरूप-संयोग-कालिकान्यतमसम्बन्धेन साध्यत्वमित्यभिप्रायान्न ग्रन्थासङ्गतिरित्याहु स्तच्चिन्त्यं। नव्यास्तु यावन्त: सम्बन्धा स्तावदन्यतमसम्बन्धेन प्रमेयसाध्यकस्थलस्याभिप्रेतत्वात् संयोगसम्बन्धेनापि प्रमेयसामान्याभावप्रसिद्धि: कार्य्येति न ग्रन्थासङ्गतिरिति ध्येयं । अत्रतु सार्व्वभौमीयलक्षणे हेतुसमानाधिकरणत्वेन साध्याभावस्य निविष्टतया संयोगेन व्यतिरेकिप्रमेयसाध्यकस्थले साधनसमानाधिकरण साध्यसामान्य प्रतियोगिकाभाव प्रदर्शनार्थं वह्नित्वेन निर्व्वह्निवितुरत्तां एवं कालिकेन प्रमेयसाध्यकस्थले जन्यत्वादिहेतोरेव लक्ष्यत्वेन न कालिकेन प्रमेयसामान्याभाव: हेतुसमानाधिकरण: किन्तु गगणत्वादिना प्रमेयाभाव एवेति कालिकेन प्रमेयसाध्यकस्थलेऽपि तथाप्रदर्शनाय प्रमेयसामान्याभावमुपेक्ष्य गगणत्वेन प्रमेयाभावोक्तत: नच गगणादेर्वृत्तिमत्त्वमते गगणत्वेन प्रमेयाभावस्य हेतुसामानाधिकरण्याभावेनोत्तरग्रन्थासङ्गतिरिति वाच्यं कालिकेन महाकाल एव वृत्तिमत्त्वं नतु प्रलये गोत्वजाते: प्रलयावृत्तित्वस्वीकर्त्तुं नये वक्तुं शक्यते तन्मते प्रलयरूपहेत्वधिकरणवृत्तिरेव तादृशाभाव इति तन्मताशयेनोत्तरग्रन्यसङ्गतेरिति समादधिरे (६)। विवादास्पदीभूतयो र्थयो रेकतर नियम-एकत्र पक्षपातियुक्ति र्व्वा विनिगमना अस्यायमाशय: वह्नित्वेन प्रमेयाभावस्य वह्निमत्यसत्त्वेन वह्नौ प्रतियोगित्वमवश्यं स्वीकार्य्यं तथाच प्रतियोग्यधिकरणतया सह विरोधित्वकल्पनेन कृतकल्पता अत्रच गगणत्वेन प्रमेयाभावस्य केवलान्वयित्वेन विरोधित्वकल्पनासम्भवेन, गगणनिष्ठप्रतियोगित्व-प्रमेयसामान्यनिष्ठ प्रतियोगित्वयो रेकतरानियमेन विनिगमनाविरहादुभयत्र प्रतियोगित्वं इति। (७) स्वरूपसम्बन्धावच्छिन्न-

(७) तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताको गगणत्वादिना प्रमेयसामान्याभावो वाच्य इतिभावः। ननु कालिकसम्बन्धेन प्रमेयसाध्यकस्थले कालिकसम्बन्धेनैव साध्याभावस्य-प्रसिद्धिः कार्य्या सा च कालिकसम्बन्धेन गगणत्वेन प्रमेयं नास्तीति प्रतीत्या न सम्भवति तत्सम्बन्धेन गगणादेर्वृत्तिमत्तमते तादृशप्रतीतेर्गगण प्रतियोगिकत्वावगाहिताध्रौव्ये तत एवोपपत्तौ प्रमेयान्तरप्रतियोगिकत्वे मानाभावादत आह विरुद्धेति तथाच घटत्व-पटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या निखिलप्रमेयप्रतियोगिकस्तत्राप्यभावः प्रसिद्ध इति भाव इदमुपलक्षणं संयोगादिसम्बन्धेन घटत्वादिकमपि प्रमेयावृत्तीति तत्सम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोऽपि वोध्यः। ननु अप्रसिद्धिदोषस्यैव सत्त्वान्मूले प्रतियोग्यवृत्तिश्चेति दोषान्तरं किमुपात्तमतस्तदवतारार्थं शङ्कते नन्विति पारिभाषिकमेवेत्येवकारेण नव्यभिचारोऽव्यभिचार इति योगार्थो व्यवच्छिद्यते अव्यभिचरितत्वमिति अथेदं वाच्यं ज्ञेयत्वादित्यादि-ग्रन्थाभिप्रेतमिति शेषस्तथाच (८) नचैवं घट एवेत्यादिमूलस्य केवलान्वयिनो व्यभि-

गगणत्वनिष्ठावच्छेदकताकप्रतियोगिताकोऽभाव इत्यर्थः। (८) ननु केवलान्वयिस्थले व्यभिचारासम्भवेऽपि व्यभिचारज्ञानविरोधिज्ञानविषय-साध्याभाव-सामानाधिकरण्याभावरूपव्याप्तेरप्रसिद्धत्वेन कथमस्मान्तस्य केवलान्वयिसाध्यकानुमितिरिति विभाव्य तादृशसाध्याभाव-सामानाधिकरण्याभावो व्याप्तिस्तथा चाप्रसिद्धिरित्युक्तं नच पारिभाषिकव्याप्तिज्ञानस्यानुमितिहेतुत्वे व्यभिचारज्ञानविरोधिज्ञानस्यानुमितिहेतुत्वमिति नियमभङ्गःस्यादिति वाच्यं संशयमन्त्यादिन्यायेन पारिभाषिकव्याप्तिज्ञानस्य व्यभिचारज्ञान प्रतिवन्धकत्वात्। इदमप्यनुचितमिति दर्शयितुं प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतार इति मूलस्य तात्पर्य्यात्

चारित्वे नालक्ष्यताप्रदर्शनपरत्वान्न पूर्व्वमूलासङ्गतिरिति ध्येयं ॥ यदित्यादि (९) अत्र यत्समानाधिकरणा इत्यस्यानुक्तौ साध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वसामान्याभावस्यापि यावदन्तर्गतत्वात्तस्य च व्यापकताघटकसमवायसम्बन्धेन प्रतियोग्यधिकरणे केनापि सम्बन्धेनावृत्तित्वादय मात्माज्ञानादित्यादावव्याप्तिरतस्तदुपात्तमित्यग्रे स्फूटो भविष्यति न चात्मत्वाभावोऽपि समानकालीनत्वादिसम्बन्धेन प्रतियोग्यधिकरणवृत्तिः तथा-

---

पारिभाषिकाव्यभिचरितत्वस्य मूलाभिप्रेतत्वे तादृशव्याप्तेरनावश्यकत्वेऽपि साध्यसाध्याभावसामानाधिकरण्याभावो व्याप्तिरित्यादिमूलस्य नासङ्गतिरिति ध्येयं ।

(९) ननु आत्मसामान्ययोर्नात्मत्वमिति प्रतीत्यात्मसामान्योभयत्वावच्छेदेन आत्मत्वसामान्याभावस्यात्मनि वर्त्तमानत्वात् कथमत्राव्याप्तिरिति अत्र केचित् आत्मत्वसामान्याभावपदेनात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विवक्षितत्वात्तदभावमादाय तत्राव्याप्तिसम्भवः न चात्मसामान्ययो र्नात्मत्वप्रकारकप्रमाविशेष्यत्वमितिप्रतीत्या तादृशोभयत्वावच्छेदेनात्मनितदभावस्य वृत्तितया नाव्याप्तिरिति वाच्यं तादृशप्रतीते स्तादृशप्रमाविशेष्यत्व एव तदुभयनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभावावगाहितयैवोपपत्ते स्तदभावस्यात्मवृत्तित्वाभावादित्याहुस्तच्चिन्त्यं । नव्यास्तु रूपध्वंसस्वरूपाभावमादायाव्याप्तिवारणाय यत्सामानाधिकरण्यदलमित्याहुः । व्यासज्य वृत्तिधर्म्मावच्छिन्नानुयोगिताकैकदेशभेदास्वीकारादात्मभेदमादायोक्ताव्याप्तिपरिहाराय यत्सामानाधिकरण्यं निवेशितमित्यपरे । ननु वह्निमान् धूमादित्यत्र प्रलयत्वादिस्वरूपाभावस्य यावदन्तर्गततया स्वविशिष्टहेत्वधिकरणाप्रसिद्धयाऽव्याप्ति सम्भवेऽयमात्मा ज्ञानादित्यादावव्याप्तिदानमनुचितं चेन्न तत्राभावे महाकालावच्छेदेन प्रतियोगिसामानाधिकरण्यात् स्वविशिष्टहेत्वधिकरणावच्छेदेनोक्तावेव तत्राव्याप्तिरत तूभयथैवेत्यावेदयितुं प्रसिद्धस्थलस्य त्यक्तत्वात् । केचित्तु महाकालस्यापि हेतुसम्बन्धितया वह्निमान् धूमादित्यत्राव्याप्तिसम्भावनैव नास्तीति वदन्ति ननु तथापि धर्म्मानवच्छिन्नत्वस्य धर्म्मावच्छिन्नत्वस्य वा तादृशप्रतियोगितायां निवेशेऽय मात्माज्ञानादित्यत्रात्मत्वसामान्याभावस्य यावदनन्तर्गततयाऽव्याप्त्यभावादर्थं यत्सामानाधिकरण्यादलं न च सामान्याभावस्य लक्षणाघटकत्वे

विधसम्बन्धानां वृत्त्यनियामकत्वात् क्वचिदपि तेन सम्बन्धेन वृत्तिमत्ताप्रतीतेः इत्यञ्च हेतुसमानाधिकरणत्वमपि हेत्वधिकरणाधेयत्वं ग्राह्यं तेनात्मत्वाद्यभावस्यापि हेत्वधिकरणसम्बन्धित्वान्नोक्तदोषतादवस्थ्यं।

(१०) नच हेतुसमानाधिकरणा इत्यपहाय साध्यसमानाधि-

व्यभिचारिण्यतिव्याप्तिरितिवाच्यं तत्र गगणेन साध्याभावस्य व्यभिचारिस्थलान्यत्वाभावस्य च यावदन्तर्गतस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यादिति अत्र केचिद्-वृत्तित्वधर्म्मो न प्रतियोगितावच्छेदक इत्युक्त एव सामञ्जस्ये प्रतियोग्यवृत्तीत्यादिमूलस्य सन्दर्भविरोधात् समनियताभावानामैक्यमते गगणेन साध्याभावादेर्घटत्वेन वाच्यत्वाद्यभावरूपतयाऽतिव्याप्त्यापत्तेर्योक्तनिवेशासम्भवात् उक्ताव्याप्तिवारणाय यत्सामान्याधिकरण्यदलमित्याहुः। अथात्र गगणस्वरूपाभावमादायासम्भवसम्भवेऽव्याप्तिदानमसङ्गतं चेन्न वृत्तिमत्त्वेन तादृशाभावस्य निवेशेऽसम्भवो न स्यादिति मनसि कृत्वाव्याप्तिरित्युक्तत्वात्। ननु प्रतियोगि-सामानाधिकरण्यमित्यस्य प्रतियोग्यधिकरणसम्बन्धित्वार्थकत्वे आत्मत्वसामान्याभावस्यापि स्वविषयकनित्यज्ञानविषयत्वसम्बन्धेन प्रतियोगित्वाश्रयसामानाधिकरण्यान्नाव्याप्तिरिति कथं यत्सामानाधिकरण्यदलेन चेन्न सर्व्वत्र गगणस्वरूपतादृशाभावमादाय लक्षणसम्भवेन उक्ता-सङ्गतेः। वृत्तित्वनिवेशेऽप्युक्तदोषवारणसम्भवेऽपि यथासन्निवेशेन न वैयर्थ्यमितिध्येयं अत्र प्रतियोगिसामानाधिकरण्य मित्यस्याधेयतासम्बन्धेन प्रतियोग्यधिकरणविशिष्टत्वमर्थः एतेन प्रतियोग्यधिकरणतानिरूपितवत्त्वनिवेश एव सम्यक्तौ आधेयत्वदलं व्यर्थमित्यपि प्रत्युक्तं। नच प्रकृतसाध्यव्यापकतावच्छेदका प्रतियोगिताका यावन्तो व्यधिकरणधर्म्मावच्छिन्नाभावाः स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणा इत्युक्तितएवोक्तलक्षण-परिष्कारसम्भवे यत्सामानाधिकरण्यदलं व्यर्थमिति वाच्यं समनियताभावाना मैक्यमते धूमवान् वह्नेरित्यादौ धूमत्वेन वाच्यत्वाद्यभावस्य घटत्वेन धूमाभावाभिन्नतया प्रतियोगि-सामानाधिकरण्यादतिव्याप्तेः॥

(१०) द्रव्यमात्मत्वादित्यत्र आत्मत्वद्रव्यत्वोभयाभावादिकमादाय दैशिकविशेषणतया साध्यसामानाधिकरण्योक्तावपि व्याप्तिघटके गौरवोक्तिरयुक्तेति चेन्न उक्तप्रतियोगितायां

करणा यावन्तस्तादृशाभावाः स्वविशिष्टयद्धर्म्मावच्छिन्नहेत्वधि-करणावच्छेदेन प्रतियोगिसमानाधिकरणाः स्वधर्म्मवत्त्वमित्येवं कुतो लक्षणं न कृतमिति वाच्यं द्रव्यमात्मत्वादित्यादौ महाकाले साध्यसमानाधिकरणस्य द्रव्यत्वादिसामान्याभावस्य स्वविशिष्ट-हेत्वधिकरणाप्रसिद्ध्या तत्राव्याप्तिप्रसङ्गात् नच दैशिकविशेष-

---

वैशिष्ट्यासञ्ज्यवृत्ति-धर्म्मानवच्छिन्नत्वस्य तादृशोभयाभावमादाय अव्याप्तिवारणाय निविष्टतया-गौरवस्यैव पर्य्यवसितत्वात्। न चायमात्मा आत्म-गगनान्यतरत्वादित्यत्रातिव्याप्तिः साध्यसामान्या भावस्य व्यभिचारस्थलान्यत्वाभावस्य च लक्षणाघटकत्वेन व्यधिकरणधर्म्मावच्छिन्नसाध्याभाव एव धर्त्तव्यः तस्य च समनियताभावानामैक्यमते वाच्यत्वरूपप्रतियोगिसामानाधिकरण्यात् इतिवाच्यं समनियताभावानामैक्यमस्वीकृत्यैव एतल्लक्षणकरणात्। न चात्र आत्मत्वाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावे साध्ये आत्मत्वादावव्याप्तिः आत्मात्वाभावरूप-साध्याभावस्य गगनाद्यन्तर्भावेन साध्यसमानाधिकरणस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्धेरिति गौरवाभिधान मसङ्गत मितिवाच्यं। द्वितीयव्यापकताकल्पे तादृशाभावस्य लक्षणाघटकत्वात् यत्प्रतियोगिताकाभावे यादृशप्रतियोगित्वाश्रय-सामानाधिकरण्य-जगद्वृत्तिभिन्नत्वोभया-भावस्तादृशप्रतियोगिताकाभावस्य विवक्षणाद्वा उक्ताव्याप्तिनिरासात्। ननु यत्सामानाधि-करण्यापेक्षया साध्यसामानाधिकरण्यनिवेशे लाघवाभावात् कथं न चेत्यादिग्रन्थावतारश्चेन्न साध्यसामानाधिकरण्यनिवेशपक्षे साध्यतावच्छेदकविशिष्टाभावकूटविशिष्ट-हेतुताव च्छेदकमेव व्याप्तिरित्यर्थः। साध्यतावच्छेदकवैशिष्ट्यन्तु स्वावच्छिन्नसामानाधि-करण्य-स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसम्बन्धेन तादृशाकूटवैशिष्ट्यन्तु स्वविशिष्टाभावकालीनत्वसम्बन्धेन अभावे स्ववैशिष्ट्यन्तु स्वतादात्म्य-स्वप्रतियोग्यधिकरण-तावृत्तित्वोभयसम्बन्धेन प्रतियोग्यधिकरणतावृत्तित्वन्तु स्वविशिष्टहेत्वधिकरणत्वव्याप-कत्वसम्बन्धेन यत्सामानाधिकरण्यनिवेशपक्षेतु हेतुतावच्छेदकविशिष्टाभावकूटविशिष्ट-हेतुतावच्छेदकमेव व्याप्तिर्वाच्या अभावकूटे हेतुतावच्छेदकवैशिष्ट्यन्तु स्वावच्छिन्नसामाना-धिकरण्य-स्वकालीनप्रकृतसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसम्बन्धेन, अन्यत् सर्व्वं पूर्व्वोक्तदिशावोध्यं। तथाच सम्बन्धान्तर्गत-कालीनत्वादिप्रवेशाप्रवेशयोरेव गौरवलाघ-वयोः सम्भावनां मनसिकृत्य नचेत्यादिग्रन्थावतारात् इति विशेषतो ध्येयं ननु एतल्लक्षणे यावत्

…तियोगिसामानाधिकरण्ये … अवच्छेदकत्वं अन्यथा धूमाभावादि… भाव प्रतियोगिसामानाधिकरण्यमस्तीति धूम… व्याप्तिः

यताविशेषेण साध्याधिकरणवृत्तित्व विवक्षणेनाव्याप्तिवारणसम्भव इति वाच्यं तथासति गौरवात् ।

(११) यत्तु यत्समानाधिकरणायावन्तस्तादृशाभावाः साध्यसमानाधिकरणास्तत्त्वमित्येव लक्षणमस्तु स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशे बीजाभाव इतितत्तुच्छं तथासति यत्समानाधिकरणायावन्तोऽभावाः साध्यसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाइत्यस्य व्यर्थतापत्तेः तन्मात्रोक्तौच विनापि व्यधिकरण-

---

पदं व्यर्थं इति तन्न धूमवान् वह्नेरित्यादौ घटत्वेन वाच्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यादतिव्याप्तेः । अथ प्रकृतेऽपि घटत्वेन धूमाद्यभावस्यैव लक्षणघटकतया तस्य च घटत्वेन वाच्यत्वाभावतया प्रतियोगिसामानाधिकरण्यादतिव्याप्तिश्चेन्न तद्वारणार्थं अभावपदं अनुयोगितापरं सामानाधिकरण्यद्वयं तादृशवृत्तितावच्छेदकत्वपरं तथाहि घटत्वेन धूमाभावत्वरूपानुयोगितायाः यावदन्तर्गतत्वात् तस्याः तादृशप्रतियोग्यधिकरण वृत्तितानवच्छेदकत्वात् स अनियताभावानामैक्यास्वीकाराद्वा नातिव्याप्तिः इति विभावनीयं ।

(११) नन्वत्र साध्यसामानाधिकरण्यस्य हेत्वधिकरणावच्छेदेनोक्ततया तत्रएव सामञ्जस्ये यत्सामानाधिकरण्य यावत्पदं स्वविशिष्टत्वंच व्यर्थं स्यात्, कथं केवलं तादृशाभावाइत्यस्य वैयर्थ्योक्तिः सङ्गता चेन्न ? कालोगोमान् गोत्वादित्यादौ प्रलयत्वस्वरूपाभावमादायातिव्याप्तिवारणसम्भवात् हेत्वधिकरणावच्छेदेनेत्यादेरप्रवेशेन यथासन्निवेशे वैयर्थ्याभावात् नचोक्ताभावस्य कालिकेन साध्यसमानाधिकरणतया तत्रातिव्याप्तिरिति वाच्यं ; दैशिकविशेषणतया साध्यसामानाधिकरण्यस्य विवक्षितत्वात् एवं वह्न्याद्यभावमादायाव्याप्तिवारणार्थं यत्सामानाधिकरण्यमपि तेनैव सम्बन्धेन वक्तव्यमिति ध्येयं। ननु तथापि यत्समानाधिकरनायावन्तः साध्यसमानाधिकरणास्तत्त्व मित्यस्यैव सम्यक्त्वे अभावपदस्यापि व्यर्थत्वेन तदनुक्तौ कथं न जगदीशग्रन्थस्य न्यूनत्वं ? सत्यं, तादृशाभाववैयर्थ्यस्यैव व्यधिकरणधर्मावच्छिन्नाभावानुव्यापकतया प्रकृतोपयोगित्वेन तन्मात्रनिर्देश मिति । केचित्तु अभावाघटितस्य लक्षणान्तरत्वेन यथा सन्निवेशे नवैयर्थ्यमित्याहुः न च

धर्म्मावच्छिन्नाभावं लक्षणसम्भवे प्रतियोग्यवृत्तित्वेति ग्रन्थावतारानुपपत्तेः। (१२) यदपि यत्समानाधिकरणाः साध्यतावच्छेदका-

---

विशिष्टाभावादिकमादाय लक्षणसमन्वयसम्भवे प्रतियोग्यवृत्तित्वेत्यादिग्रन्थानुत्थितिप्रसङ्गेनैतल्लक्षणपरित्यागबीजस्वीकृततया तादृशदोषो न क्षतिकर इति वाच्यं विशिष्टाभावस्य प्रतियोगित्वं विशेषणे एवमुभयाभावस्य प्रतियोगित्वं यदभावप्रयुक्तोभयाभाव स्तत्र स्वीकारे प्रकृतलक्षणस्य परिष्कारत्रयेऽप्यस्य लक्षणस्य कस्यापि सते न निर्दोषत्वमित्यावेदयितुं तादृशग्रन्थानुत्थितिप्रसक्तेः। न च दैशिकविशेषणताविशेषेण हेत्वधिकरण-वृत्तितावन्तो यावन्तः प्रकृतसाध्यव्यापकतावच्छेदक-प्रतियोगिताकाभावा भावभिन्ना इत्यस्यैव सम्यक्त्वे स्वस्वप्रतियोगिसामानाधिकरण्यादिघटित-गुरुतरलक्षणारम्भोऽनुचित इति वाच्यं, गगनाभावात्मकगगनाभावभेदाभावस्य भावभिन्नतया गगनाभावभिन्नत्वभावत्वादित्यादावतिव्याप्तेः। नच गगनाभावभिन्नत्वभावत्वादित्यत्र गगनाभावनिष्ठ-प्रतियोगित्वरूपाभावमादाय नातिव्याप्तिरिति वाच्यं; तादृशप्रतियोगित्वस्यापि उक्ताभावस्वरूपत्वात्।

(१२) यथाच काशीशङ्करादयः वह्निमान् धूमादित्यादौ तद्घटरूपध्वंसात्मकाभावमादायाव्याप्तिवारणाय यत्सामानाधिकरण्यदलमित्याहुः। नव्यास्तु तज्ज्ञानान्यत्वप्रकारक-प्रमाविशेष्यत्वाभावमादायाव्याप्तिवारणाय तत् एतेन प्रथमस्य गोत्वं संयोगेन गवात्यन्ताभावानधिकरणत्वादित्यादिग्रन्थस्वरसेन कालेऽपि ध्वंसादेः सत्वात् तद्घटरूपध्वंसस्वरूपाभावस्य दैशिकविशेषणतया कालेऽपि वृत्तेरुभयवृत्तित्वेऽपि न क्षतिरिति प्राहुः। अथ यत्सामानाधिकरण्योक्तावपि तज्ज्ञानान्यत्वप्रकारक-प्रमाविशेष्यत्वाभावस्य कालिकेन हेतुसामानाधिकरण्येऽपि न पुनस्तथैवाव्याप्ति दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वस्य विवक्षितत्वात्। अथ तथासति हेतुसमानाधिकरणस्य वह्निसंयोगाद्यात्मकाभावस्येत्यादिना फक्किकासङ्गत्यर्थं भावभिन्नत्वेनाभावो निविष्ट इत्युत्तरग्रन्थासङ्गतिरिति चेन्न, गुरुधर्मस्य प्रतियोगितावच्छेदकत्वानङ्गीकारात् गुरुरूपेण साध्यतायां साध्यतावच्छेदकावच्छिन्नवह्निनिष्ठाभाव-प्रतियोगितावच्छेदकत्वसामान्याभावस्याप्रसिद्ध्या तादृशव्यापकतावच्छेदकप्रतियोगिताकाभावाप्रसिद्धेनाव्याप्तिभियैव साध्यतावच्छेदकावच्छिन्नवह्निनिष्ठाभावीया यावत्यः प्रतियोगिताः तत्तत् प्रतियोगितानां प्रत्येकेन स्वसामानाधिकरण्य-स्वावच्छेदकत्वोभयसम्बन्धेन यावन्तोऽभावास्तावत्-कूटविशिष्ट-प्रतियोगित्वमेव साध्यव्यापकतावच्छेदक-प्रतियोगित्वं वक्तव्यं तत्र चाभावकूट-

वच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताका यावन्तोऽभावा दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमित्येवास्तु लक्षणं स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशे गौरवात् हेतुसमानाधिकरणस्य तत्तद्योगोलकान्यत्वाभावस्यैव दैशिकविशेषणतयोभयवृत्तित्वाभावाद्धूमवान् वह्नेरित्यादावतिव्याप्तिविरहादिति।

लाघवार्थं साध्यवन्निष्ठाभावोऽपि भावभिन्नोयाह्यः तथासति तत्पर्व्वतत्वप्रकारक यत्किञ्चिज्ज्ञानविषयत्वस्वरूपाभाव मादायाव्याप्तिवारणाय भावभिन्नत्वनिवेशस्य सप्रयोजनकत्वादतएव वह्निसंयोगाद्यात्मक इत्यत्रादिपदमुपात्तमिति ध्येयं। तत्पर्व्वतीयरूपध्वंसात्मकाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिव्युदासाय तादृशदलं इति केचित् तन्न मनोरमं ध्वंसस्य कालादिवृत्तित्वे मिथस्य सम्मतत्वात् उभयवृत्तित्वेनाव्याप्त्यप्रयोगात्; वयन्तु यत् पर्व्वतस्य द्वितीयक्षणएव यत्पर्व्वतान्यत्वप्रकारकभ्रमो वर्त्तते तत्पर्व्वतान्यत्वप्रकारक-ज्ञानविषयत्वाभावस्य यावदन्तर्गततया ज्ञानशून्यकालावच्छेदेन तत्पर्व्वते सत्त्वात् तत्पर्व्वतभिन्नेष तत्पर्व्वतभिन्नत्वप्रकारक-प्रमाविषयत्वस्य सर्व्वदैव सत्त्वे न तत्र तादृशाभावस्यासत्त्वाच्च उभयवृत्तित्वविरहेण वह्निमान् धूमादित्यादावव्याप्तिवारणाय साध्यव्यापकतावच्छेदक-प्रतियोगिताकार्थकतादृशपदमिति-ब्रूमः उक्ताभावमादाय तत्राव्याप्तिभिया प्रतियोगिवैयधिकरण्यघटित साध्यव्यापकतावच्छेदकत्वमत्र ग्राह्यमिति ध्येयं। धूमवान् वह्नेरित्यादौ व्यधिकरणधर्म्मावच्छिन्नाभावमादायातिव्याप्तिवारणार्थं यावदिति तदयोगोलकान्यत्वाभावस्य तदयोगोलकान्यत्व-प्रकारक-ज्ञानविषयत्वाभावादेश्च कालिकेनोभयवृत्तित्वात्तत्रैवातिव्याप्तिरतो दैशिकेति ननु गगणाभावतत्पर्व्वतभेदान्यतरत्वेन गगणाभावतत्पर्व्वतभेदोभयाभावस्य दैशिकविशेषणतयोभयवृत्तित्वाभावादव्याप्तिरिति चेन्न सामान्यधर्म्मेण विशेषाभावानभ्युपगमात् केचित्तु यत्प्रतियोगिताकाभावे स्वाश्रयसामानाधिकरण्य-जगद्वृत्तिभिन्नत्वोभयाभावस्तादृशप्रतियोगिताकाभावस्य लक्षणघटकतया उक्ताभावस्यातथात्वात् नाव्याप्तिरित्याहुः तदसत् साध्यव्यापकतावच्छेदक-प्रतियोगिताकनिवेशस्यव्यर्थत्वादितिविभावनीयं न च तथापि तत्पर्व्वतान्यत्वविशिष्ट-वाच्यत्वाभाव-तत्पर्व्वतान्यत्ववाच्यत्वोभयाभावादिक मादायाव्याप्तिरिति वाच्यं वैशिष्ट्यव्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वेन तादृशप्रतियोगिताया विशेषणीयतया तदभावस्य यावदन्तर्गतत्वादिति।

(१३) तन्मन्दं हेतुसमानाधिकरणस्य वह्निसंयोगाद्यात्मका-
भावस्य विशेषणतयोभयवृत्तित्व-विरहेण वह्निमान् धूमादित्या-

---

(१३) अथासम्भवसम्भवे अव्याप्तिदानमनुचितमिति चेन्न गगनाभावभिन्नं घटभेदत्वात् इत्यादौ लक्षणगमनात् नच साध्यवन्निष्ठाभावस्य व्यापकताघटकस्य लाघवेन भावभिन्नत्वेन निवेशे तद्वृत्तित्वरूपाभावमादायाव्याप्तिरिति वाच्यं तद्वृत्तित्वरूपाभावस्य घटभेदात्मकाधि-करण-स्वरूपत्वमते उभयवृत्तित्वेन अव्याप्त्ययोगात्। ननु संयोगस्वरूपाभावमादायैव सामञ्जस्ये वह्निसंयोगानुधावनं असङ्गतं तन्न वह्निस्वरूपं संयोगस्वरूपञ्चाभावमादायाव्याप्ति-प्रदर्शनार्थं तन्तुसमस्तवह्निसंयोगाद्यात्मकेत्यादि-ग्रन्थावतारात् अथ यत्सामानाधिकरण्य-मुक्तव्यापकताघटकसाध्यवन्निष्ठत्वं उभयनिरूपितवृत्तित्वञ्च एकेनैव सम्बन्धेन वाच्यं तथाच वह्निसंयोगाद्यात्मकाभावस्य तद्वृत्तित्वस्वरूपाभावस्य चोक्तव्यापकतावच्छेदक-प्रतियोगिताक-त्वाभावात् लक्षणाघटकतया भावभिन्नत्वदलस्यानावश्यकत्वेन तदघटभिन्नं घटत्वादित्यादा-वतिव्याप्त्युद्धारासम्भवादेतल्लक्षणस्य निर्दोषत्वसम्भवेन दोषोद्भावनपूर्वकैतल्लक्षण-परित्या-गानुचितत्वात् जगदीशग्रन्थासङ्गतिरिति चेन्न घटत्वेन वाच्यत्वाभावस्य तादात्म्येन साध्यतायां तद्वृत्तित्वादिहेतौ तादात्म्येन हेत्वधिकरणवृत्तिसाध्यस्वरूपाभावस्य घटत्वेन वाच्यत्वाभावीय प्रतियोगिताविशिष्टाभावाप्रसिद्ध्या तादृशव्यापकतावच्छेदक-प्रतियोगिताकत्वेन यावदन्तर्ग-तस्य तादात्म्येनोभयवृत्तित्वविरहादव्याप्तेः नच तादात्म्येन साध्यवद्वृत्त्यभावाप्रसिद्ध्या न तादात्म्येन हेत्वधिकरणवृत्त्यभाव मादायाव्याप्तिसम्भावनेति वाच्यं घटत्वेन वाच्यत्वाभावा-न्यत्वाभावस्य तादात्म्येन साध्यवद्वृत्तित्व-सम्भवादव्याप्तेरशक्यपरिहारत्वात्। यद्यपि तादात्म्य सम्बन्धानवच्छिन्नत्वं हेत्वधिकरणवृत्तितायां निवेश्य तादात्म्यसम्बन्धमादाय नाव्याप्तिस्तथापि तत्पर्य्याप्त्यनुयोगिकस्वरूप-सम्बन्धेन हेत्वधिकरणवृत्त्यभावस्य तत्सम्बन्धेनोभयवृत्तित्वा-भावादव्याप्तेः ननु स्वावच्छिन्नत्व-स्वेतरावच्छिन्नत्वोभयसम्बन्धेन वस्तुविशिष्टान्यसंसर्गताकत्वं हेत्वधिकरणवृत्तितायां निवेशे तादृशसम्बन्धेन हेत्वधिकरणवृत्त्यभावमादाय तत्राव्याप्ति-निवारणसम्भवान्न कथमस्य लक्षणस्य परिष्कारसम्भव इति चेन्न एतादृशोक्तावस्य लक्षणस्य हेतुतावच्छेदकविशिष्टं व्याप्तिरित्यनुगमोऽवश्यं वक्तव्यः वैशिष्ट्यञ्च स्वतादात्म्य स्वावच्छिन्ना-धिकरण-निरूपितवृत्तिताविशिष्टवृत्तिताकत्वव्यापकोभय- निरूपितवृत्तिताकत्वैतदुभयसम्बन्धेन-वृत्तितावैशिष्ट्यन्तु स्वतादात्म्य-स्वकालीन साध्यव्यापकतावच्छेदकप्रतियोगिताकाभावनिष्ठ-

दावव्याप्तिप्रसङ्गात् नच भावभिन्नस्यैव हेतुसमानाधिकरणाभावस्य

त्वोभयसम्बन्धेन तथासति आधेयभेदेनाधेयताया भिन्नत्वात् तादृशवृत्तितात्वव्यापकी-
भयनिरूपितवृत्तितात्वाप्रसिद्ध्या उक्तव्याप्तिलक्षणस्य वह्निमान् धूमादित्यादावसम्भवापत्तेः।
प्रकृतेतु स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वोभयसम्बन्धेन स्वनिरूपकत्व-स्वाश्रयवृत्तित्वोभय-
सम्बन्धेन प्रतियोगिताविशिष्टान्यभेद विशिष्टत्वरूपोभयवृत्तित्वस्य तादृशद्वावदभावे निवे-
शात्प्रसिद्धिः नवा उभयभेदविशिष्टत्वस्य तत्तद्योगोलकत्वादिरूपाभावे सत्त्वादतिव्याप्तिरिति
संक्षेपः। अथ उक्तव्यापकतावच्छेदकघटकसाध्यवन्निष्ठत्वं हेत्वधिकरणवृत्तित्वञ्च दैशिक-
विशेषणतया वाच्यं तथाच तद्वन्निष्ठत्व-वह्निसंयोगाद्यात्मकाभावस्य लक्षणाघटकत्वेन तल्लक्षण-
परिष्कारसम्भव इत्यपि न युक्तं गगनाभावभिन्नमभावत्वादित्यादावतिव्याप्तेः तद्वन्निष्ठत्व-गगना-
भाव-निष्ठप्रतियोगित्वाद्यात्मकाभावमादाय कथञ्चिदतिव्याप्त्युद्धारेऽपि अधिकरणभेदेनाभावस्य
भिन्नत्वमते वह्निमान् धूमादित्यादौ लक्षणगमनासम्भव इति ध्येयमेतेन तादृशप्रतियोगि-
तायां व्याप्यवृत्तितानिरूपकत्वं स्वरूपेणोक्तव्यापकतावच्छेदकघटक-साध्यवन्निष्ठत्वञ्च निवेश्य
कथं न लक्षणं परिष्कृतमित्यपि प्रत्युक्तं। अथाच भावभिन्नत्वदलस्य स्वप्रतियोगिमत्त्वावच्छे-
विरोधिताघटकसम्बन्धेन साध्यवद्वृत्तिभाव-प्रतियोगिप्रतियोगिकान्यत्वरूपार्थकत्वे वह्निसंयो-
गाद्यात्मकाभावमादाय नाव्याप्तिः तद्घटत्वरूपाभावस्य लक्षणघटकतया न वातिव्याप्तिरिति
एतल्लक्षणस्य निर्दोषत्वसम्भवे किमेतल्लक्षणपरित्यागेन न च वह्निसंयोगाभावाभावस्य तादृश-
विरोधिताघटको यो निरवच्छिन्नसमवायत्वेन सम्बन्धेन वह्निसंयोगाद्यात्मकाभावस्य साध्य-
वद्वृत्तित्वाभावादुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वेन लक्षणघटकतया यथाश्रुतभाव-
भिन्नत्वनिवेशस्यावश्यकतया पुनरतिव्याप्तिः स्यादेवेति वाच्यं समवाय दैशिकविशेषणताविशे-
षान्यतरसम्बन्धेन कथितसाध्यवद्वृत्तित्वस्य विवक्षणात् तादृशाभावस्य लक्षणाघटकतया यथा-
श्रुतभावभिन्नत्वनिवेशस्य निष्प्रयोजनकत्वात् वस्तुतः तथासति तज्ज्ञानत्वस्वरूपाभावमादाया-
व्याप्तिवारणाय यत्सामानाधिकरण्यं तत्पर्य्याप्ततत्वप्रकारकज्ञानविषयत्व-तत्संयोगाधिकरण-
त्वाद्यात्मकाभावमादायाव्याप्तिवारणाय साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वघटक-
साध्यवद्वृत्तित्वञ्च दैशिकविशेषणतया ग्राह्यं ततः लक्षणपरिष्कारसम्भव एष एव पूर्व्वपक्षः
चेन्न गगनाभावभेदाभावस्य गगननिष्ठप्रतियोगित्वाद्यात्मकाभावादेश्च गगनाभावस्वरूपतयो-
भयवृत्तित्वाद्गगनाभावभिन्नमभावत्वादित्यादावतिव्याप्तेः। ननु गगनाभावात्मकाभावस्य साध्य-
वद्वृत्तित्वेन तादृशव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् व्यधिकरणधर्म्मावच्छिन्न-

प्रवेशान्नैष दोषः ।(१४) तद्घटभिन्नं घटत्वादित्यादावतिव्याप्त्यापत्ते-स्तद्घटभिन्नत्वाभावस्य तद्घटत्वादिस्वरूपत्वेन भावत्वात् पटत्वादिना तद्घटभिन्नत्वाद्यभावस्य चोभयवृत्तित्वादिति क्षतं पल्लवितेन ।(१५) अत्र च यत् पदं यद्धर्मावच्छिन्नपरं अग्रेच तत्त्वमित्यस्य हेतुताव-च्छेदकीभूततद्धर्म्मवत्त्वमित्यर्थः तेन सकलधूमव्यक्ति निष्ठानुगताया वह्निव्याप्तेर्लाभः न वा ज्ञानवान् मनोऽन्यत्वे सति आत्ममनः-संयोगादित्यादौ मनसि हेतुसमानाधिकरणस्य ^ स्वविशिष्टहेतुताव-च्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्याव्याप्तिः । यत्तु द्रव्यं गुण-

^आत्मत्वसामान्याभावस्य

वाच्यत्वाद्यभावस्यैव लक्षणघटकतया प्रकृतलक्षणे तत्राप्यतिव्याप्तिरित्ययुक्तं तत्रातिव्याप्ति-वारणाय साध्यव्यापकतावच्छेदकप्रतियोगितापदेन प्रकृतसाध्यवन्निरूपित-वृत्तितावच्छेद-कानुयोगितानिरूपित-प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकप्रतियोगिताया-विवक्षितत्वेनानुयोगिताया वैलक्षण्यात् साध्यसामान्याभावस्य लक्षणघटकत्वादितिचिन्त्यं ।

(१४) ननु तद्घटभिन्नं घटत्वादित्यत्र तद्घटरूपध्वंसादिस्वरूपाभावमादाय ज्ञानशून्य-कालावच्छेदेन तद्घटात्मकहेत्वधिकरणवृत्ति-गुणत्वादिप्रकारतानिरूपित-तद्घटनिष्ठ-यत्किञ्चि-न्नसविशेष्यत्व-तद्घटभेदान्यतराभावमादाय वा नातिव्याप्तिः कथिताभावयो स्तद्घट-मावृत्तित्वात् सत्यमत्र तद्घटपदेन द्वितीयक्षणस्थायिनि यद्घटे उत्पत्तिक्षण एव गुणत्वादिभ्रम एवं यद्घटनाशानन्तरमेव रूपादिनाशस्तद्घट एव विवक्षितस्तेन तद्घटरूपध्वंसमादाय गुणत्व-प्रकारतानिरूपित-तद्घटनिष्ठ-यत्किञ्चिन्नसविशेष्यत्व-तद्घटान्यत्वैतदन्यतराभावमादाय वा नातिव्याप्त्युद्धारः प्रथमाभावस्य हेत्वधिकरणावृत्तित्वात् द्वितीयाभावस्य तु अप्रसिद्धत्वात् नच तद्घटरूपप्रागभावमादाय नातिव्याप्तेर्न्यासङ्गतिरिति वाच्यं प्रागभावमनङ्गीकृत्यैवातिव्याप्तेः सङ्गमनीयत्वात् । केचित्तु तद्घटरूपध्वंस-तद्घटरूपप्रागभावादिमादाय तत्र नातिव्याप्तिरतः आदिपदमुपात्तं तेन तद्रूपभिन्नं रूपत्वादित्यादावतिव्याप्तिः सूचिता इत्याहुः; तच्चिन्त्य अन्यत् सर्वं ध्येयमत्र अलमनल्पजल्पनेन ।

(१५) ननु प्रथमतो यत्पदस्य यद्धर्मावच्छिन्नपरस्य व्यावृत्तिदर्शनस्य समीचीनत्वात्

कर्म्मान्यत्वे सति सत्त्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वादग्रभावस्यातथात्वादव्याप्तिरतोयत्पदस्य यद्धर्म्मावच्छिन्नपरत्वमिति तन्न, द्रव्यत्वादग्रभावस्यापि कालिकसम्बन्धेन यद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं जन्यद्रव्यादि तदवच्छेदेन प्रतियोगिसामानाधिकरण्यात्तत्राव्याप्तिविरहात्।

साध्यतेत्यादि (१६) साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदिका यदभावप्रतियोगिता तादृशाभावा इत्यर्थः। अत्र च (१७) विशिष्ट-सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्यैव सत्तारूप-साध्यव्यापकतावच्छेदक-प्रतियोगिताकतया तस्य च स्वविशिष्ठ-हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति तथाच द्रव्यत्वाभावस्यैव निरुक्तयावदन्तर्गत-

---

कथं पूर्व्वं तत्पदस्य तद्धर्म्मावच्छिन्नपरस्य व्याख्यातिदर्शितेति चेन्न तत्पदस्य तद्धर्म्मवत्त्परत्व एव यत्पदस्य यद्धर्म्मवत्परस्य सम्भवः यत्तदोर्नियतसम्बन्धित्वादित्यावेदितत्वात्।

(१६) अथात्र साध्यतावच्छेदकावच्छिन्नवत्त्वनिवेशे अयमात्माज्ञानादित्यादौ निरवच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नवत्त्वा-प्रसिद्ध्याऽव्याप्तिरिति चेन्न, स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन साध्यताविशिष्ट-निरूपकता निरूपिताधिकरणताया एव साध्यतावच्छेदकावच्छिन्नवत्पदेन विवक्षितत्वात् अत्र सम्बन्धघटकस्ववृत्तित्वन्तु स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन बोध्यं।

(१७) अत्र सन्दी महाकालत्वात् इत्यादावतिव्याप्तिवारणाय दैशिकविशेषणताविशेषसम्बन्धेन व्यापकताघटक-प्रकृतसाध्यवन्निष्ठत्वमवश्यं वक्तव्यं तथासति गुणत्वात्मकगुणभेदाभाव मादायोक्तातिव्याप्तिवारणसम्भवात् साध्यतावच्छेदकावच्छिन्नदलस्य उक्ताव्या-

तया तस्यातथात्वान्नातिव्याप्तिः । साध्यवत्त्वञ्चात्र साध्यतावच्छेदक-सम्बन्धेन ग्राह्यं, तेन वस्तुमात्रस्यैव विषयता-सम्बन्धेन ज्ञान-वत्ताद् घटत्वादिना वाच्यत्वाद्यभावस्यैव साध्यव्यापकतावच्छेदक-प्रतियोगिताकतया (१८) समवायेन ज्ञानस्य साध्यत्वे द्रव्यत्वादि-हेतौ नातिव्याप्तिः समवायसम्बन्धावच्छिन्न-ज्ञानवन्निष्ठाभाव-प्रतियोगितानवच्छेदक-प्रतियोगिताकस्यात्मत्वाभावस्यैव प्रति-योग्यसमानाधिकरणत्वात् अत्र च साध्यवन्निष्ठाभावः प्रतियोगि-व्यधिकरणत्वेन विशेषणीय स्तेन साध्यवन्मात्र एव समवायित्वा-वच्छिन्न-वाच्यत्वाद्यभाव-प्रतियोगित्वेन घटाद्यभावसत्त्वेऽपि न साध्यवन्निष्ठाभाव-प्रतियोगितानवच्छेदक-प्रतियोगिताकाभावस्या-प्रसिद्धिः ।

(१९) इत्थञ्च तत्सम्बन्धेन स्वावच्छिन्नानधिकरण-साध्यवन्निष्ठाभाव-प्रतियोगितावच्छेदको यो यस्तदन्यत्वे सति तत्सम्बन्धावच्छिन्नाधेयत्वावच्छेदकत्वरूपं तत्सम्बन्धेन साध्य-

---

हत्तिरसङ्गतेति न युक्तं आदिपदेन घटाभाववृत्तित्वविशिष्ट-वाच्यत्वयानभावत्वादित्यादिस्थलस्य संग्रहेण तत्रातिव्याप्तिवारणायैव तद्दलस्य धाग्रावृत्तिसम्भवात् ।

(१८) अत्रापि आदिपदेन घटाभावत्वादेः संग्रहः तेन प्रागुक्तरीत्या घटत्वात्मक-घटान्यत्वाभावमादाय नातिव्याप्त्युद्धारः इति दिक् ।

(१९) 'यथाश्रुतप्रतियोगिव्यधिकरणत्वनिवेशे कपिसंयोगाभावादिकमादायासम्भव-सम्भवात् स्वावच्छिन्नानधिकरण-साध्यवदित्यादिग्रन्थावतार इति । अथ स्वावच्छिन्नानधिकरण-साध्यवत् को यो यत्तावच्छेदकूटस्य प्रतियोगितायां निवेश एव सम्यक्त्वे अभावप्रतियोगितावच्छेदकपर्य्यन्तानुधावनमसङ्गतं चेन्न गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे प्रकृतपक्षे कम्बु-ग्रीवादिभेदोऽपि भेदकूटानन्तर्गतस्तदपेक्षयोक्तप्रकारानुसरणे च कम्बुग्रीवादिभेदस्य भेदकूटा-

व्यापकतावच्छेदकत्वं निरुच्य तादृशव्यापकतावच्छेदिका यदभावप्रतियोगिता तादृशाभावाः प्रवेशनीयाः, नच तत्सम्बन्धावच्छिन्नाधेयतेत्यादिकं व्यर्थं। द्रव्यत्वाद्यभावप्रतियोगिताया अपि संयोगादिसम्बन्धेन वह्न्यादिव्यापकतावच्छेदकत्वापत्त्या यावदन्तर्गतस्य द्रव्यत्वाद्यभावस्य साध्यव्यापकता घटकीभूत-संयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्याप्रसिद्ध्यासद्धेतुमात्र एवासम्भवस्य वारणार्थं तदुपादानात्। संयोगसम्बन्धावच्छिन्नाधेयत्वस्य द्रव्यत्वादावसत्त्वेन द्रव्यत्वादिनिष्ठ-प्रतियोगित्वस्य तादृशाधेयत्वानवच्छेदकत्वात् तत्सम्बन्धेन

न्तर्गतत्वेन गौरवात् नच स्वतादात्म्य-स्वावच्छिन्नानधिकरणकालीनत्वोभय-सम्बन्धेन वन्हिविशिष्टत्वावच्छिन्न-प्रतियोगिताक-भेदवत्प्रतियोगित्वमेव साध्यव्यापकतावच्छेदक प्रतियोगित्वपदेन विवक्षणीयं तथाच भेदकूटस्यानिवेशात् भेदकूटगौरवकथनं वायसदशनानुसन्धानसमिति वाच्यं। प्रमेयवन्ह्यादिसाध्यकस्थले स्वावच्छिन्नानधिकरणवह्नित्वावच्छिन्ना-धिकरण-कालीनत्वघटितोभय-सम्बन्धापेक्षया स्वावच्छिन्नानधिकरण-प्रकृतसाध्याधिकरण-कालीनत्वघटितनिरुक्तोभयसम्बन्धस्य गुरुत्वेन तत्सम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्ध्या तादृश-सामान्यभेदादेर्निवेष्टुमशक्यत्वात् यद्यपि घटत्वापेक्षया घटाभावीय-प्रतियोगित्वादे र्गुरुतयोक्त-व्यापकतावच्छेदकत्वेनासम्भवभिया प्रकृतपक्षेऽपि प्रतियोगितावच्छेदकमित्यवाच्छेदकत्वं पनतिरिक्तवृत्तित्वं वक्तव्यं तथाच कम्बुग्रीवादिर्भेदस्याप्युक्त भेदान्तर्गततया गौरवाभिधान-मसङ्गतं तथापि घटाभावीय-प्रतियोगित्वस्य घटत्वस्वरूपेण घटाभावीयप्रतियोगित्वे उक्तावच्छेदकत्वस्वीकारे बाधकाभावादनतिरिक्तवृत्तित्वनिवेशस्यानावश्यकतया कम्बुग्रीवादि-भेदस्य प्रकृतानुपयोगित्वेन लाघवगौरवानुसन्धानस्य समीचीनत्वमिति निपुणतरं विभाव-नीयं। ननु साध्यवद्वृत्तिभेद-प्रतियोगितावच्छेदकता-निरूपित-स्वावच्छिन्न-निरूपकता-निरूपितत्व-सम्बन्धावच्छिन्नावच्छेदकतावद्यद् यत् तदन्यप्रतियोगित्वमेव साध्यव्यापकताव-च्छेदकं स्यात् किमभावप्रतियोगित्वेत्यादिना इति न वाच्यं उक्तसम्बन्धावच्छिन्न-घटत्वेन घटत्वाभावीय-- प्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताधिकरणत्व--निष्ठावच्छेदकतावद्घट-

स्वावच्छिन्नानधिकरणत्वंन्तु तत् सम्बन्धेन स्वावच्छिन्नाधिकरण-सामान्यभेदः तेन वह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नाधिकरणगगणोभयभेदस्य घटत्वादिना वह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नाधिकरणभेदस्य च वह्न्यादिसाध्यवति सत्वेऽपि न क्षतिः। अत्राभावा इति स्वरूपकथनम्।

निष्ठ प्रतियोगिताकभेदस्य साध्यवद्वृत्तितया वाच्यत्वाभावीय-प्रतियोगित्वस्यापि साध्यव्यापकतावच्छेदकत्वाभावेन तादृशाभावा प्रसिद्धेः प्रकृते स्वावच्छिन्नाधिकरणत्वावच्छिन्नभेदकूटस्यैव साध्यवति निवेशात् स्वपदेनवाच्यत्वाभावीयप्रतियोगित्वस्य धर्त्तुमशक्यत्वात् न क्षतिः।

यद्यत् प्रतियोगित्वावच्छिन्नानधिकरणंसाध्यवत् तत्तत् प्रतियोगित्वभिन्न प्रतियोगित्वमेव साध्यव्यापकतावच्छेदकप्रतियोगित्वपदेन भट्टाचार्य्येण विवक्षितं जगदीशेनापि तादृशोक्तावेव सामञ्जस्ये कथमभावप्रतियोगितावच्छेदकत्वघटितं साध्यव्यापकतावच्छेदकत्वमुच्यते इत्ययुक्तं भट्टाचार्य्येण साध्यव्यापकतावच्छेदक प्रतियोगित्वस्य लक्षणं कृतं जगदीशेनतु प्रथमंद्वितीयादिलक्षण साधारणव्यापकतावच्छेदकत्वमुक्तं, तथासति जगदीशश्चेत् भट्टाचार्य्यरीतिमवलम्बते तदा द्वितीयलक्षणे घटाभावादिकमादाय दोषः स्यात् नच जगदीशमते कम्बुग्रीवादेरुक्तरीत्या साध्यव्यापकतावच्छेदकतया कम्बुग्रीवावच्छिन्नाभावमादाय दोषइति वाच्यं कम्बुग्रीवावच्छिन्नाभावाप्रसिद्धेः। अत्र स्वावच्छिन्नानधिकरणत्वपदेन स्वविशिष्टप्रतियोगित्वावच्छिन्नानधिकरणत्वं बोध्यम् स्ववैशिष्ट्यन्तु स्वनिरूपकाभावीयत्व-स्वसमनियतत्वान्यतरसम्बन्धेन, स्वसमनियतत्वघटकव्यापकत्वञ्च स्वनिरूपकाभावीयप्रतियोगितावत्त्वसम्बन्धेन तेन वह्न्याद्यभावीय प्रतियोगित्वस्य नानात्वेऽपि न क्षतिरिति चिन्त्यम्, अथतत्सम्बन्धनिरूपितप्रतियोगिवृत्तित्वं निवेश्य संयोगादिसम्बन्धेन द्रव्यत्वाद्यभाववारणसम्भवे तत्सम्बन्धावच्छिन्नाधेयतावच्छेदकत्वस्य प्रतियोगितायां निवेशनं व्यर्थमिति तन्मन्दं तत्सम्बन्धनिरूपितप्रतियोगिपदेन तत्सम्बन्धनिरूपितप्रतियोगितात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतावत्त्वस्यावश्यं विवक्षणीय-

४

[२०] वस्तुतः साध्यवन्निष्ठाभावस्य तत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमेव तत्सम्बन्धेन साध्यव्यापकतावच्छेदकत्वं वाच्यं तत्रच साध्यवन्निष्ठत्वमभावस्य स्वरुपसम्बन्धेन ग्राह्यं। तेन स्पन्दः कालत्वादित्यादौ स्पन्दत्वाभावस्यापि कालिकसम्बन्धेन साध्यवति वृत्त्या यावदनन्तर्गतत्वाद् घटत्वेन वाच्यत्वाद्यभावस्य च तादृशस्य प्रतियोगिसमानाधिकरणत्वेऽपि नातिव्याप्ति रित्थञ्च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगिकस्य जात्यादिस्वरुपस्य हेतुसमानाधिकरणाभावस्य जातिसामान्याभावाद्यात्मकप्रतियोग्यसामानाधिक-

---

तया सामान्यधर्मावच्छिन्नाधिकरणत्वास्वीकारे महागौरवात् । अत्र प्रतियोगितानिरूपकत्वम् अभाव इव सम्बन्धेऽपि वर्तते तथाच अयमात्मा ज्ञानादित्यत्र उक्तयावदन्तर्गतवाच्यत्वप्रतियोगिकतादात्म्यसम्बन्धस्य स्वविशिष्टहेत्वधिकरणाप्रसिध्या अव्याप्तिवारणायैवाभावनिवेशस्यावश्यकतया अत्राभावाइतिस्वरूपकथनमिति ग्रन्थासङ्गतिश्चेन्न तत्सम्बन्धप्रतियोगित्व तत्सम्बन्धावच्छिन्नाधेयत्वयोरैक्येपि उक्तव्यापकताघटकसम्बन्धावच्छिन्नाभावीयप्रतियोगिताकं न वाच्यत्वनिष्ठतादात्म्यमित्युक्ताव्याप्तेः परिहारसम्भवात्। सर्वं प्रमेयम् इत्याकारकयत्किञ्चित् जन्यज्ञानविषयत्वाभावमादाय सर्वत्र लक्षणगमनसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिप्रसङ्ग इत्यत आह वस्तुत इत्यादि ।

[२०] यदभावीययादृशप्रतियोगितात्वावच्छेदेन साध्यवन्निष्ठाभावाभाववत्त्वं तादृशप्रतियोगित्वमेव साध्यव्यापकतावच्छेदकप्रतियोगित्वं वक्तव्यम्, उक्ताभावस्याभावस्तु स्वनिरूपितप्रतियोगितावत्त्वसम्बन्धेन प्रतियोगितावत्त्वन्तु स्वसामानाधिकरण्य स्वावच्छेदकत्वोभयसम्बन्धेन तथाहि वाच्यत्वादेर्नानात्वेन वाच्यत्वादिनिष्ठप्रतियोगिताया नानात्वेऽपि घटत्वेन वाच्यत्वाभावीयतत्प्रतियोगितावाञ्चास्तीत्याद्यभावमादाय वाच्यम् ज्ञेयत्वादित्यादौ न साध्यव्यापकतावच्छेदक प्रतियोगित्वाप्रसिद्धिरितिचिन्त्यम् । अत्र सामानाधिकरण्यमभेदस्तेन वह्न्यभावीयप्रतियोगित्वेन तद्वह्न्यादेरभावस्य साध्यवदवृत्तित्वेऽपि न क्षतिरिति बोध्यम् ।

अथात्र भावभिन्नत्वनिवेशो जातिस्वरूपाभावमादायासम्भवासम्भवेऽपि घटत्वेन जात्यभावाभावीयप्रतियोगितावतोऽभावस्य जातिस्वरूपतया स्वरूपेण साध्यवद्वृत्तित्वात् घटत्वेन जात्यभावस्याभावमादाय तद्दोषतादवस्थ्यं अत्रनव्याः व्यापकताघटकसम्बन्धेन साध्यवन्निरूपितनिरवच्छिन्नवृत्तितावच्छेदकप्रतियोगितानिरूपकाभावा एव भावभिन्ना इत्यस्यार्थस्तेन विषयितया गुणत्वाभावस्य साध्यत्वे तज्ज्ञानत्वहेतौ विषयितया गुणत्वाभाववद्भेदाभावस्य गुणत्वाभावात्मकस्य स्वरूपसम्बन्धेन साध्यवद्वृत्तितारहितस्य एवं घटत्वेन जात्यभावाभावस्य जातिस्वरूपाभावस्य वा लक्षणाघटकतया तेषां तादृशप्रतियोग्यसामानाधिकरण्येपि न क्षतिर्नवा सर्वं प्रमेयं इत्याकारकयत्किञ्चिज्जन्यज्ञानस्वरूपाभावमादाय लक्षणसमन्वये ग्रन्थानुत्थितिरूपोदोषः—नच वाच्यं ज्ञेयत्वादिन्यादौ जातिस्वरूपाभावमादायाव्याप्तिरितिवाच्यम् भावभिन्नदलस्य प्रकृतसाध्यवद्विशिष्टान्यप्रतियोगितानिरूपकाभावरूपनिष्कृष्टार्थकतया उक्तस्थले तादृशाभावस्यलक्षणाघटकत्वात् वैशिष्ट्यञ्च स्वनिरूपित व्यापकताघटकसम्बन्धावच्छिन्नाधेयतावच्छेदकत्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्तासम्बन्धेन तथाहि वाच्यत्वरूपसाध्यवत्पर्व्वतस्य स्वनिरूपिताधेयतावच्छेदकत्वसम्बन्धेन जात्यभावनिष्ठप्रतियोगितायामसत्वा दुक्तसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्तासम्बन्धेन पर्व्वतरूपसाध्यवद्विशिष्टमेव जात्यभावनिष्ठप्रतियोगित्वमतस्तादृशप्रतियोगिताकाभावस्य लक्षणाघटकतया न कोऽपि दोषः पदमादधाति इत्यालोच्यात्र भावभिन्नत्वं साध्यवद्वृत्त्यभावप्रतियोगिप्रतियोगिकान्यत्वमवश्यं वक्तव्यं तत्र साध्यवद्वृत्तित्वं केनसम्बन्धेनेति प्रश्नकर्त्तारमुपहसन्ति केचित्तु जातिसामान्याभावत्व-जातिसामान्याभावाभावीयप्रतियोगित्वयोरैक्यात् तादृशप्रतियोगित्वावच्छिन्नाभाव एव जातिस्वरूपो नतु घटत्वेन जात्यभावाभावीयप्रतियोगित्वावच्छिन्नाभावः तथाच घटत्वेन जात्यभावाभावस्य लक्षणा घटकत्वान्न काचित् क्षति रिति भावभिन्नत्वपदस्य यथाश्रुतार्थ-एवसम्यगित्याहुः तदयुक्तं जात्यभावत्वेन घटाद्यभावमादाय द्वितीयलक्षणेसम्भववारणाय नव्यमतोक्तरूपेण व्यापकतावच्छेदकरूपस्य विशेषितुमावश्यकत्वात्। अपरेतु गुणत्वाभावस्य विषयितया साध्यतायां तज्ज्ञानत्वादिहेतौ

रण्या (२१) दसम्भवापत्तिरतोऽभावा इत्युक्तं भावभिन्नाइतिच तदर्थः-यथाच सामानाधिकरण्येनानवच्छेदकत्वघटितायां व्यापकतायां न दोषस्तथाग्रे प्रपञ्चयिष्यति ।

गुणत्वाभावात्मकविषयितया साध्यवद्भेदाभावमादायाव्याप्तिवारणाय लक्षणघटकसाध्यवन्निष्ठत्वं स्वप्रतियोगिमत्ताबुद्धेर्विरोधिताघटकसम्बन्धेन वक्तव्यम् जगदीशोक्तस्वरुपपदं तदर्थकमेव नच भावभिन्नत्वनिवेशनं व्यर्थं जात्यादिस्वरूपाभावस्य लक्षणाघटकत्वादिति वाच्यं यत्पर्व्वतस्य उत्पत्तिक्षणे अयं पर्व्वतइत्याकारकज्ञानमुत्पन्नं तत्पर्व्वतस्य तृतीयक्षणेऽपि तादृशज्ञानमुत्पन्नं वह्निमत्तत्पर्व्वतस्य पञ्चमक्षणेनाशस्तत्र तादृशज्ञानयोरन्यतराभावाभावोहेतुसमानाधिकरणः तत्र तादृशान्यतराभावनिष्ठप्रतियोगित्वावच्छिन्नवत्ताग्रहविरोधिताघटकोयोनिरवच्छिन्नविषयतारूपः सम्बन्धस्तेन साध्यवति तत्पर्व्वते वर्त्तमानो न तादृशान्यतरस्वरूपोऽभावस्तथाचोक्ताभावः साध्यव्यापकतावच्छेदकप्रतियोगिताकः तदभावीयप्रतियोगित्वाश्रयस्य तादृशान्यतराभावात्मकस्य तत्पर्व्वतेऽसत्त्वाद्व्याप्तिरतोभावभिन्नत्वं निवेशनीयं यद्यपि हेत्वधिकरणे निरवच्छिन्नवृत्तिकत्वनिवेशनेनैव उक्ताभावस्य लक्षणाघटकत्वं तथापि घटत्वेन उक्तान्यतराभावस्याभावमादायाव्याप्तिवारणाय साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वार्थकम् भावभिन्नत्वदलम् साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वं तु साध्यवद्वृत्तिभावप्रतियोगितानवच्छेदकप्रतियोगिताकाभावार्थकं बोध्यम् तथाच तद्घटभिन्नं घटत्वात् इत्यादौ तद्घटभेदाभाव-पृथिवीत्वान्यतरस्य साध्यवद्वृत्तिभावत्वेऽपि न क्षतिरित्याहुः तन्न सर्व्वं प्रमेयं इत्याकारकयत्किञ्चिज्जन्यज्ञानविषयत्वाभावमादाय सर्व्वत्रलक्षणगमनसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिप्रस्थानुत्थितिप्रसङ्गात् नच स्वरूप-समवायसंयोगान्यतमसम्बन्धेन लक्षणघटकसाध्यवन्निष्ठत्वं भावभिन्नत्वमपि उक्ताङ्कुरविशेषेऽव्याप्तिवारणाय इतिवाच्यं, विषयितया गुणत्वाभावसाध्यकतज्ज्ञानत्वादिहेतौ गुणत्वाभावात्मकगुणत्वाभाववद्भेदाभावमादायाव्याप्तेः ।

[२१] ननु स्पन्दः कालत्वादित्यादौ यावदन्तर्गतप्रलयान्यत्वाभावमादाय नातिव्याप्तिः कथं साध्यवन्निष्ठत्वं स्वरूपसम्बन्धेन नि-

नव्यास्तु साध्यतावच्छेदकेत्यादि साध्यतावच्छेदकावच्छिन्नाधिकरणानि यावन्ति (२२) तत्प्रत्येकवृत्तिवृत्तिप्रतियोगिताकाइत्यर्थः नचैकमात्रवृत्ति साध्यकसद्धेतावव्याप्तिस्तत्र यावत्वस्यानुपादेयत्वात् शब्दैक्यस्याकिञ्चित्करत्वात् यद्वा साध्यतावच्छेदकावच्छिन्नसमानाधिकरणा यावन्तस्तत्समानाधिकरणवृत्तिप्रतियोगिताकाइत्यर्थः इतिप्राहुः (२३) यत्तु साध्यवदवृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगिताकाइत्यर्थइति तन्न केवलान्वयिसाध्यकसद्धेतौ तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तेर्गगणस्वरूपाभावप्रतियोगित्वस्य तादृशत्वेऽपि तस्य हेतुसमानाधिकरणत्वासम्भवादिति ।

चेशितमिति चेन्न प्रलयान्यत्वविशिष्टकालत्वस्यैव हेतुत्वात् उक्ताभावस्य हेतुसामानाधिकरण्याभावेन लक्षणाघटकतया अतिव्याप्तिसङ्गतेः । जन्यमात्रस्य कालोपाधित्वानङ्गीकारात् धूमवान् वह्नेरित्यस्योपेक्षा । ननु इयं जातिर्जातित्वात् इत्यादौ जातिस्वरूपाभावमादायाव्याप्त्यभावात् कथमसम्भवोक्तिर्युक्तिसहा इतिचेन्न विषयतायावृत्तिनियामकत्वमते जात्यनुयोगिकविषयतया नित्यज्ञानाभावाभावमादाय तत्राप्यव्याप्तिसम्भवादतएव जात्यादिस्वरूपस्येत्यत्रादिपदमुपात्तम् अन्यत् सर्व्वं सुधीभिर्भाव्यम् ।

(२२) अत्र प्रत्येकपदं किमर्थं वाच्यं ज्ञेयत्वादित्यादौ घटत्वेन वाच्यत्वाभावीयप्रतियोगित्वस्य वाच्यत्वभेदेन भिन्नत्वे घटत्वेन वाच्यत्वाद्यभावस्य लक्षणाघटकत्वेऽपि प्रकृतसाध्याधिकरणयावद्वृत्तिगगणाभाववृत्तिप्रतियोगिताकघटत्वेनगगणाभावाभावमादाय लक्षणगमनसम्भवादिति चेन्नाधिकरणभेदेन गगणाभावस्यापि भिन्नत्वात् गगणाभावनिष्ठप्रतियोगिताया यावत्साध्यवदवृत्तित्वात्तादृशप्रतियोगितानिरूपकाभावाप्रसिद्धेः ।

(२३) अत्र साध्यवदवृत्तित्वघटकसाध्यवद्वृत्तित्वं स्वरूपसमवायान्यतरसम्बन्धेनापि न वक्तव्यम् गुणत्वाभावस्य विषयितया साध्यत्वे तज्ज्ञानत्वादिहेतौ गुणत्वाभावात्मकम् विषयितयागुणत्वाभाववद्भेदाभावमादायाव्याप्त्यापत्तेः किन्तु स्वप्रतियोगिमत्त्वाबुद्धेर्विरोधिताघटकसम्बन्धेनैव नच सर्व्वं प्रमेयमित्याकारकयत्किञ्चिज्जन्यज्ञानविषयत्वाभावमादाय सर्व्वत्र लक्षणसमन्वयसम्भवे प्रति-

अत्र व्यापकतावच्छेदकप्रतियोगिताकाइत्यत्र व्यापकतायाअवच्छेदोययेति बहुव्रीहौ कप्रत्ययस्तेन प्रतियोगितया सममवच्छेदकस्य समासेकोपधत्वेऽपि पुंवद्भावः तद्धितवुणोः कोपधस्यैव पुंवद्भावनिषेधादित्यभियुक्ताः । सर्व्वत्रेति सर्व्वत्र सद्धेतावसद्धेतौ चेत्यर्थः तथाच यावत्त्वानुक्तावतिव्याप्तिरित्याशयः । वाच्यत्वाद्यभावस्येति घटत्वादिना वाच्यत्वाद्यभावस्येत्यर्थः तथात्वात् प्रतियोगिसमानाधिकरणत्वात् तथाच धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थमेव यावत्पदमिति भावः । सर्व्वत्रेति सर्व्वत्रव्यभिचारिणीत्यर्थइत्यन्ये

योग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिप्रसङ्गेन ग्रन्थासङ्गतिरितिवाच्यमेकदोषोपन्यासे दोषान्तरस्य ग्रन्थासङ्गत्यप्रयोजकत्वात् । ननु घटाभाववह्न्यभावान्यतराभावनिष्ठप्रतियोगित्वावच्छिन्नाभावोयथा घटाभावस्वरूपस्तथा वह्न्यभावस्वरूपोऽपि तथाच वह्निमान् धूमादित्यत्र साध्यवदवृत्तिर्योवह्न्यभावस्तदीया या तादृशान्यतराभावनिष्ठा प्रतियोगिता तन्निरूपकत्वम् घटाभावेऽपि वर्त्तते तथाच उक्तव्यापकतावच्छेदकप्रतियोगिताकोघटाभावोऽपि भवति तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यादव्याप्तिरिति चेन्न यदभावमात्रनिरूपितप्रतियोगित्वावच्छिन्नाभावः साध्यवदवृत्तिस्तदभावस्यैव तादृशव्यापकतावच्छेदकप्रतियोगिताकाभावपदेन विवक्षनीयत्वादेतेन वह्न्यभावीयप्रतियोगित्व तद्वह्निनिष्ठप्रतियोगित्वान्यतरत्वाश्रयीत्याकारक साध्यवदवृत्त्यभावमादाय न दोषइति विभावनीयम् । अथ घटत्वेन गगणाभावाभावीयप्रतियोगित्वावच्छिन्नाभावस्यापि साध्यवदवृत्तित्वद्गगणम् तत्स्वरूपतयां घटत्वेन गगणाभावाभावमादायकेवलान्वयिस्थले लक्षणगमनसम्भवे कथमुक्ताव्याप्तिभिया लक्षणम् दुषितम् चेन्न गगणनिष्ठप्रतियोगित्वरक्षार्थम् गगणाभावत्वात्मकम् यद्गगणाभावसामान्याभावीयप्रतियोगित्वम् तदवच्छिन्नाभावः स्वीक्रियते नतु घटत्वेन गगणाभावाभावीयप्रतियोगित्वावच्छिन्नाभावोमानाभावात् तथाहि समनियताभावानामैक्यमते उक्ताभावप्रतियोगित्वस्य वाच्यत्वेऽपि सत्त्वात् तदवच्छिन्नाभावः स्वीकर्त्तुं न शक्यते वह्निमान् धूमादित्यादौ संयोगेन घटत्वेन वह्न्यभावीयप्रतियोगित्वावच्छिन्नाभावोऽगुणे प्रसिद्धः अतस्तन्मते

केचित्तु सर्व्वत्रेति सकलहेत्वधिकरणावच्छेदेनेत्यर्थइति प्राहुः । ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावोक्तौच वाच्यत्वाद्यभावमादायोक्तातिप्रसङ्गस्यव्युदाससम्भवात् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादानं गौरवग्रस्तमतआहातएवेति निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः अन्यथा भूतत्वाद्यभावस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकान्यत्वाद्भूतत्वमूर्त्तत्वोभयत्वाद्यवच्छिन्नाभावस्यच तादृशप्रतियोगिताकस्य स्वविशिष्टहेत्वाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः (२४) स्यादेवेतिभावः । यत्तु साध्यप्रतियोगिकोयत्किञ्चिदभावो यद्धर्म्मावच्छिन्नहेत्वाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्म्मवत्त्वामत्येवास्तु लक्षणम् कृतंयावत्त्वगर्भनिरुक्त्या-धूमवान् वह्नेरित्यादौ घटत्वेन धूमाभावस्यैव तादृशस्य हेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादतिव्याप्तिव्युदासादिस्याशङ्कयातएवेत्यादिकमवतारयन्ति तत्तुक्षम् तादृशांशङ्कायां धूमतान् वह्नेरित्यादिप्रसिद्धस्थलएव वह्निधूमोभयत्वावच्छिन्नाभावमा-

व्यतिरेकिनि नाव्याप्तिः केवलान्वयिन्यव्याप्तेरशक्यपरिहारत्वाच्च ग्रन्थसङ्गतिः यदभावीयप्रतियोगित्वावच्छिन्नाभावः साध्यवद्वृत्तिस्तदभावस्यैव लक्षणघटकत्वात् इतिध्येयम् ।

[२४] नच मनोभिन्नभेदमादायात्रातिव्याप्तिवारणं सम्भवतीतिवाच्यम् अत्र पक्षे व्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यघटकप्रतियोग्यधिकरणत्वस्य विवक्षितुमशक्यतया प्रतियोगितावच्छेदकसम्बन्धेन च तद्विवक्षणे पर्व्वतादिभिन्नभेदमादाय वह्निमान् धूमादित्यादावव्याप्तिरिति साध्यतावच्छेदकसम्बन्धेन तद्वाच्यं तथाच हेत्वधिकरणे मनसि मनोभिन्नमूर्त्तत्वरूपप्रतियोगिनः समवायेन सामानाधिकरण्यादतिव्याप्तेः । नच वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वादिभेदमादाय लक्षणसमन्वयसम्भवे प्रतियोग्यवृत्तिश्चेत्यादि ग्रन्थानुत्थितिप्रसङ्गइतिवाच्यम् अभावकूटलाघवार्थम् साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वस्य प्रतियोगितायां निवेशनीयतया तादृशाभावस्य लक्षणाघटकत्वादिति विभावनीयम् ।

दायातिव्याप्ति [२५] सम्भवे मूतत्वमूर्त्तत्वोभयवानित्याद्यनुधावनस्य सन्दर्भविरोधापत्तेः ।

यद्यपि यादृशाभावस्य प्रतियोगितायाव्यापकम् साध्यतावच्छेदकं तादृशः कश्चिदभावो यद्धर्म्मावच्छिन्नाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्म्मवत्त्वम् व्याप्तिरित्युक्त्यैव वाच्यत्वाद्यभावमादायातिव्याप्तिवारणसम्भवाद्यावत्त्वगर्भलक्षणम् गौरवग्रस्तमतोऽतएवेत्यादीति तदप्यसङ्गतं प्रतियोगितामात्रस्यैव प्रत्येकपर्य्यव-

---

[२५] नन्वत्र स्वाश्रयसाध्येतरावृत्तित्वेन प्रतियोगिताया विशेषणीयत्वे नोक्तातिव्याप्तिः स्वाश्रयनिवेशात् प्रमेयवान् वाच्यत्वादित्यत्र साध्येतराप्रसिद्धावपि घटत्वेन वाच्यत्वाभावमादाय लक्षणसमन्वयः सम्भवति इतिचेन्न तादात्म्येन प्रमेयस्य साध्यतायां वाच्यत्वादिहेतावव्याप्तिरिति स्वाश्रयसाध्येतराप्रसिद्धतया गगणेन प्रमेयनिष्ठप्रतियोगित्वस्य लक्षणाघटत्वात् एवं घटत्वेन वाच्यत्वाभावस्य लक्षणघटकत्वेऽपि साध्यतावच्छेदकीभूततादात्म्यसम्बन्धेन स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्याच्च । यद्यपि स्वतादात्म्य-स्वाश्रयसाध्येतरवृत्तित्वोभयसम्बन्धेन प्रतियोगित्वाभाववत् प्रतियोगिताया निवेशे विरुद्धघटत्वघटत्वोभयत्वेन प्रमेयाभावमादाय तत्रापि लक्षणसमन्वयसम्भवस्तथापि प्रमेयस्य विषयितासम्बन्धेन साध्यतायां प्रमेयत्वरूपेण प्रमेयविषयकतज्ज्ञानत्वादिहेतौ स्वविशिष्टहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकसम्बन्धेन प्रतियोगित्वावच्छिन्नासामानाधिकरण्यादव्याप्तिर्दुर्व्वारा यद्यपि स्वमतेऽतएवेत्यादिग्रन्थसन्दर्भव्याख्यानप्रस्तावे साध्यतावच्छेदकव्यापकत्वाद्युक्तावपि यदिउक्ताव्याप्तिभिया प्रतियोगित्वाश्रयनिष्ठानिरूपकतानिरूपिताधिकरणतावद्वृत्तित्वमेव प्रतियोगिसामानाधिकरण्यपदेन विवक्षणीयं तदात्रापि तादृशमेव प्रतियोगिसामानाधिकरण्यम् वाच्यम् तथाच सति नोक्ताव्याप्तिस्तथापिसमनियताभावानामैक्यमते घटत्वेन धूमाभावस्य गुणत्वेन द्रव्याभावरूपतया घटत्वेन धूमाभावस्यापि प्रतियोगिसामानाधिकरण्यादतिव्याप्तिः स्वमतेतु प्रतियोगितायां यावत्वनिवेशान्नातिव्याप्तिरिति विशेषतो विभावनीयम् ।

सितत्वेन वह्निधूमोभयत्वादेस्तद्व्यापकत्वासम्भवात् (२६) वह्निधूमोभयवान् धूमादित्यादावव्याप्तिभयेन तादृशानिरुक्तेः शङ्कितुमशक्यत्वादिति । नव्यास्तु साध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताको यत्किञ्चिदभावोयदधिकरणावच्छेदेन, साध्यतावच्छेदकसम्बन्धेन, तादृशप्रतियोगित्वाश्रयसमानाधिकरणस्तत्त्वमित्यस्यैव [२७] सम्यक्त्वे यावत्त्वगर्भलक्षणारम्भोगौरवग्रस्तः प्रमेयवान् वाच्यत्वादित्यादौ गगनाद्यवच्छिन्नप्रतियोगिताकं प्रमेयाभावं वह्निमान् धूमादित्यादौच वह्निसामान्याभावमादायैव लक्षणसङ्गमनाद्गगनादेर्वृत्तिमत्त्वलक्षणधर्म्मत्वाभावात् सामान्याभावीया-

---

(२६) अत्रप्रतियोगिताया व्यापकत्वं साध्यतावच्छेदकताघटकसम्बन्धेनावश्यम् विवक्षणीयम् तेन वह्निधूमोभयाभावीयप्रतियोगिताव्यापकत्वस्य समवायसम्बन्धेन वह्निधूमोभयत्वे सत्त्वेऽपि पर्य्याप्तिसम्बन्धेन तादृशव्यापकत्वासम्भवान्न ग्रन्थासङ्गतिरिति ननु प्रतियोगिव्यधिकरणयादृशप्रतियोगितावद्वृत्त्यभावाप्रतियोगित्वरूप यादृशप्रतियोगिताव्यापकत्वं वाच्यम् प्रत्येकावच्छेदेन वह्नौ धूमेवा वह्निधूमोभयत्वस्य सत्त्वाद्वह्निधूमोभयाभावीयप्रतियोगितावद्वृत्तिवह्निधूमोभयत्वाभावो न प्रतियोग्यसमानाधिकरणस्तथाच वह्निधूमोभयाभावस्य लक्षणघटकतया नाव्याप्तिरित्येतत्कल्पस्य परिष्कारसम्भवेऽपि समनियताभावानामैक्यमते घटत्वेन धूमाभावमादाय प्रागुक्तरीत्याधूमवान् वह्नेरित्यत्रातिव्याप्तिरत्र लक्षणे बोध्या केचित्तु यथाश्रुताभिप्रायेण ग्रन्थकृता दुषितत्वेन प्रतियोगिवैयधिकरण्यं निवेश्यतत्राव्याप्तिवारणं न क्षतिमावहतीत्याहुः ।

(२७) प्रमेयवत्वान् धूमात् इत्यादौ साध्यतावच्छेदकातिरिक्ताप्रसिद्ध्यापि नाव्याप्तिः साध्यतावच्छेदकातिरिक्तपदेन साध्यतावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकरूपावृत्तिप्रकारतावच्छेदकस्य विवक्षितत्वात् अत्रावृत्तिघटकवृत्तित्वन्तु स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनेति एतेन धूमवान् वह्नेरित्यत्र वह्निधूमोभयाभावमादायनातिव्याप्तिः एवं प्रतियोग्यंशे प्रकारीभूतधर्म्मस्य प्रतियोगितावच्छेदकत्वस्वीक-

न्यप्रतियोगित्वञ्च प्रत्याश्रयं विभिन्नमतो गगनाद्यवच्छिन्नप्रमेयमात्रस्याभावमादाय धूमवान् वह्नेरित्यादौ नातिप्रसङ्गः न चानवच्छिन्नान्तवैयर्थ्यं वह्निधूमोभयत्वावच्छिन्नाभावमादाय धूमवान् वह्नेरित्यादौ अतिव्याप्तेर्वारकत्वात् साध्यनिष्ठपदमपि तदर्थमेवान्यथा गगणाद्यव-

---

र्त्तृमते प्रेमयधूमवान् वह्नेरित्यत्र गगनेन प्रमेयाभावमादायातिव्याप्तिवारणाय साध्यनिष्ठत्वदलमपि साधु सङ्गच्छते न चोक्तस्थले संयोगेन प्रमेयाभावमादायातिव्याप्तिरिति वाच्यं उक्ताभावस्य द्रव्याभावरूपतया द्रव्यत्वे प्रतियोगितावच्छेदकत्वस्वीकारेणोक्ताभावस्य लक्षणाघटकत्वादिति विभावनीयं । प्रमेयवतस्तादात्म्येन साध्यतायां प्रमेयावच्छिन्नप्रतियोगित्वाप्रसिद्धयाव्याप्तिवारणाय गुरुधर्म्मेण साध्यतायामव्याप्तिवारणायच साध्यतावच्छेदकावच्छिन्नत्वं विहाय साध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नत्वमुक्तमिति ।

अथ धर्म्मानवच्छिन्नत्वमेव निवेश्यतां तावतैव गगनेन साध्याभावादिकमादायाव्याप्त्यतिव्याप्तिवारणसम्भवे किं गुरुतरनिवेशनेन चेन्न प्रतियोग्यंशे प्रकारीभूतधर्म्मस्य प्रतियोगितावच्छेदकत्वस्वीकर्त्तृनये वह्निमान् धूमादित्यादौ गगणेन वह्न्यभावादेर्लक्षणाघटकतया तादृशयत्किञ्चिदभावाप्रसिद्ध्या लक्षणगमनासम्भवात् अधर्म्मावच्छिन्नत्वनिवेशेतु प्रमेयविशिष्टाभावमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिरिति ध्येयं । ननु संयोगेन प्रमेयाभावादिकमादाय प्रमेयवान् वाच्यत्वादित्यादौ लक्षणगमनसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानवतारप्रसङ्गइति चेन्न; साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताको यत्किञ्चिदभावोयदधिकरणावच्छेदेन प्रतियोगितावच्छेदकसम्बन्धेन तादृशप्रतियागित्वाश्रयसमानाधिकरणस्तत्त्वमित्युक्तलक्षणस्य निष्कृष्टार्थतया तदभावस्य लक्षणाघटकत्वात्। उक्तग्रन्थानुत्थितिप्रसङ्गभयेन यत्किञ्चिदभावोयदधिकरणावच्छेदेन साध्यताघटकसम्बन्धेन साध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नसाध्यनिष्ठप्रतियोगित्वाश्रयसमानाधिकरणस्तत्त्वामित्येव लक्षणं कुतो न कृतमित्यपि परास्तं । परन्त्र तादृशप्रतियोगितापदेन साध्यनिष्ठप्रतियोगित्वस्य विवक्षणीयतया गगणेन प्रमेयाभावमादाय नातिव्याप्तिसम्भावना किं प्रथमोक्तसाध्यनिष्ठदलेन तदयुक्तं साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नाव-

च्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावमादाय (२८) व्यभिचारिमात्रे-तिव्याप्तयापत्तेः अतआह अतएवेति इत्यञ्च भूतत्वविशिष्टमूर्त्तत्वाद्यभावस्य साध्यतावच्छेदकातिरिक्तधर्म्मावच्छेद्यप्रतियोगिताकतया तस्य प्रतियोगिसामानाधिकरण्यं नातिव्याप्तिं सम्पादयतीत्याशयेन द्वित्वावच्छिन्नाभावपर्य्यन्तस्य प्रतियोगिसामानाधिकरण्याभिधानमपि साधु संगच्छते (२९) परन्तु प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताकः कश्चिदभावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्वमेवाव्यभिचरितत्वं कुतोन कृतं भूतत्वमूर्त्तत्वोभय-

---

च्छेदकत्वस्य उक्तप्रतियोगितायां लाभाय प्रथमोक्तसाध्यनिष्ठदलस्य सार्थक्यात् तथाच कालिकेन धूमत्वविशिष्टाभावमादाय न धूमवान् वह्नेरित्यत्रातिव्याप्तिरिति। नन्वत्र भूतत्व-मूर्त्तत्वोभयाभावस्य नित्यपरमाण्वादावसत्त्वेन हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यादेवातिव्याप्त्यसम्भवाद्ग्रन्थासङ्गतिरिति चेन्न गगणेन भूतत्वमूर्त्तत्वोभयाभावमादायातिव्याप्तिसम्भवात्।

(२८) जातिमान् जातित्वात् इत्यादौ हेत्वधिकरणावच्छेदेन साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्याप्रसिद्ध्या अतिव्याप्त्यसम्भवेऽपि स्वरूपसम्बन्धेन साध्यतायामिति व्यभिचारिमात्रे इत्यस्याग्रे निवेशात् न ग्रन्थासङ्गतिरिति ध्येयं।

(२९) प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताकइत्यत्र व्याप्यत्वं यदि साध्याभाववदवृत्तित्वरूपं तदा केवलान्वयिन्यव्याप्तिः यदिच प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वघटितव्याप्तिरुच्यते तदैतल्लक्षणस्य कथं न अर्थान्तरग्रस्तत्त्वं चेन्न यादृशप्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकं साध्यतावच्छेदकं तादृशप्रतियोगिताकोयत्किञ्चिदभावएव अत्र कश्चिदभावान्तपदेन विवक्षणीयत्वात् तथाच वह्निधूमोभयवान् धूमादित्यादौ प्रतियोगित्वावच्छिन्नाधिकरणे पर्व्वतादौ वह्निधूमोभयाभावस्यासत्वात् वह्निधूमोभयाभावमादाय लक्षणसमन्वयः।

विशिष्टसत्तावान् जातेः इत्यादावतिव्याप्त्यापत्तिः इत्यतः ताद्विन्त्यमित्युक्तं।

त्वावच्छिन्नप्रतियोगिताव्यक्तेस्तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेव तादृशोभयाभावमादायातिव्याप्त्यसम्भवादिति विभावनीयं इतिप्राहुः तच्चिन्त्यं केचित्तु ननु यत्किञ्चिदभावो यदधिकरणावच्छेदेन साध्यनिरूपितसाध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणः तत्त्वमित्येव लक्षणं कुतोनकृतमित्यतआह अतएवेतीत्यपि वदन्ति। भूतत्वमात्मभिन्नत्वे सति विशेषगुणवत्त्वं तच्च न व्यापकतायाप्रतियोगिवैयधिकरण्याघटितत्वकल्पे भूतत्वमूर्त्तत्वोभयस्य व्यापकं तादृशोभयवति घटादावुत्पत्तिक्षणावच्छेदेन विशेषगुणत्वावच्छिन्नाभावसत्वादत उक्तं मनोऽन्यत्वेति साध्यस्याभावमादाय नातिव्याप्तिः सुतरां वस्त्वन्तरस्येति कैमुतिकन्यायेनोक्तं मनोऽन्यत्वेतीत्यपि वदन्ति। अतथात्वादिति स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादित्यर्थः मनस्येवव्यभिचारादितिभावः। ननु यत्समानाधिकरणायावन्तोऽभावाव्याप्यवृत्तितानिरूपकप्रतियोगित्वाश्रयसमानाधिकरणास्तत्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नेत्यादिकं व्यर्थम्।

(३०) अभावस्य समानाधिकरणधर्म्मावच्छिन्नस्वीययत्प्रतियोगित्वाश्रयसामानाधिकरण्यं तदन्यप्रतियोगितायाएव व्याप्यवृत्तितानिरूपकतया धूमाद्यभावस्य पूर्व्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितायाअतथात्वेन धूमवान् वह्नेरित्यादौ अतिव्याप्त्ययोगादतआह साधनेत्यादि गोत्वादीत्यादिशब्देन गगणादिसंग्रहस्तथाच-

(३०) अत्र समानाधिकरणदलं व्यधिकरणधर्म्मावच्छिन्नाभावसंग्रहायेति ध्येयं। अथ वह्निमान् धूमादित्यत्र महानसीयत्वेन वह्न्यभावोऽप्युक्तयावदन्तर्गतस्तस्यच व्याप्यवृत्तितानिरूपकमहानसीयवह्नित्वावच्छिन्नं यत्प्रतियोगित्वं तदाश्रयसामानाधिकरण्यविरहादव्याप्तिभिया स्वीयपदं प्रकृतसाध्यव्यापकतावच्छेदकप्रतियोगितायामुक्तव्याप्यवृत्तितानिरूपकत्वलाभाय तथाचोक्तव्याप्यवृत्तितानिरूपकं प्रकृतसाध्यव्याप्यतावच्छेदकं यत्प्रतियोगित्वं तदाश्रयसामानाधिक रण्यमर्थः अतामहानसीयत्वेन वह्न्यभावस्य लक्षणीघट-

तद्दलानुक्तावसम्भव एवस्यादिति भावः नन्वेवं यत्समानाधिकरणा यावन्तः साध्यप्रतियोगिकाभावाः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणास्तत्त्वमित्येवोच्यतां तावतैव गोत्वाद्यभावमादायासम्भवस्य व्युदासादित्यतआह तत्तदिति तथाचोक्तविवक्षायां द्रव्यत्वाद्येकव्यक्तिसाध्यकसद्धेतौ लक्षणसम्भवेऽपि वह्निमान् धूमाज्जातिमान् सत्त्वादित्यादौ साध्यप्रतियोगिकानां तत्तद्वह्न्यभावानामात्मत्वाद्यभावानाञ्च प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरिति भावः। नच साध्यव्यापकप्रतियोगिकाद्यस्यैव सम्यक्त्वे व्यापकतावच्छेदकप्रतियोगिताकत्वपर्य्यन्तम् व्यर्थमिति वाच्यं तत्तत्साध्यव्यक्तीनां गगनादीनाञ्च प्रमेयत्वादिप्रकारेण साध्यव्यापकतया तदभावमादायासम्भवापत्तेः (३१) नच स्वानधिकरणसाध्यवन्निष्ठाभावाप्रतियोगित्वेन साध्यव्यापकत्वं निरुच्य तत्प्रतियोगिकाभावएव निवे-

---

कतया नाव्याप्तिशङ्कापीतिहृदयं केचित्तु अभावाधिकरणकाभावस्य अधिकरणस्वरूपत्वमते अयोगोलकभेदस्तु घटभेदरूपः प्रतियोगित्वन्तु प्रतियोगिस्वरूपं तथाच अयोगोलकभेदाभावीयायोगोलकभेदनिष्ठं यत्प्रतियोगित्वं तदाश्रयघटभेदसामानाधिकरण्यादयोगोलकभेदाभावमादायापि धूमवान् वह्नेरित्यादावतिव्याप्तिवारणं न सम्भवति इति स्वीयप्रदोषादात्तं तथाच विलक्षणायोगोलकभेदाभाव निरूपितत्वविशिष्टप्रतियोगित्वाश्रयाधिकरणत्वस्यायोगोलकेऽसत्त्वात् अयोगोलकभेदत्वावच्छिन्नप्रतियोगितायां न निरुक्तव्याप्यवृत्तितानिरूपकत्वहानिरित्याहुः तच्चिन्त्यं ।

(३१) ननु स्वानधिकरणसाध्याधिकरणकोयोयस्तदन्यत्वमेव व्यापकत्वमित्युक्तौ सामञ्जस्ये अभावप्रतियोगित्वदलं व्यर्थं? अत्र केचित् अस्यार्थोयदि स्वतादात्म्य स्वानधिकरणप्रकृतसाध्याधिकरण कालीनत्वोभयसम्बन्धेन यस्तुविशिष्टत्वावच्छिन्नप्रतियोगिताकोभेदः विवक्षितस्तदा गुरुधर्म्मस्यावच्छेदकत्वास्वीकारे गुरुरूपेण साध्यतायामव्याप्तिः अतः स्वानधिकरणसाध्याधिकरणकोय्योयस्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वंनिवेशनीयं तदपेक्षया स्वाधिकरणसाध्याधिकरणसकलकं यद्यत् तदन्यत्वविशिष्टं यत् सा-

श्यन्तामिति वाच्यम् तस्य लक्षणान्तरत्वेऽप्युक्तलक्षणस्यादुष्टत्वादिति भावः। यत्समानाधिकरणइत्यत्र हेत्वधिकरणत्वं विशिनष्टि येनेत्यादिना तदधिकरणमिति तत्सम्बन्धीत्यर्थः तेन तादात्म्येन हेत्वधिकरणाप्रसिद्धावपि तत्सम्बन्धेन सद्धेतौ नाव्याप्तिः अतथात्वेपीति प्रतियोग्यधिकरणवृत्तित्वविरहेपीत्यर्थः यद्यपि प्रतियोगिसामानाधिकरण्यमवश्यं स्वविशिष्टहेत्वधिकरणावच्छेदेनाग्रेविवक्षणीयं तथाच हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणानुक्तौ कालिकसम्बन्धेन धूमस्याधिकरणे महाकाले वर्त्तमानस्य (३२) प्रलयान्यत्वाभावस्यापि यावदन्तर्गतत्वात्तद्विशिष्टहेत्वधिकरणाप्रसिद्धया वह्निमान् धूमादित्यादावप्यव्याप्तिः सम्भवति तथापि स्वविशिष्टहेत्वधिकरणेत्यादेरुक्तावनुक्तौ चोभयथाप्ययमात्माश्रयानादित्यत्राव्याप्तिः।

वह्निमान् धूमादित्यत्रतु स्वविशिष्टेत्याद्युक्तावेव तथेत्याशयेन प्रसिद्धोदाहरणं परित्यक्तं यत्तु महाकालस्यैव प्रलयान्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसम्भवात् स्वशिष्टेत्याद्युक्तावपि वह्निमान् धूमादित्यत्र नाव्याप्तिः महाकालस्य हेतुताघटकसंयोगसम्बन्धेन धूमाधिकरणत्वाभावेऽपि हेतुसम्बन्धित्वानपायात् तादात्म्येन हेतोः संग्रहार्थं हेतुतावच्छेदकसम्बन्धेन योहेतुसम्बन्धी तद्वृत्तियावदभावानामेव निवेश्यत्वादिति मतं तत्तुच्छं संयोगमात्रेण धूमहेतोः प्रभामण्डलादौ वह्निव्यभिचारितया पर्व्वतादिनिरूपितसंयोगेनैव

ध्यवच्छिन्नाभावप्रतियेगित्वं तदवच्छिन्नप्रतियोगिताकभेदवत्त्वं व्यापकत्वमिति निवेशस्यसमीचीनतया एतादृशार्थकाभावप्रतियोगित्वादिघटितलक्षणमुक्तमित्याहुः नव्यास्तु तन्मात्रोक्तौ व्यापकत्वस्य पारिभाषिकत्वापत्त्या अभावप्रतियोगित्वघटितलक्षणं दर्शित मिति प्राहुः। अत्रलक्षणे तादृशाप्रतियोगित्वेसति वृत्तिमत्त्वमितिवाच्यं तेन गगनाभावमादाय नासम्भव इति ध्येयं।

(३२) ननु यद्वि जन्यभावाधिकरणत्वाभावरूपप्रलयत्वस्य कालिकसम्बन्धेन स्वविशिष्टहेत्वधिकरणत्वस्य प्रसिद्धिसम्भवात् ग्रन्थासङ्गतिरित्युच्यते तदा प्रलयत्वस्य चरमध्वंसस्वरूपत्वेन स्वधि-

तस्य हेतुत्वात् तादृशसंयोगेन च धूमस्याधिकरणे पर्व्वतादौ प्रलयत्वादिस्वरूपस्य प्रलयान्यत्वाद्यभावस्य वैशिष्ट्याप्रसिद्धेरावश्यकत्वात् भिन्नकालीनयोर्विषयतान्यसम्बन्धेनैवाधाराधेयभावविरहादिति दिक (३३) ननु पृथिवीत्ववान् महाकालत्वान्महाकालकपालान्यतरत्वाद्वा इत्यादावतिव्याप्तिः साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि हेत्वधिकरणमहाकालाद्यवच्छेदेन कालिकसम्बन्धेनैव प्रतियोगिसमानाधिकरणत्वादतआह एवमिति। एकसम्बन्धेन व्यापकत्वमन्यसम्बन्धेन प्रतियोगिसामानाधिकरण्यमित्येवं सम्बन्धभेदनिबन्धनः प्रोक्तातिव्याप्तिरूपोदोषः साध्यव्यापकताघटकसम्बन्धेन सार्द्धं प्रतियोगिसामानाधिकरण्यघटकसम्बन्धस्यैक्यविवक्षयानिरसणीयइत्यर्थः तथाच यत्सम्बन्धेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकं यत् तदन्यप्रतियोगिताकः साध्यवन्निष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितासमानधिकरणावच्छेदकान्यप्रतियोगिताकोऽभावस्तस्य तादृशसम्बन्धेन प्रतियोगिनोयदधिकरणं तदवृत्तित्वं विवक्षितमितिफलितार्थः। पृथिवीत्वाद्यभावप्रतियोगित्वन्तु न कालिकसम्बन्धेन पृथिवीत्वादिव्यापकतावच्छेदकं नित्यपृथिव्यांव्यभिचारात् किन्तु समवायेनैव तेन सम्बन्धेन पृथिवीत्वाद्यभावस्य हेत्वधिकरणमहाकालाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्याभावान्नोक्तातिव्याप्तिरितिभावः ननु येन सम्बन्धेन व्यापकत्वं तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्योक्तावपि (३४) नित्यज्ञानं नित्यस्वविषयकत्वादित्यत्रातिव्याप्तिः

शिष्टहेत्वाधिकरणत्वाप्रसिद्ध्याव्याप्तिर्बोध्येति (३३) विरुद्धहेतावतिव्याप्तिं दर्शयित्वा व्यभिचारिहेतौ तामाह महाकालकपालान्यतरत्वाद्वेति। कालत्वहेतौ पार्थिवरूपाभावमादाय नातिव्याप्तिः हेत्वधिकरणे महाप्रलये जन्यरूपादेरसत्वादतो महापदम्।

(३४) अत्र नित्यपदानुक्तौ ज्ञानत्ववति इच्छाभेदाविषयकज्ञाने विषयितया इच्छाभेदस्यासत्वात् विषयितायास्तादृशव्यापकताघटकसंसर्गत्वविलोपप्रसङ्गइति साध्यांशे नित्यपदं इच्छाभेदाविषय-

साधनसमानाधिकरणस्येच्छाभिन्नत्वाद्यभावस्य साध्यव्यापकताघटकविषयितासम्बन्धेन हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादिति (३५) नच येन येन सम्बन्धेन व्यापकत्वं तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यन्विवक्षणान्नैषदोषः तथासति यावत् पदवैयर्थ्यापत्ते विशेषणतासम्बन्धसामान्येनैव साध्यादिमन्निरूपितविशेषणतयापि वाच्यत्वादेः साध्यव्यापकतया घटत्वादिना वाच्यत्वाद्यभावस्यैव तादृशसम्बन्धेन हेत्वधिकरणावच्छेद्यप्रतियोगिसामानाधिकरण्यविरहाद्धूमवान् वह्नेरित्यादिव्यभिचारिण्यतिव्याप्त्यसम्भवादिति तन्मन्दं विषयितासम्बन्धेन व्यापकतायाएवासत्वात् विषयितासम्बन्धेन स्वावच्छिन्नाधिकरणाप्रसिद्ध्या स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभाव इत्यादिव्यापकतायास्तेन सम्बन्धेनासम्भवात्। नच तेन सम्बन्धेन स्वावच्छिन्नासम्बन्धित्वमेव व्यापकतायां निवेशनीयमुक्तातिप्रसङ्गभयेन तस्यानिवेश्यत्वान्न च तत्सम्ब-

---

न्धयत्किञ्चिज्जन्यस्वाविषयके हेत्वधिकरणे इच्छाभेदरूपप्रतियोगिनो विषयितादिसम्बन्धेनासत्त्वान्नातिव्याप्तिः सम्भवत्यतोहेत्वंशे नित्यपदम्।

(३५) ननु व्यापकताघटकसंसर्गोयोयस्तत्तन्निष्ठावच्छेदकताकप्रतियोगित्वाश्रयनिष्ठनिरूपकता प्रतियोगिसामानाधिकरण्यघटिका वाच्या तथाच सति साध्यवन्निरूपितस्वरूपस्य साध्यव्यापकताघटकसम्बन्धत्वेऽपि स्वरूपनिष्ठावच्छेदकताकप्रतियोगित्वाश्रयनिष्ठनिरूपकत्वघटितप्रतियोगिसामानाधिकरण्यसत्त्वाद्व्यभिचारिण्यतिव्याप्तिसम्भवेन यावत्पदस्य सार्थक्यसम्भवे अयं कल्पः कथं न परिष्कृतश्चेन्न अस्य लक्षणस्य येन येन सम्बन्धेनेत्याद्युक्तौ हेतुसमानाधिकरणाभावकूटविशिष्टकालीनहेतुतावच्छेदकमेवव्याप्तिरित्यनुगमः। वैशिष्ट्यञ्च स्वतादात्म्य-स्वनिरूपितप्रतियोगिताविशिष्टनिरूपकतानिरूपिताधिकरणताकूटवृत्तित्वोभयसम्बन्धेन प्रतियोगितावैशिष्ट्यन्तु स्वाश्रयनिष्ठत्व-स्ववृत्तिसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन स्ववृत्तित्वन्तु स्वावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वसम्बन्धेन उक्ताधिकरणताकूटवृ

न्धावच्छिन्नायाः साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकधर्म्मवत्त्वलक्षणंव्यापकत्वं विषयितासम्बन्धेन सुलभं साध्यवति नित्यज्ञाने वस्तुमात्रस्यैव विषयितासम्बन्धेन सम्बन्धित्वेऽपि नित्यज्ञानान्यत्वविशिष्टस्य घटादेर्विषयितासम्बन्धेनाभावस्य तत्र सत्त्वे वाधकाभावादिति वाच्यं विषयिताया वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः यदपि मनस्त्ववान् परमाणुत्वादित्यत्रातिव्याप्तिः परमाणुत्वसमानाधिकरणस्य मनस्त्वाद्यभावस्यापि साध्यव्यापकताघटकदिक्कृतविशेषणतया सर्व्वत्रैव परमाणौ प्रतियोगिसमानाधिकरणत्वादिति तदपि तुच्छं नित्यानामव्यावर्त्तकत्वाज्जन्यानामेवमूर्त्तानां दिगुपाधितया परमाणौ दिक्कृतविशेषणतया कस्याप्यसत्त्वात्तेनापिसम्बन्धेन साध्यव्यापकत्वविरहादन्यथा वस्तुमात्रस्यैव कालोपाधित्वसम्भवात्तदपि जन्यमात्रस्य नस्यादतएव प्रलयदशायां दिग्देशविभागोनास्तीत्यपि सिद्धान्तः सङ्गच्छते अन्यथा परमाणूनां सत्त्वात्तदानीमपि दिग्विभागप्रसङ्गादिति दिक् । यदि च स्पन्दोमहाकालत्वादित्यादावतिव्याप्तिः (३६) साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालिकसम्बन्धेन महाकाले प्रतियोगिसमानाधिकरणत्वात् ।

त्तित्वघटकवृत्तित्वन्तु स्वविशिष्टहेत्वधिकरणत्वव्यापकत्वसम्बन्धेन तथाच यावत्पदामरवे उक्तसम्बन्धेन हेतुसमानाधिकरणाभावविशिष्टकालीनहेतुतावच्छेदकमेव व्याप्तिरित्यवश्यं वक्तव्यं तावतापि उक्ताधिकरणताकूटान्तर्गता साध्यवन्निरूपितस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वाश्रयनिष्ठनिरूपकतानिरूपिताधिकरणतापि स्वविशिष्टहेत्वधिकरणत्वव्यापकत्वसम्बन्धेन तद्वृत्तित्वस्य घटत्वेन वाच्यत्वाभावेऽप्यसत्त्वाद्व्यभिचारिण्यतिव्याप्त्यसम्भवेन यावत्पदस्य वैयर्थ्यसंम्भवात् । केचित्तु साध्यवन्निरूपितस्वरूपस्य स्वरूपातिरिक्ततया उक्तकल्पे यावत्पदस्य वैयर्थ्योक्तिरतो न ग्रन्थासङ्गतिरित्याहुः ।

(३६) अत्रकालत्वमात्रस्य हेतुत्वे प्रलयप्रागभावाभावस्य महाकालादौ हेतुसमानाधिकरणस्य हेत्वधिकरणप्रलयावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिरतोमहेति ।

नच स्पन्द इत्याकारकयत्किञ्चिद्बोधव्यक्तेर्विषयतासम्बन्धेनैव स्पन्दत्वव्यापकत्वाद्यावदन्तर्गतस्य तदभावस्यैव व्यापकताघटकविषयतासम्बन्धेन हेत्वधिकरणे महाकाले प्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिर्निहितादृशबोधव्यक्तेः कालिकसम्बन्धेनापि स्पन्द-

---

ननु कालिकेन स्पन्दत्वमप्यव्याप्यवृत्ति स्पन्दत्ववति स्पन्दरूपकाले स्पन्दत्वानधिकरणदेशावच्छेदेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्पन्दत्वाभावस्य स्वरूपसम्बन्धेन सत्त्वादतएवोक्तं दीधितिकृता देशे कालस्य काले देशस्याप्यवच्छेदकत्वादिति तथाच कालिकसम्बन्धस्य प्रतियोगिवैयधिकरण्याघटितव्यापकताघटकसंसर्गत्वाभावात् स्पन्दत्वाभावमादाय स्पन्दो महाकालत्वादित्यत्रातिव्याप्तिविरहाद्ग्रन्थकृतोऽतिव्याप्त्यभिधानं न सङ्गतं। नचोक्तप्रतियोगिवैयधिकरण्यघटितव्यापकत्वमभिप्रेत्य कालिकस्यापि उक्तव्यापकताघटकसंसर्गत्वादतिव्याप्तिर्भवत्येवेति वाच्यं विषयितायाज्ञानसमानकालीनतया तद्बुद्धिव्यक्त्यभावदशायामेव स्पन्दत्ववति विषयतासम्बन्धेन तद्बुद्धिव्यक्त्यभावसत्त्वाद्विषयतासंम्बन्धेन स्पन्द इत्याकारकजन्यबुद्धेः साध्यव्यापकत्वासम्भवादित्युत्तरग्रन्थासङ्गतेः सर्व्वं प्रमेयं इत्याकारकयत्किञ्चिज्जन्यज्ञानाभावमादाय सर्व्वत्र लक्षणगमनसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थानुत्थितिप्रसङ्गाच्च अत्र सिद्धान्तः समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्पन्दत्वाभाव–स्पन्दानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाभावयो रैक्यमेव समनियताभावानामैक्यात् एवञ्च स्पन्दत्वाभावस्य प्रतियागियथा स्पन्दत्वं तथावाच्यत्वमपि भवति वाच्यत्वन्तु कालिकसम्बन्धेनापि व्याप्यवृत्ति तदनधिकरणदेशाप्रसिद्ध्या वाच्यत्वनिष्ठप्रतियोगिताविशिष्टाभावस्य स्पन्दे विरहात् तथाच स्पन्दानुयोगिकस्वरूपसम्बन्धावच्छिन्नाया वाच्यत्वनिष्ठप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकतावच्छेदकतया कालिकसम्बन्धावच्छिन्नतादृशप्रतियोगिताकत्वस्य समवायेन स्पन्दत्वाभावेऽपि सत्त्वात् स्पन्दत्वाभावमादायापि तादृशव्यापकताघटककालिकसम्बन्धेन स्वविशिष्टहेत्वधिकरणेमहाकाले प्रतियोगिनः सत्त्वात् नातिव्याप्त्युद्धारः स्यादेवेति न ग्रन्थासङ्गति रित्ययं विभावनीयः। केचित्तु एतदस्वरसेनैव किञ्चेत्यादिना दोषान्तरमभिहितमित्याहुः।

त्वव्यापकत्वं भाविभूतस्पन्देषु व्यभिचारादिति वाच्यं विषयताया ज्ञानसमानकालीनतया तद्बुद्धिव्यक्त्यभावदशायामेव स्पन्दत्ववति विषयतासम्बन्धेन तद्बुद्धिव्यक्त्यभावसत्त्वाद्विषयतासम्बन्धेन स्पन्दइत्याकारकजन्यबुद्धेः साध्यव्यापकत्वास (३७) म्भवात्। किञ्च व्यधिकरणधर्म्मावच्छिन्नाभावासत्त्वेपि व्यधिकरणसम्बन्धावच्छिन्नाभावमादायैव केवलान्वयिसाध्यकस्थले लक्षणसमन्वयात् प्रतियोग्यवृत्तिश्चेति मूलस्य दूषकत्वानुपपत्तिः नच साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरूपव्यापकतायां व्यधिकरणधर्म्मावच्छिन्नाभावमादायासम्भववारकस्य सामानाधिकरण्येनेत्यस्य (३८) व्यर्थतायामेव तन्मूलग्रन्थतात्पर्य्यमिति वाच्यं सामान्यधर्म्मेणविशेषाभावमादाय व्यापकत्वाप्रसिद्धिवारणार्थमेव सामानाधिकरण्यदलस्य व्यापकतायामवश्यं निवेशादित्यादिकं विभाव्यते तदा सम्बन्धैक्यविवक्षयेति ग्रन्थे साध्यव्यापकत्वस्य तदवच्छेदकप्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वस्य चैकसम्बन्धावच्छिन्नत्वविवक्षयेत्यर्थः तथाच प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताकायावन्तोऽभावाः स्वप्रतियोगितावच्छेदकसम्ब-

---

(३७) ननु उक्ताभावस्य साध्यव्यापकत्वासम्भवेऽपि स्पन्दत्वप्रकारक तद्बुद्धिशेष्यकनित्यज्ञानाभावमादाय नातिव्याप्तिरिति कुतोग्रन्थसङ्गतिरित्ययुक्तं तादृशाभावस्य नित्यज्ञानरूपप्रतियोगिसामानाधिकरण्यात् तदभावमादायाप्यतिव्याप्तिवारणायोगात् यथा विशिष्टसत्ताभावप्रतियोगिनी सत्तापि भवति तथोक्ताभावस्य प्रतियोगि नित्यज्ञानमिति विशिष्टस्य केवलानतिरेकात् तथाहि तदभावस्य प्रतियोगिसामानाधिकरण्ये बाधकाभावात्।

(३८) ननु सामानाधिकरण्येनेत्यस्य व्यर्थत्वं हि व्यधिकरणधर्म्मावच्छिन्नाभावोत्थितौ बीजं न सम्भवति कथं व्यर्थतायामेवतन्मूलग्रन्थतात्पर्य्यमित्यभिहितं चेन्न यदि व्यधिकरणधर्म्मावच्छिन्नाभावोनास्ति तदा व्यर्थविशेषणघटितैतल्लक्षणं स्यादित्यापत्त्यभिप्रायेन जगदीशेनोक्तत्वादिति ध्येयम्।

न्धेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभाद्यावदन्तर्गतस्य समवायादिसम्बन्धेन नित्यज्ञानत्वमनस्त्वस्पन्दत्वाभावस्य स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन यावद्धेत्वधिकरणे प्रतियोग्यसमानाधिकरणत्वाभित्यज्ञानं सविषयकत्वात् मनस्त्ववान् परमाणुत्वात् स्पन्दोमहाकालत्वादित्यादौ न कुत्राप्यतिव्याप्तिः नचैवं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिर्व्यधिकरणधर्म्मावच्छिन्नवाच्यत्वाद्यभावस्यैव तत्र घटकतया तस्यच प्रतियोगितावच्छेदक सम्बन्धसत्त्वेमानाभावादिति वाच्यं स्वरूपसम्बन्धेन घटत्वादिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि प्रतियोगितावच्छेदकसम्बन्धस्वीकारादन्यथा भूतलं संयोगेन पटत्वावच्छिन्नघटवदित्येवम् निर्णयसत्त्वेऽपि भूतले संयोगेन पटत्वेन घटोनास्तीति प्रत्ययापत्तेः नचैवमपसिद्धान्तोव्यधिकरणधर्म्मावच्छिन्नोपितदभावः प्रामाणिकस्तदासर्व्वैः सम्बन्धैस्तत्प्रतियोगिता अवच्छिद्यन्तामिति ग्रन्थकृतैव सामान्याभावे वक्ष्यमाणत्वात्।

केचित्तु सम्बन्धैक्यविवक्षयेत्यस्य साध्यवत्त्वं साध्यव्यापकत्वं प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वञ्चैकेन साध्यतावच्छेदकसम्बन्धेन विवक्षणीयमित्यर्थः तथाच साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसम्बन्धावच्छिन्नप्रतियोगिताकायावन्तोऽभावाः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभान्न कुत्राप्यतिव्याप्तिः।

नच (३९) प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षणं व्यर्थमितिवाच्यं तदनुक्तौ वाच्यत्वादिभेदमादायकेव-

---

(३९) नच प्रतियोगितायाः साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वविशेषणस्य व्यभिचाराद्यवारकस्य कुतोनव्यर्थत्वं इतिवाच्यं। साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वं तेनव्यापकत्वं व्यापकतावच्छेदकसम्बन्धेन प्रतियोगित्वं प्रतियोगितावच्छेदकसम्बन्धेन प्र-

लान्वय्यादौ लक्षणगमनसम्भवेऽपि प्रतियोग्यवृत्तिश्चेत्यादिमूले तन्निराकरणस्यासङ्गतत्वापत्तेः, नचैवमपि सर्वत्र वाच्यत्वाद्यभावस्येत्यादिग्रन्थविरोधः वाच्यत्वादे संयोगादिसम्बन्धेन धूमाद्यव्यापकत्वादितिवाच्यं वाच्यत्वाद्यभावस्येत्यादिपदसत्त्वाद्यत्र स्वरूपसम्बन्धेन साध्यता तत्रवाच्यत्वाद्यभावमादाय संयोगादिसम्बन्धेन साध्यतायाश्च द्रव्याद्यभावमादायातिव्याप्तिपरतयैव तत्सङ्गतेरित्याहुः तन्मन्दं मनोन्यत्वाद्यभावस्येत्याद्युत्तरग्रन्थविरोधात् भूतत्वमूर्त्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्सम्बन्धेनसाध्यस्यव्यापकत्वासम्भवात् (४०) वृत्त्यनियामकसम्बन्धेनाधिकरणस्य प्रतियोगित्वस्यचाप्रसिद्ध्या तेन सम्बन्धेन साध्यतायां धर्नीवैत्रत्वादित्यादिसद्धेतावव्याप्तेः तद्रूपान्यरूपं रूपत्वादित्यादावतिव्याप्तेश्च साध्यताघटकसमवायसम्बन्धेन साध्यव्यापकतावच्छेदकप्रतियोगिताकानां व्यधिकरणधर्म्मावच्छिन्नरूपत्वाद्यभावानां सर्व्वेषामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यादिति यत्तु विशेषणताविशेषेण साध्यव्यापकत्वं तेनैवच प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यञ्च सम्बन्धैक्यविवक्षयेत्यर्थमाहुस्तदपि गवाद्यभावस्यात्मत्वाद्यभावस्येत्यादिग्रन्थस्यालम्नकतापत्तेरुपेक्षितमीतसक्षेपः नव्यास्तु दलान्तरेपीत्यादिग्रन्थमन्यथा व्याचक्षते तथाहि हेतुसमानाधिकरणाइत्यत्र हेत्वधिकरणत्वस्य हेतुतावच्छेदकसम्बन्धेन विवक्षणेऽयमात्माज्ञानादित्यत्राव्याप्तिरेव (४१) घटत्वादिनाआत:-

---

तियोगिसामानाधिकरण्यमित्यस्यानुगमप्रनाल्यां लाघवेन निवेश्यतया प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानुक्तौ समवायेन वह्न्यभावमादाय तेन सम्बन्धेन हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् वह्निमान् धूमादित्यादौलक्षण गमनाभावप्रसङ्गात्।

(४०) ननु भूतत्वमनोन्यत्वाद्यभावेत्यादिपदेन स्पर्शाद्यभावमादायातिव्याप्तिवारणसम्भवादाह वृत्त्यनियामकेति।

(४१) ननु वह्निमान् धूमादित्यत्र घटत्वेन संयोगेन वह्न्यभाव-

त्वाभावस्यापि स्वविशिष्टहेतोर्विषयतयाधिकरणेघटादौ व्यापकताघटकसमवायसम्बन्धेन प्रतियोग्यसामानाधिकरण्यादित्यत आह दलान्तरेऽपीति पश्चादुक्तहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणदलेऽपीत्यर्थः सम्बन्धभेदनिबन्धनोदोषः एकसम्बन्धेनहेत्वधिकरणवृत्त्यात्मत्वाद्यभावस्यान्यसम्बन्धेन हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यप्रयुक्ताव्याप्तिरूपोदोषः सम्बन्धैक्यविवक्षयेति हेतुसमानाधिकरणा इत्यत्र हेत्वधिकरणत्वं येनसम्बन्धेन हेत्वधिकरणावच्छेदेनेत्यत्रापि हेत्वधिकरणत्वं तेनसम्बन्धेन विवक्षयेत्यर्थः इत्थञ्च दलान्तरपदमपि साधुसङ्गच्छतइतिभावः यद्वा ननुधूमवान् वह्नेरित्यत्रातिव्याप्तिर्धूमत्वादिनाधूमाभावस्यापि हेत्वधिकरणीभूतायोगोलकावच्छेदेन स्वप्रतियोगित्वस्य कालिकसम्बन्धेनाधिकरणीभूतवह्न्यादेः समानाधिकरणत्वादित्यत आह दलान्तरेपीति प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोगित्वाश्रयदलेपीत्यर्थः सम्बन्धभेदनिबन्धनोदोषः प्रकृतसाध्यव्यापकत्वस्यएकसम्बन्धावच्छिन्नावच्छेदकप्रतियोगिताकाभावस्यान्यसम्बन्धेनप्रतियोगित्वाश्रयीभूतवह्न्यादेः सामानाधिकरण्यनिबन्धनोदोषः सम्बन्धैक्यविवक्षया यत्सम्बन्धेनव्यापकतायाअवच्छेदकत्वं प्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यमित्यत्रापितेनसम्बन्धेन प्रतियोगित्वाश्रयत्वविवक्षयाप्रतियोगिपदस्य स्वशक्त्याबोधितयेत्यर्थ इति प्राहुः।

नन्वत्र सम्बन्धैक्याविवक्षायां रूपसामान्याभाववान् पृथिवी-

मादाय समवायेन वह्न्यसंयुक्तधूमावयवरूपहेत्वधिकरणे संयोगेन वह्न्यधिकरणत्वाभावादव्याप्तिरिति कथं प्रसिद्धच्छलस्योपेक्षा चेन्न हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावदवच्छेदनोक्तौ प्रसिद्धच्छलेऽव्याप्तिर्नसम्भवति पर्वतादेनिरूपितसंयोगस्यैव हेतुताघटकसंसर्गत्वात् तेनसम्बन्धेनाधिकरणत्वस्य धूमावयवेऽसत्वात् अयमात्माज्ञानादित्यत्रतु तथानिवेशेऽपयव्याप्तिसम्भवइत्यावेदयितु मुक्ताव्याप्त्युक्तत्वात् इतिध्येयम्।

त्वात् (४२) जन्य पृथिवीत्वाद्धेत्यादिविरुद्धहेतावतिव्याप्तिः साधन समानाधिकरणस्य पृथिव्यन्यत्वाद्यभावस्यापि हेत्वधिकरणपृथिवी जन्यपृथिव्यवच्छेदेन वा दिक्कृत विशेषणतया प्रतियोगिसमानाधिकरणत्वात् मूर्त्तमात्रस्य दिगुपाधित्वोपगमात्। नचैतस्यालक्ष्यत्व नीरूपमित्याकारकयत्किञ्चित् प्रमाव्यक्तेः विषयतासम्बन्धेन साध्यव्यापकत्वात् यावदन्तर्गतस्यच तदभावस्यैव हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः तादृशबुद्धिव्यक्तेर्भिन्नकालीनतया भाविभूतघटादौ न केनापि सम्बन्धेन सत्त्वादितिवाच्यं विषयताया ज्ञानसमानकालीनतया तादृशबुद्ध्यभावदशायामेव रूपशून्ये गगनादौ विषयतासम्बन्धेन बुद्ध्यभावप्रतियोगित्वावच्छिन्नाभावसत्त्वात् तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदक प्रतियोगिताकत्वाभावात् स्वावच्छिन्नानधिकरण साध्यवन्निष्ठेत्यादि व्यापकतायास्तद्व्यक्तिबुद्धौ सत्त्वेऽपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वगर्भनिरुक्तेरुक्तस्थलेऽतिव्याप्तेरावश्यकत्वादिति भ्रमं मतं निराकुरुते रूपादिसामान्येत्यादिना, पृथिवीत्वादिकमिति नित्यपृथिव्यां दिगुपाधित्वे मानाभावादादिपदं तेन जन्यपृथिवीत्वाद्युपग्रहः सद्धेतुत्वप्रतिकूलं विरोधं निरस्यतिप्रलये इति महाप्रलये इत्यर्थः खण्डप्रलयेतु पार्थिवपरमाणौरूपमस्त्येव अन्यथोत्तरसर्गे पार्थिवद्व्यणुकस्यरूपोत्पत्त्यर्थं परमाणोः पाकान्तरकल्पनापत्तेरितिप्राञ्चः प्रलयेइत्यस्य पाकेनरूपादेः प्रलयदशायामित्यर्थः तेन महाप्रलय नभ्युपगमेऽपि नक्षतिरुत्पत्तिकालेच इत्यत्र चकारेण निरुक्त स्याप्यनुकर्षादवयविन्यपि पाकदशायां तत्सत्त्वान्न ग्रन्थन्यूनतेत्यपरे। ननु विरोध विरहेऽपि घटाद्यवच्छेदेन व्यभिचारात् कुतः सद्धेतुत्व मतआह उत्पत्तीति यद्यपिपाकेन श्यामादिनाशकालेऽप्य

---

(४२) नच मुर्त्तमात्रस्यदिगुपाधित्वेधूमवान् वह्नेरित्यत्रैवातिव्याप्तिः किं स्थलान्तरानुधावनमिति वाच्यं धूमासमानकालीनायोगोलकेहेत्वधिकरणे केनापिसम्बन्धेनावर्त्तमानत्वात्।

घयविनि तस्य सत्त्वं तथापि पिलुपाकवादिमते तदसम्भवादपच्यमानावयव्यनुरोधाच्चोत्पत्तिकालमात्रानुसरणं तत्सत्त्वादिति रूपादिसामान्याभावसत्त्वादित्यर्थः। प्रतियोगिवदिति प्रतियोगिनइवेत्यर्थः। विरोधित्वं एकदेकदेशावृत्तित्वं मानाभावादिति। प्रलयाद्यवच्छेदेन परमाण्वादौ रूपादिसामान्याभावेतु योग्यसन्निकर्षाभावात् प्रत्यक्षासम्भवेप्यनुमानादिकमेव (४३) मानमस्तिइत्याशयः। यत्तु घटादावुत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव सम्भवति तदानीं चक्षुः संयुक्तविशेषणतायास्तत्रासत्त्वेऽपि द्रव्यसमवेतवृत्त्यभावप्रत्यक्षहेतोश्चक्षुः संयुक्तसमवेतविशेषणतायाः सत्त्वेन सन्निकर्षसम्भवादिति तत्तुच्छं चक्षुः संयुक्तसमवेतद्यनुकविशेषणतया रूपाद्यभावचाक्षुषापत्त्या चक्षुः (४४) संयुक्तयोग्यसमवेत विशेषणताया एवाभावग्राहकत्वेन द्रव्यान्यद्रव्यसमवेतवृत्त्यभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमादन्यथाऽत्रसरेणु वृत्त्यभावचाक्षुषे व्यभिचारापत्तेरितिभावः।

---

(४३) यः स्ववृत्तित्वविशिष्टयद्धर्म्मावच्छिन्नानधिकरण यत्कालवृत्तितावान् स तत्कालावच्छेदेन तद्धर्म्मावच्छिन्नाभाववानितिव्याप्त्या स्ववृत्तित्वविशिष्टयद्धर्म्मावच्छिन्नानधिकरण यत्कालवृत्तित्वमेव मानमित्याशयः स्ववृत्तित्ववैशिष्ट्यन्तु सामानाधिकरण्य सम्बन्धेन बोध्यम्।

(४४) नन्वत्र तादृशसमवेतांशे योग्यत्वविशेषणं दीयतां तावतैव त्र्यसरेणुवृत्त्यभावचाक्षुषेनव्यभिचारइतिकुतः तादृश संयुक्तांशे ...त्वं निवेश्यद्रव्यान्यघटितगुरुतरतत्कार्य्यतावच्छेदकं कल्प्यते चेन्न परमाणावेव चक्षुः संयोगसत्त्वदशायामपि पृथिवीत्वादौ योग्यसमवेतत्वस्यसत्त्वात्तदानीमपि पृथिवीत्वादौ रूपसामान्याभावस्य प्रत्यक्षापत्त्यासंयुक्तांशे योग्यत्वनिवेशस्यावश्यकत्वात् तथाचोक्त व्यभिचारवारणाय द्रव्यान्यघटितकार्य्यतावच्छेदकमावश्यकमितिध्येयं अत्र योग्यत्वं समवेतांशेऽपि निवेशनीयमन्यथा गुरुत्वस्यातीन्द्रियत्वेऽपि तत्र चक्षुः संयुक्तयोग्यसमवेतत्वसत्त्वात् चक्षुः संयुक्तयोग्यसमवेतविशेषणतया गुरुत्वादौ रूपसामान्याभावचाक्षुषा

वस्तुतः स्वोत्पत्तेः पूर्व्वं चक्षुः संयुक्तसमवेतस्यघटादेरसत्त्वा त्तद्विशेषणतायामपि तदानीमसत्त्वादुक्तक्रमेणैव प्रत्यक्षासम्भवादिति ध्येयम् अतएवेति ध्वंसप्रागभावयो रत्यन्ताभावविरोधित्वे मानाभावादेवेत्यर्थः। एकिमध्वंसप्रागभावयोः सत्त्वमावेदयितु मन्तरापदम् रक्तं रूपमिति नच गुणेशुक्लादयः पुंसीत्यनुशासनाद्रक्तोरूपमित्येव प्रयोगोयुक्त इतिवाच्यम् वस्त्वन्तराविशेषणस्यैव शुक्लादिगुणबोधकपदस्य पुंस्त्वानुशासनात् अतएवशुक्लं रूपमितिप्रयोगः समासवादे मणिकृतैव वक्ष्यते इतिध्येयम्। एषः रक्तं रूपं नास्तीतिप्रत्ययः, पूर्व्वेत्यादि पूर्व्वरक्तस्यध्वंसवत्युत्तररक्तस्यप्रागभाववतीदानीं रक्तेपीत्यर्थः नच रक्ततादशायां वर्त्तमानस्यापि रक्तान्तरध्वंसादेस्तदानीम् रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न तादृशप्रत्ययस्तस्याव्याप्यवृत्तित्वादितिवाच्यम् ध्वंसप्रतियोगित्वस्य सामान्यधर्म्मानवच्छेद्यत्वात्तत्तदनन्तध्वंसप्रागभावादिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनामपेक्ष्य रक्तत्वावच्छिन्नात्यन्ताभावसम्बन्धस्यैवान्तराश्यामादिदशा यां कल्पनायालघुत्वाच्च नच (४५) यावन्ति रक्तरूपाणि त-

---

पत्तिः अतएव संयुक्तसमवेतमध्यवर्त्तियोग्यपदं ननु योग्यचक्षुः संयुक्तसमवेतवृत्त्यभावचाक्षुषं प्रति योग्यचक्षुःसंयुक्तसमवेतविशेषणतायाः कारणत्वमस्तु तावतैव त्र्यसरेणुवृत्त्यभावचाक्षुषे न व्यभिचारः। कथंघटे उत्पत्तिकालावच्छेदेन रूपसामान्याभावप्रत्यक्षासम्भवइतिजगदीशोक्तिः ? चेन्न, घटस्याविद्यमानतादशायां योग्यचक्षुः संयुक्तसमवेतविशेषणताया असत्त्वादुत्पत्तिकालावच्छेदेन घटेरूपसामान्यप्रत्यक्षासम्भवस्य वज्रलेपत्वात्।

(४५) तत्तद्व्यक्तित्वेतरधर्म्मानवच्छिन्नान्तदलं गुणसान्याभावनिरासार्थं तेनान्तराश्यामे गुणसामान्याभावासत्त्वेऽपि न तादृशप्रतीतेः काश्चिद्बाधकः। श्यामध्वंसस्यापि प्रतियोगिता तादृशधर्म्मानवच्छिन्नैव तन्निरूपकध्वंसवारणाय तत्तद्व्यक्तिनिष्ठेति, ननु यस्य रक्तरूपस्यान्तराश्यामेध्वंस स्तद्रक्तरूपत्वावच्छिन्नप्रतियोगिताकाभावस्य ध्वंसादिना सह विरोधित्वादन्तराश्यामे असत्त्वात् कथं अन्तराश्यामेरक्तरूपं नास्तीतिप्रतीतिश्चेन्न, यावन्ति रक्तरूपाणि तत्तद्व्यक्तिवृत्यु-

त्तद्व्यक्तित्वेतरधर्म्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावैरेव रक्तं रूपं नास्तीतिप्रत्ययः क्रियते प्रकृतेच विद्यमानरक्तरूपप्रतियोगिताकस्य तादृशाभावस्यासत्त्वान्न तथाप्रतीतिरितिवाच्यं तथासत्यन्तराश्यामे रक्तं रूपं नास्तीत्याकारनिर्णयेऽपि तत्र रक्तं रूपमस्तीति प्रत्ययापत्तेर्विरोधिनः सामान्याभावस्यानिश्चयाद्विशेषाभावकूटनिश्चयस्याप्रतिबन्धकत्वादन्यथा सामान्याभाव एव न सिद्ध्येदितिभावः प्राञ्चस्तु प्रतियोगितासम्बन्धेन रूपत्वमात्रावच्छिन्नप्रकारताकः संसर्गाभावविशेष्यकः प्रत्ययो रूपत्वावच्छिन्नप्रकारताकबुद्धेर्विरोधीति रूपत्वं प्रतियोगितावच्छेदकरूपमेव नेत्ि. श्यामतादशायां रूपत्वावच्छिन्नाभाव एव रूपं नास्तीतिप्रतीतेर्नविषयः किमनुरोधेन रूपध्वंसादिमति तदत्यन्ताभावसिद्धिरितिप्राहुः। अन्तराश्यामे समवायेन रक्तं रूपं नास्तीतिप्रतीतेः प्रामाण्यानुरोधादेव ध्वंसात्यन्ताभावयोर्न विरोधोऽन्यथा समवायावच्छिन्नप्रतियोगिताकध्वंसाद्यप्रासिद्ध्या तत्प्रतीतेर्भ्रमत्वापत्ते रितितु परमार्थः।

तत् सामानाधिकरण्यञ्चेति प्रतियोग्यसामानाधिकरण्यञ्चेत्यर्थः, स्वविशिष्टेति स्वपदं साध्यव्यापकतावच्छेदकप्रतियोगिताकतत्त-

---

भयावृत्तिधर्म्मकूटविशिष्टधर्म्म्यैव रक्तंरूपं नास्तीति प्रतीतिविषयः। अत्रवैशिष्ट्यन्तु स्वविशिष्टप्रतियोगितानिरूपकाभाववत्तासम्बन्धेन प्रतियोगितायां वैशिष्ट्यन्तु स्वसामानाधिकरण्य स्वेतरानवच्छिन्नत्वोभयसम्बन्धेन, तथाच यद्रक्तस्य ध्वंसोऽस्ति तदत्यन्ताभावो न वर्त्तते तत्रापि तद्रक्तवृत्त्युभयावृत्तिधर्म्मस्योक्तसम्बन्धेन स्वविशिष्टप्रतियोगितानिरूपकध्वंसात्मकाभाववत्त्वस्य धर्म्मिणि सत्त्वात् तादृशकूटविशिष्टधर्म्मिणः उक्तप्रतीतेर्विषयत्वं सम्भवतीतिध्येयं। यद्वा रक्तरूपत्वव्यापकं यत् कूटत्वं तदवच्छिन्नवत्त्वमेव उक्तप्रतीतिविषयः व्यापकताच स्वसमानाधिकरणानुयोगिताविशिष्टप्रतियोगितावत्त्वसम्बन्धेन अनुयोगितावैशिष्ट्यन्तु स्वनिरूपितत्व-स्वनिरूपितप्रतियोगित्वसम्बन्धावच्छिन्ननिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकीभूतरूपावृत्तित्वोभयस-

दभावव्यक्तिपरं तथाच तत्तदभावाश्रयीभूतं यद्धेतुताघटकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरणं तदवच्छेदेन तत्तदभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यमित्यर्थः। तेन हेतुसमानाधिकरणस्य घटत्वेन वह्न्यभावस्य कालिकादिसम्बन्धेन धूमाद्यधिकरणस्पन्दादौ व्यापकताघटकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्याभावेऽपि वह्निमान् धूमादित्यादौनाव्याप्तिः। नवा द्रव्यं विशिष्टसत्त्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणगुणाद्यवच्छेदेन प्रतियोग्यसमानाधिकरणत्वेऽपि क्षति र्गुणानां विशिष्टसत्तात्वावच्छिन्नानधिकरणत्वात् यद्यपि व्याप्यवृत्तेरवच्छेदकत्वे मानाभावात् वाच्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यम् तदवच्छेदकत्वं न हेत्वधिकरणस्येत्यसम्भवः (४६) कथितातिव्याप्तितादवस्थ्यञ्च नच स्वविशिष्टहेत्वाधिकरणताव्यापकप्रतियोग्यधिकरणतावद्वृत्तित्वं वाच्यम् स्वविशिष्टपदस्य व्यर्थतापत्तेः स्वप्रतियोग्यधिकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ च द्रव्यं तद्घटत्वादित्यादावव्याप्तिर्यावद्धेत्वधिकरणाप्रसिद्धेः तथापि (४७) यावन्तो हेतुमद्वृत्तिधर्म्मा हेत्वधिकरणत्वानि वा यावन्ति तत्प्रत्येकाश्रयीभूतप्रतियोग्यधिकरण वृत्तित्वस्यविवक्षितत्वान्न दोषः एकमात्रवृत्तिहेतावपि तत्तत्क्षणवृत्तित्वविशिष्टस्य बहुतराधिकरणत्वस्य सत्त्वादिति ध्येयम् नच निरूक्तप्रतियोग्यधिकरण-

---

म्बन्धेन रूपावृत्तित्वघटकवृत्तित्वन्तु स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धने इत्यत्रकल्पे न काचित् क्षतिरस्ति इति सुधीभिर्विभाव्यम्।

(४६) तादृशसामानाधिकरण्यस्याव्याप्यवृत्तित्वं स्वीकृत्य व्याप्यवृत्तेर्वा स्वरूपसम्बन्धरूपावच्छेदकत्वं स्वीकृत्यासम्भववारणे कालोगोमान्गोत्वादित्यादावतिव्याप्तिर्गवाद्यभावनिष्ठगोसामानाधिकरण्यस्य सृष्टिकालरूपहेत्वाधिकरणावच्छेद्यत्वादितिभावः।

(४७) अत्र कल्पेस्वविशिष्टहेत्वधिकरणोयः स, न, हेत्वधिकरणत्वयावदाश्रयः अतः स्ववैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन

वृत्तिस्वविशिष्टयावद्धेत्वधिकरणताकत्वमात्रं सम्यक् हेतुसमानाधिकरणा इत्यस्य स्वविशिष्टपदस्यच व्यर्थत्वात्। प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेनेत्यस्य प्रवेश एवार्थवद्भविष्यतीत्यतः पश्चादुक्तस्यापि तस्य प्रथमं प्रयोजनमाहतेनेति गोत्वादिना गवाद्यभावस्यापि तद्वतिकाले वृत्तावपि यदागोत्वं तदागौरित्यादौ नातिप्रसङ्ग इतियोजना इदंउपलक्षणं तत्तदयोगोलकान्यत्वाभावस्यापि काले प्रतियोगिसमानाधिकरणत्वाद्धूमवान् वह्नेरित्यत्रातिप्रसङ्गो द्रष्टव्यः गवाद्यभावस्य प्रतियोग्यधिकरणे दैशिकसम्बन्धेनापि वृत्तित्वमुपादयितुमाह गवाद्यनधिकरणेति इदानीं चत्वरे गौर्नास्तीति प्रत्ययात् गोमत्यपिकाले कालिकसम्बन्धेन गवाद्यभावस्य गवाद्यनधिकरणचत्वरत्वाद्यवच्छेदेन वृत्तौ न विरोधः। नचैतत् प्रत्ययस्य चत्वरएवैतत् कालावच्छेदेन गवात्यन्ताभावोविषयइतिवाच्यम् देशवृत्तौ कालस्येव कालवृत्तौ देशस्याप्यवच्छेदकत्वानुभवादेकशेषस्य कर्त्तुमशक्यत्वादिदानीं गगणे गौर्नास्तीतिप्रतीतेर्गवाद्यभावस्यैतत् कालावच्छेदेन गगणवृत्तित्वावगाहितायां भ्रमत्वापत्तेश्च गवाद्यभावस्य गगणादौ सार्व्वकालिकत्वेन व्याप्यवृत्तितया कालाद्यवच्छेद्यत्वासम्भवादितिभावः। तद्वतीति गवादिमतीत्यर्थः काले जन्यकाले ~~ननुचरमध्वंसात्मकस्य~~ महाप्रलयात्यन्ताभावस्यापि यावदन्तर्गतत्वात् तस्यच सृष्टिकाले प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरतआह महाकालेवेति तथाच तस्यापि महाकाले प्रतियोगिसामानाधिकरण्यं तस्य कालिकसम्बन्धेन जगदाधारत्वादितिभावः ननुगोत्वादिजातेः प्रलये कालिकसम्बन्धेन सत्वप्रमाणाभावाद्यदागोत्वं तदागौरिति सद्धेतुरेवेति यदिब्रुयात्तदाप्याह यत्रकाल

वक्तव्यम् तथाच स्वविशिष्ट हेत्वधिकरणत्वानि यावन्ति तदाश्रयीभूतप्रतियोग्यधिकरणवृत्तित्वस्य कपिसंयोगाद्यात्मकाभावे सत्त्वात् कपिसंयोगाभाववान् मेयत्वादित्यादौनक्षतिरिति चिन्त्यम्। (ण) प्रमाणाभावादितिकालवृत्तिताया देशस्यावच्छेदकत्वात्तदानीं गोस्वरूपदेशस्यासत्वात् सद्धेतुत्वमितिभावः।

त्वमिति (४८) उक्तविवक्षानादरे घटादि साधारणरूपेणापि गोः साध्यतायामतिव्याप्तिरित्याशयेन साध्यान्तर माह जन्यं द्रव्यमिति द्रव्यस्य साध्यतायां कालत्वं सद्धेतुरेव प्रलयेऽपि कालिकसम्बन्धेन परमाण्वादेः सत्त्वा दित्यतोऽव्यभिचारित्वसम्पत्तयेजन्यपदम् । ननु महाप्रलयानङ्गीकारे प्रागुक्तहेतुद्वयमेवलक्ष्यं खण्डप्रलयेऽपि ब्रह्माण्डान्तरे जन्यद्रव्यसत्त्वादतः साध्यान्तरमाह प्रलयावृत्तिर्वेति खण्डप्रलयावृतिर्व्वेत्यर्थः यद्यपि प्रतियोगिनोयदधिकरणं तद्वृत्तित्वस्य दैशिकविशेषणतासम्बन्धेन विवक्षायामपि यदागोत्वं तदागौरित्यादावतिव्याप्तिवारणं सम्भवति प्रलयावृत्तित्वावच्छिन्नाभावस्य स्वप्रतियोग्यधिकरणमहाकालादौ दैशिकाविशेषणतासम्बन्धेन वृत्तित्वविरहात् । नच द्रव्यं महाकालत्वादित्यत्राव्याप्तिः कालिकसम्बन्धेन महाकालनिष्ठस्य द्रव्यत्वाद्यभावस्य स्वप्रतियोग्यधिकरणे दैशिकविशेषणतया वृत्त्यभावादितिवाच्यम् हेतुसमानाधिकरणस्यापि तादृशविशेषणतया निवेशनीयत्वात् तथापि रूपभिन्नम् गुणत्वादित्यादौ साधन समानाधिकरणस्य रूपान्यत्वाद्यभावस्य रूपभिन्नत्वप्रकारकप्रमाविशेषत्वाद्यभावस्यच रूपत्वादिस्वरूपत्वात्तस्य दैशिकविशेषणता सम्बन्धेन वृत्तित्वविरहेण यावदनन्तर्गतत्वाद् घटत्वादिना रूपभिन्नत्वाद्यभावस्य च सर्व्वस्यैव महाकालादौ स्वप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिरतः स्वाविशिष्टहेत्वधिकरणेत्यादिविवक्षानुसरणमिति वदन्ति । (४९) वस्तुतो दैशिकाविशेषणताघटितस्यलक्षणान्तरत्वादेकेनापरस्यान्यथा कर्तुमसक्यत्वादुक्तलक्षणे न वैयर्थ्यमितिध्येयम् । यत्तु (५०) विशेषणतया हेतुसमानाधिकरणानां निरुक्तयावदभावानां

---

(४८) उक्तेति गोत्वरूपेण गोः साध्यतानादरेऽपि घटादिसाधारणजन्यद्रव्यत्वरूपेण गवादेः साध्यत्वेऽतिव्याप्तिरिति भावः ।

(४९) तद्व्यक्तित्वाभावाभावमादायातिव्याप्तिवारणसम्भवादत आह वस्तुतस्त्विति ।

(५०) नच दैशिकविशेषणतया हेत्वधिकरणंवृत्तित्वनिवेशो-

ताद्दशसम्बन्धेन प्रतियोगिवृत्तित्वमेव वक्तुमुचितम् नतु प्रतियोग्यधिकरण वृत्तित्वप्रवेशो गौरवात् सर्व्वत्रव्यभिचारिस्थलान्यत्वाभावस्यैव प्रतियोग्यवृत्तित्वेनातिव्याप्त्यसम्भवादिति तत्तुच्छं (५१) स्ववृत्तित्वविशिष्टानां केवलान्वयिधर्म्माणामत्यन्ताभावस्य यावदन्तर्गतस्य प्रतियोग्यवृत्तित्वेनसद्धेतावसम्भवापत्तेर्नहिव्याच्यत्वादिवृत्तित्वविशिष्टानांवाच्यत्वादीनामभावोवाच्यत्वादिरूपप्रतियोगिवृत्तिरितिदिक् । प्राचांमते संयोगसामान्याभावसाध्यकं प्रमेयत्वं द्रव्यएव व्यभिचारीत्यतःकपिपदं प्रतियोगिवैयधिकरण्यघटितमेव साध्यव्यापकत्वमत्र निवेशितं यथा सन्निवेशंवैयर्थ्यविरहावतस्तदनवच्छेदकत्वं संयोगाभावनिष्ठप्रतियोगित्वेप्यक्षत मित्याशयेन संयोगाद्यात्मकाभावाभिधानं तदघटित साध्यव्यापकतायाः प्रवेशेतु गगणत्वादिविशिष्टस्य गगणाद्यभावस्याभावो यावदन्तर्गत इति तस्यैव हेत्वधिकरणीभूतगगणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरतः स्वविशिष्टपदं वोध्यं एतदभिप्रायेणैव संयोगाद्यात्मकाभावेत्यादिपदं । वस्तुतः सत्त्वावान् द्रव्यत्वात् गुणत्ववान् रूपत्वादित्यादौकाले जन्यरूपेच हेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्यच केनापिसम्बन्धेनात्म गगनादौ नित्यरूपेचावृत्तित्वाद्धेत्वधिकरणाव-

---

ऽनुचितइतिवाच्यं घटभेदाभावस्य कालिकसम्बन्धेन स्पन्दादौवर्त्तमानस्य निरुक्तयावदन्तर्गतस्य विशेषणतया प्रतियोग्यवृतित्वाद्धटभिन्नं स्पन्दत्वादित्यादावव्याप्तेः ।

(५१) ननु वैशिष्ट्यानवच्छिन्नत्वनिवेशनेनासम्भववारण सम्भवात् कथं नायं कल्पः परिस्कृतः नच वाच्यत्वत्वेन वाच्यत्ववृत्तित्वविशिष्टवाच्यत्वाभावमादायासम्भवइतिवाच्यं निरुक्तव्याप्यवृत्तितानिरूपकप्रतियोगिताकाभावस्य निविष्टत्वेन तदभावस्य लक्षणाघटकत्वात् चेन्न, अधिकरणभेदेन अभावस्य भिन्नत्वात् पर्व्वतवृत्तिवह्नेयभावो न वह्निवृत्तिं रित्यसम्भवसम्भवात् तथाहिहेत्वधिकरणपर्व्वते वर्त्तते यो वह्नेयभावः स न तस्य प्रतियोगिवह्नौवृत्तिरितिध्येयम् ।

च्छेदेन तस्यैव यावदन्तर्गतस्य प्रतियोगिसामानाधिकरण्यविरहा-दव्याप्तिः स्याद्यदि स्वविशिष्टपदं नस्यादितिदिक् । ननु धूमाद्यभाव-निष्ठो जलादिवृत्तित्वविशिष्टस्य गोत्वाद्यभावस्याभावो धूमाद्यभाव ए-वाभावप्रतियोगिकस्याभावाधिकरणकाभावस्याधिकरणस्वरूपत्वा-त्तथाच धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमाद्यभावस्यापि हेत्वधि-करणावच्छेदेनैव गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वा (५२) दतआह जलादिवृत्तीति नच तादृशाभावस्य धूमाभावरूपत्वेऽपि ज-लादेर्न तादृशाभावत्वावच्छिन्नाधिकरणत्वं एवंति न प्रत्ययातिप्रसङ्ग इतिवाच्यम् एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसङ्गात् उक्तक्रमेणैवा-तिप्रसङ्गस्य वारणसम्भवादितिभावः । ननु तथापि धूमवान् वह्ने-रित्यादावतिव्याप्तिः समनियताभावानामैक्याद्धूमाभावस्य धूमत्वे-न प्रमेयाभावादभिन्नस्यायोगोलकान्यत्वाभावादेश्चायोगोलकभेदत्वा-दिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणावच्छेदेन वह्न्यादि-भेदाद्यात्मकप्रतियोगिसमानाधिकरणत्वादिति चेदत्राहुः यावत् पदस्य फलतः प्रतियोगिताविशेषणत्वेन साध्यव्यापकतावच्छेदकी-भूतयद्यत् प्रतियोगिताकोऽभावः स्वविशिष्ट हेत्वाधिकरणावच्छेदेन तत्तत्प्रतियोगित्वाश्रयसामानाधिकरण्यं विवक्षितम् (४३) तथाच

---

(५२) ननु व्यभिचारिस्थलान्यत्वाभावस्यायोगोलकत्वस्वरूप-स्य अभावाधिकरणकानात्मकस्य प्रतियोगिसामानाधिकरण्यविर-हान्नोक्तातिव्याप्तिरिति कथं अतिव्याप्तिरुक्ताजगदीशेन ? मैवं गग-नाभावभिन्नं अभावत्वादित्यत्र व्यभिचारिस्थलान्यत्वाभावस्यान्य-भावाधिकरणकगगनाभावस्वरूपतया तत्रातिव्याप्तेरतएवादिपदमपि साधुसङ्गच्छते ।

(५३) अथात्रवह्निमान्धूमादित्यादावव्याप्तिः तथाहि कालिक-सम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावाभावस्य वह्नि-स्वरूपस्य स्वरूपेण साध्यवदवृत्तित्वेन निरुक्तव्यापकतावच्छेदकप्र-तियोगिताकस्य या कालिकेन वह्नेरभावनिष्ठप्रतियोगिता सापि यावद-न्तर्गता तादृशप्रतियोगित्वाश्रयाधिकरणत्वस्य हेत्वधिकरणावच्छे-

धूमादिसामान्याभावस्य धूमनिष्ठतादृशप्रतियोगिताकस्य धूमादि-निष्ठ प्रतियोगित्वाश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन सामाना-धिकरण्यविरहान्नातिव्याप्तिः नचैवं यत्समानाधिकरणाइत्यस्य वैय-र्थ्यमितिवाच्यम् आत्मत्वसामान्याभावीयप्रतियोगिताया अपि सा-ध्यव्यापकतावच्छेदकतया तत्प्रतियोगिताकस्यात्मत्वसामान्याभा-वस्यच तादृशप्रतियोगित्वाश्रयसामानाधिकरण्यविरहादयमात्मा

देनासत्वात् चेन्न, साध्यवद्वृत्तितावच्छेदकत्वेन प्रतियोगितायां विशेषणीयतया उक्तप्रतियोगिताया यावदनन्तर्गतत्वात् अतएवोक्ता-र्थक भावभिन्नदलं प्रतियोगिताया विशेषणं सम्भवतिइतिध्येयम् । ननु साध्यव्यापकतावच्छेदक यत् यत्प्रतियागित्वं हेत्वधिकरणाव-च्छेदन तत्तत् प्रतियोगित्वाश्रयसामानाधिकरण्यस्य यत्किञ्चिदभावे निवेशस्तथा सति यत्सामानाधिकरण्यदलस्य वैयर्थ्यसम्भवेऽपि तद्दलस्य सार्थक्यसम्पादनन्तु यत्समानाधिकरणाभावीय साध्यव्या-पकतावच्छेदक प्रतियोगितात्वव्यापक प्रतियोगिताकालीन हेतुता-वच्छेदकं व्याप्तिरित्यभिप्रेत्य व्यापकत्वन्तु स्वतादात्म्य हेत्वधिकरण-त्वव्यापकस्वाश्रयाधिकरणतावद्वृत्त्यभावीयत्वोभयसम्बन्धेन नच संसर्गताघटकाभावीयत्वमनिवेश्य अभावकालीनत्वनिवेशे यत्समा-नाधिकरण्यदलस्य व्यर्थतास्यादितिवाच्यं एतदस्वरसेनैववस्तुत-स्तु इत्यादिग्रन्थावतारात् । केचित्तु तादृशप्रतियोगितात्वव्यापको-योऽभावस्तत् कालीनहेततावच्छेदकमेव व्याप्तिरितिनिष्कृष्टार्थः । व्यापकत्वन्तु स्वविशिष्टहेत्वधिकरणतात्वव्यापकत्वसम्बन्धेन स्व-विशिष्टहेत्वधिकरणतात्वव्यापकत्वन्तु स्वसामानाधिकरण्य–स्वनि-रूपकाभाववद्वृत्तित्वोभयसम्बन्धेन बोध्यम् एवञ्च यत्समानाधि-करणाइत्यनूक्तौ आत्मत्वाभावीयप्रतियोगित्वस्य निरुक्तोभयसम्ब-न्धेन स्वविशिष्ट हेत्वधिकरणतात्वाव्यापकत्वादव्याप्तिरतस्तदुपात्तः। कपिसंयोगाभाववान् मेयत्वात् इत्यादौ कपिसंयोगाभावनिष्ठप्रति-योगित्वस्य प्रागुक्तोभयसम्बन्धेन हेत्वधिकरणतात्वाव्यापकत्वात् व्याप्तिरतः स्वविशिष्टपदं नच स्वविशिष्टहेत्वधिकरणतात्वादिशि-सम्बन्धविधया स्वनिरूपकाभाववद्वृत्तित्वनिवेशनमनुचितमिति वाच्यं स्वविशिष्टदलसार्थक्यार्थं यथा सन्निवेशेन वैयर्थ्याभावादि-त्याहुस्तच्चिन्त्यम् ।

ज्ञानादित्यादावव्याप्तिवारकत्वात् जलादिवृत्तित्व विशिष्ट इत्यादिग्रन्थस्तु (५४) वस्तुगतिमनुरुध्यैवोक्त स्तेन जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावस्वरूपत्वेऽपि हेत्वधिकरणावच्छेदेन साध्यव्यापकतावच्छेदकीभूत धूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्यविरहादेवातिव्याप्त्यसम्भवेऽपि नासङ्गतिः नच धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेवधूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामान्यनिष्ठप्रतियोगित्वं लाघवान्नतु तद्भिन्नम् प्रतियोगित्वान्तरम् गौरवादित्युक्तविवक्षयाप्यप्रतिकारइतिवाच्यम् स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः सामान्याभावस्थले प्रतियोगिभेदेनैव भिन्नत्वादिति साम्प्रदायिकाः ।

वस्तुतस्तु साध्यव्यापकतावच्छेदकस्वन्यूनवृत्तिधर्मानवच्छिन्न यादृशप्रतियोगितानिरूपकोऽभावः स्वविशिष्ट हेत्वधिकरणावच्छेदेन तादृशप्रतियोगित्वाश्रयसमानाधिकरण इत्येव वक्तव्यम् तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावानतिरेकितया तदीयं प्रमेयसामान्यनिष्ठं प्रतियोगित्वं स्वन्यूनवृत्ति धूमत्वादि धर्मेणावच्छिन्नमतो न तादृशप्रतियोगित्वाश्रयसामानाधिकरण्यमुपादाय तिप्रसङ्गः (५५) इति युक्तमुत्पश्यामः । यत्तु समनियता-

---

(५४) न जलवृत्तित्वविशिष्ट गोत्वाभावाभावस्य जलत्वाभावस्वरूपत्वेऽपि धूमवद्वृत्तित्वविशिष्ट गोत्वाभावाभावस्य धूमाभावस्वरूपतायामविवादाद्गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिताद्वस्थ्यमतोग्रन्थकारः प्रतियोगिताया यावत्त्वविशेषणे तात्पर्य्यं जलादिवृत्तित्वविशिष्टेत्यादिग्रन्थेनाहवस्तुगतिमित्यादिना। धूमवद्वृत्तित्वविशिष्ट गोत्वाभावाभावस्य धूमाभावस्वरूपतायां दूषणान्तरमभिप्रेत्याह वस्तुगतिमनुरुध्यैवेति यथा जलवृत्तित्वविशिष्ट गोत्वाभावाभावो जलत्वाभावस्तथा धूमवद्वृत्तित्वविशिष्टगोत्वाभावाभावो धूमाभाव इति ग्रन्थार्थः नतुधूमाद्यभाव इतितु एवकारव्यावृत्ततया फलकथनं तथाच प्रतियोगितायां यावत्त्वनिवेशान्न तत्राव्याप्तिरिति दीधितिकृतामाशयः ।

(५५) ननु प्रतियोगिसामानाधिकरण्यघटकप्रतियोगितायाः

८

भावस्यैक्यमते धूमवान् वह्नेरित्यादावत्तिव्याप्तिवारणार्थं येन येन सम्बन्धेन साध्यव्यापकता तैः प्रत्येकं प्रतियोगिसामानाधिकरण्यं विवक्षितं तथा च व्यभिचारिमात्र एव यत्राधिकरणे व्यभिचारस्तदन्यत्वस्य स्वात्मकस्वरूपसम्बन्धेनापि साध्यव्यापकत्वात् तदभावस्य च हेत्वधिकरणावच्छेदेन तादृशान्यत्वरूपस्वरूपसम्बन्धेन प्रतियोगिसामानाधिकरण्यस्याभावान्नातिव्याप्तिः अत एव विषयितासम्ब-

---

स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वनिवेशएवोक्तयुक्त्या धूमवान् वह्नेरित्यादावतिव्याप्तिवारणसम्भवे साध्यव्यापकतावच्छेदकप्रतियोगितायां स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वनिवेशनं विफलं चेन्न महानसीयत्त्वेन वह्न्यभावएव महानसीयवह्न्यभावस्तथाच तदभावीयस्वन्यूनवृत्तिधर्म्मानवच्छिन्नं यन्महानसीयवह्नित्वावच्छिन्नप्रतियोगित्वं तदाश्रयसामानाधिकरण्यविरहात् वह्निमान् धूमादित्यत्राव्याप्तेः। स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वस्य स्वन्यूनवृत्तिधर्म्मभिन्नधर्म्मनिष्ठावच्छेदकताकत्वार्थकत्वं धूमाभावीयधूमवद्वृत्तित्वविशिष्ट वाच्यत्वत्वावच्छिन्नप्रतियोगितायाः धारणसम्भवादुक्तातिव्याप्तिस्तादवस्थ्यमतोस्वन्यूनवृत्तिधर्म्मनिष्ठावच्छेदकत्वानिरूपकत्वमेवार्थो वक्तव्यः। नतु तथाप्यतिव्याप्तिः धूमवद्वृत्तित्वविशिष्टवाच्यत्वाभावस्य तादृशयावदन्तर्गतस्य वाच्यत्वनिष्ठायाः प्रतियोगितायाः स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वात् सत्यं, स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वन्तु स्वावच्छेदकावच्छिन्नानधिकरण स्वाश्रयाधिकरणकं यत् तदन्यत्वं विवक्षणीयं तथाच धूमत्वेन प्रमेयाभावीयप्रतियोगित्वाश्रयाधिकरणं यदयोगोलकादि तदेव स्वावच्छिन्नानधिकरण मपिभवति स्वपदेन धूमत्वेन प्रमेयाभावीयप्रतियोगित्वस्यधर्त्तुं शक्यत्वात् तदन्यत्वं केवलधूमाभावप्रतियोगितायामेव तत्प्रतियोगितामादाय नातिव्याप्तिः एव स्वपदेन धूमवद्वृत्तित्वविशिष्ट वाच्यत्वाभावीय प्रतियोगितायाः धर्त्तुं शक्यतया नातिव्याप्तिः वह्निमान् धूमादित्यादौ तु इन्धनत्वेन वह्न्यभावो लक्षणघटकः स्वपदेन घटत्वेन वह्न्यभावप्रतियोगितायाः धर्त्तुंशक्यत्वात् नचतथापि वाच्यत्वत्वेन धूमवद्वृत्तित्वविशिष्टवाच्यत्वाभावादेः धूमाभावानतिरेकितया तस्यनिरुक्त स्वन्यूनवृत्तिधर्म्मानवच्छिन्ना वाच्यत्वत्वावच्छिन्ना या प्रतियोगिता तदाश्रयसामा-

न्धस्य व्यापकताघटकत्वेऽपि नित्यज्ञानं नित्यसविषकत्वादित्यादौ नाप्तिव्याप्तिर्नित्यज्ञानत्वाभावस्य व्यापकताघटकीभूतेन समवायसम्बन्धेन प्रतियोग्यसमानाधिकरणत्वादितिमतं तत्तुच्छं घटत्वादिना वाच्यत्वाद्यभावस्यैव घटत्वादिनायःपिण्डान्यत्वाभावस्वरूपतया तस्य च व्यापकताघटकेनायःपिण्डान्यत्वादिनिरूपितस्वरूपसम्बन्धेन यावद्धेत्वधिकणे प्रतियोगिसामानाधिरण्यविरहादेव धूमवान् वह्नेरित्यादावतिव्याप्तिविरहात् यावन्त इत्यस्य स्वविशिष्ट इत्यस्य यत्समानाधिकरणा इत्यस्य च व्यर्थतापातादिति दिक् । ननु व्यधिकरणधर्मावच्छिन्नाभावासत्वेऽपि सर्वत्र सद्धेतौ गगनवाच्यत्वोभयाभाव गगनत्वादिविशिष्ट वाच्यत्वाद्यभावमादायोक्तलक्षणसमन्वय सम्भवे प्रतियोग्यवृत्तिश्चेत्यादिमूलावतारानुपपत्तिः (५६) नच वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनव्यापकतावच्छेदकीभूत प्रतियोगितायाः विशेषणीयत्वान्नैवमिति वाच्यं व्यभिचारावारकत्वेन ता-

---

नाधिकरण्याद्तिव्याप्तिरितिवाच्यं स्वसमानाधिकरण स्वावच्छेदकीभूतधर्म्मावच्छिन्नवद्वृत्त्यभावीया या प्रतियोगिता तदन्यत्वस्योक्तप्रतियोगितायाः विशेषणीयत्वात् तथाच वाच्यत्वगगणोभयाभावमादाय प्रथमलक्षणे दोषः अतो द्वितीयलक्षणावतारइतिध्येयम् । केचित्तु स्वन्यूनवृत्तिधर्म्मानवच्छिन्नप्रतियोगित्वपदेन प्रतियोगिताविशिष्टप्रतियोगितायाः विवक्षणान्न कोऽपि दोषः वैशिष्ट्यंच स्वतादात्म्यस्वविशिष्टधर्म्मावच्छिन्नत्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताक भेदवत्त्व-स्वकालीनाभाववृत्तित्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्वैतत्त्रितय सम्बन्धेन संसर्गघटकधर्म्मे स्ववैशिष्ट्यन्तु स्वसामानाधिकरण्य-स्वाश्रयवन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकत्वोभयसम्बन्धेन संसर्गघटकवृत्तित्वं च स्वनिरूपकत्व स्वाश्रयवृत्तिस्वावच्छेदकधर्म्मावच्छिन्नवद्वृत्तित्वोभयसम्बन्धेन बोध्यम् इतिप्राहुः इत्यलं अतिविस्तरेण ।

(५६) ननु उभयाभावमादाय कथमव्याप्तिः व्याप्यवृत्तिता निरूपकप्रतियोगितायाः निविष्टत्वात्? चेन्न; स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वनिवेशपक्षे तस्यानिवेशात् इतिध्येयं ।

दशाविशेषणस्य व्यर्थत्वादन्यथा व्यधिकरणधर्मावच्छिन्नाभावका- लीनत्वेन हेतुत्वं विशिष्य ग्रन्थावतारणं कुतो न समर्थयेत् अतो लक्षणान्तरमाह यत्समानाधिकरणानामित्यादि।—

इति व्यधिकरणधर्मावच्छिनाभावीयजगदीश टीकायाः प्रथमलक्षणम् ।

---

* प्रतियोगितायां यावत्त्वनिवेशपक्षे अनुगमस्तु प्रतियोगिताविशिष्टप्रतियोगितात्वविशिष्ट स्वावच्छिन्नसमानाधिकरणाभावीयत्व सम्बन्धेन प्रतियोगिताव्याप्यहेतुत्तावच्छेदकंव्याप्तिः। प्रतियोगितावैशिष्ट्यन्तु स्वतादात्म्य-स्वावच्छेदकसम्बन्धावच्छिन्न साध्यव्यापकतावच्छेदकत्वोभयसम्बन्धेन स्वावच्छेदकसम्बन्धेनस्वाश्रयाधिकरणतावच्छेदकताव्याप्याभावीयत्वसम्बन्धो व्यापकताघटकस्तत्र हेतुतावच्छेदकावच्छिन्नाधिकरणतात्वविशिष्ट स्वसामानाधिकरण्यसम्बन्धेनाभावे व्याप्यत्वमिति तथाचवह्निमान् धूमादित्यत्र संयोगेन घटत्वेन वह्न्यभावीयप्रतियोगितायामुक्तसम्बन्धेन प्रतियोगिताविशिष्टप्रतियोगितात्वविशिष्टस्वावच्छिन्नसमानाधिकरणाभावीयत्वसम्बन्धेन हेतुतावच्छेदकंवर्त्तते। घटत्वेनवह्न्यभावीया या प्रतियोगिता उक्तसम्बन्धेन, स्वावच्छेदकसम्बन्धेन स्वाश्रयाधिकरणतावच्छेदकताव्याप्याभावीयत्वसम्बन्धेन तत्रसत्त्वाल्लक्षणसमन्वयः इतिप्रचूरतरं विभावनीयम्।

अभावे यावत्त्वनिवेशपक्षेतु अभावव्याप्यहेतुतावच्छेदकधर्मवत्त्वमेवार्थः तत्रव्य[illegible]त्वं सम्बन्धविशिष्ट प्रतियोगितानिरूपकत्वविशिष्ट स्वावच्छिन्नसामानाधिकरण्यसम्बन्धेन तत्रसम्बन्धवैशिष्ट्यं स्वावच्छिन्न साध्यसमानाधिकरणाभावीयप्रतियोगितावस्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्व-स्वावच्छिन्नत्वोभयसम्बन्धेन अत्रप्रतियोगितावत्त्वन्तु अवच्छेदकत्वसामानाधिकरण्योभयसम्बन्धेन हेतुतावच्छेदक व्यापकत्वमभावस्य स्वनिरूपितप्रतियोगिताव्याप्यत्व-तादात्म्योभयसम्बन्धेन प्रतियोगिताव्याप्यत्वम् हेतु[illegible]वच्छेदकावच्छिन्नाधिकरणतात्वविशिष्ट स्वसामानाधिकरण्यसम्बन्धेन प्रतियोगितायां अभावव्यापकत्वन्तु स्वावच्छेदक सम्बन्धावच्छिन्न स्वाश्रयाधिकरणत[illegible]वच्छेदकता सम्बन्धेन प्रतियोगितायां स्वविशिष्टधर्मा[illegible]च्छेद्यभि[illegible]त्वं निवेशनीयं

अथद्वितीय लक्षणम् ।

(१) वह्निमान् धूमात्, सत्तावान् द्रव्यत्वादित्यत्राव्याप्तिः साध्यव्यापकप्रतियोगिताकानां जलत्वविशिष्टद्रव्यत्वाभाव गुणत्वविशिष्ट सत्ताद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकीभूत जलत्वविशिष्ट द्रव्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्याभावादतउक्तं व्यापकतावच्छेदकरूपावच्छिन्नेति (२) तथा च जलत्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकतानवच्छेदकत्वाददोषः । यत्तु

अत्रवैशिष्ट्यं स्वसमानाधिकरणभेदप्रतियोगितावच्छदकत्व-सामानाधिकरण्योभयसम्बन्धेन इदं च प्रथमव्याप्यताघटकसम्बन्धान्तर्गतप्रतियोगितायामपिनिवेश्यं विशेषरूपेण सामान्याभावमादायाव्याप्तिवारणप्रयोजनकमनुसन्धेयमिति संक्षेपः ।

इति श्रीमदन्नदाचरणतर्कवागीशप्रणीतप्रभानामकटीप्पन्यां व्यधिकरणधर्मावच्छिन्नाभावीय प्रथमलक्षणम् ।

---

(१) अथ यत्समानाधिकरणा साध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदक रूपावच्छिन्न प्रतियोगिताका यावन्तोऽभावाः प्रतियोगिवृत्तयस्तत्वमित्यस्यैवसम्यक्ते स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यान्तर्भावो व्यर्थ इति चेन्न अभावप्रतियोगिकाभावाधिकरणकाभावस्याधिकरणस्वरूपत्वे गगणाभावभिन्नमभावत्वादित्यादावतिव्याप्तेरिति केचित्तु अधिकरण भेदनाभावस्यभिन्नत्वाद्वह्निमान् धूमादित्यादौ पर्व्वतरूपहेत्वधिकरणं वृत्तियोगघटत्वेन वह्न्यभावः स, न, प्रतियोगिवृत्तिरित्यव्याप्तिभयेनोक्तदलमित्याहुः ।

(२) ननु प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यघटकप्रतियोगितावच्छेदकतायाः पर्य्याप्त्यनिवेशे कथितस्थले प्रतियोगितावच्छेदकत्वाश्रयद्रव्यत्वत्वावच्छिन्नसामानाधिकरण्यान्नाव्याप्तिः किं रूपावच्छिन्नत्वनिवेशनेनात्रकेचित् पर्य्याप्त्यनिवेशेऽपि तद्व्यक्तित्वेन वह्न्यभावं समवायसम्बन्धावच्छिन्नाधेयतासम्बन्धेन ज-

साध्यव्यापक प्रतियोगिकस्य घटत्वेन वह्न्यभावस्य यावद्धेत्वधिकरणे-घटत्वाद्यवच्छिन्न सामानाधिकरण्याभावाद्व्यापकतावच्छेदकरूपा-वच्छिन्नेति (३) तदत्यन्तमसत् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया तस्यापि यावद्धेतुमति स्वप्रतियोगितावच्छेदकीभूत वह्नित्वावच्छिन्नसमानाधिकरणत्वात् ॥

समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वादाह ज्ञेयत्वत्वा-दिनेति । शेषमित्यादि येन सम्बन्धेन हेतुस्तेनसम्बन्धेन हेतुतावच्छे-दकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावेग्राह्यं तेनायमात्माज्ञानाद्घटा-न्यत्वेसत्यात्मघटसंयोगाद्धेत्यादौ आत्मत्वसामान्याभावस्यातथात्वे-ऽपि नाव्याप्तिरेवंयेन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्न प्रतियोगिताकाभावस्य स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रति-योगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं अतो न व्यधिक-रणधर्म्मावच्छिन्नाभावस्यासत्त्वेऽपि व्यधिकरणसम्बन्धावच्छिन्न वाच्यत्वाद्यभावमादाय लक्षणसमन्वयसम्भवात् प्रतियोग्यवृत्तिश्वे-

---

लविशिष्टाभावम्वादायाव्याप्तिसम्भवाद्रुपावच्छिन्नत्वदलमित्याहुस्त-च्चिन्त्यं । नव्यास्तु अयागोलकभेदरूपतद्व्यक्त्यभावस्य तद्व्यक्तिमद्वृ-त्तिवाच्यत्वाभावात्मकत्वात् तद्व्यक्त्यभावस्यापि प्रतियोगितावच्छेद-कीभूतवाच्यत्वत्वावच्छिन्नसामानाधिकरण्यादतिव्याप्ति स्तद्वार-णाय तादृशपर्य्याप्ति निवेशया सुतरां रूपावच्छिन्नत्वनिवेशो युक्तिसह इतिप्राहुः ।

अथैवञ्चेतद्धदवृत्तित्वविशिष्ट वाच्यत्वाभावमादायवाच्यं ज्ञेयत्वा दित्यादौ लक्षणगमनासम्भवादसम्भव सम्भवेऽव्याप्ति दानमनुचितं सत्यं केषाञ्चिन्मते साध्यताघटकसम्बन्धेन साध्यव्यापकत्वं तेनैवप्र-तियोगित्वं प्रतियोगितावच्छदकावच्छिन्नसामानाधिकरण्यञ्च तन्मते महाकालान्यत्वविशिष्टाधिकरणत्वस्य महाकाले स्वीकारे कालो घट-वान् महाकालत्वादित्यत्र लक्षणगमनसम्भवात् सर्व्वमतसिद्धाव्या-प्त्यूक्तिरिति ।

(२) ननु समनियताभावानामैक्यमतेयद्यप्येतल्लक्षणं तदाहेत्व-धिकरणावच्छेदेन प्रतियोगित्वावच्छिन्नसामानाधिकरण्यस्योक्तौ सा-

त्यादिग्रन्थावतारानुपपत्तिर्वाजलत्वादेः समवायेन साध्यतायां महाकालत्वादावतिव्याप्तिः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यञ्च स्वविशिष्टहेत्वधिकरणावच्छेदेन वोध्यं तेन द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावस्यकाले हेतुमति प्रतियोगिसमानाधिकरणत्वेऽपि नातिव्याप्तिः। इदन्त्ववधातव्यं साध्यवन्निष्ठाभाव प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरूपमेव व्यापकतावच्छेदकत्वमत्रलक्षणे प्रवेश्यं नतु प्रतियोगिवैयधिकरण्यघटितं तथासति व्यधिकरणधर्म्मावच्छिन्नाभावासत्वेऽपि सर्व्वंप्रमेयमित्याकारकं जन्यंयत् किञ्चिद्बुद्धिविषयतासामान्याभावमादायैव सर्व्वत्र लक्षणसमन्वय सम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तेः तज्ज्ञानव्यक्तिविषयत्वस्य तादृशज्ञानदशायामेव सत्त्वेनतादृशज्ञानविषयत्वाभावस्य

मज्ञस्ये अवच्छेदकदलं कथमुपात्तं ? नच विषयितया घटस्य साध्यतायां घटत्वेन घटविषयकतज्ज्ञानत्वस्य हेतुतायां विषयित्वसम्बन्धेन घटाभावस्य यावदन्तर्गततया तदीयप्रतियोगित्वावच्छिन्नाधिकरणत्वस्य तज्ज्ञानेऽसत्वादव्याप्तिरितिवाच्यं विषयित्वसम्बन्धेन घटाभावस्य विषयित्वसम्बन्धेन घटाधिकरणत्वाभावात्मकतया प्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्धेनप्रतियोगिसामानाधिकरण्यादव्याप्तिविरहात् नच धूमवान् वह्नेरित्यादौ धूमाभावस्य धूमत्वेन प्रमेयाभावतया तादृशप्रतियोगिसामानाधिकरण्यादतिव्याप्तिरितिवाच्यम्। धूमाभावस्य धूमीयसंयोगेन प्रमेयाभावतया प्रकृतपक्षेप्यतिव्याप्तिवारणाय यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्य—जगद्वृत्तिभिन्नत्वोभयाभावस्तादृशप्रतियोगिता विशेषणीया तथात्रपक्षेप्यवच्छेदकमपहाय तादृशोभयाभावानवेशे धूमत्वेन प्रमेयाभावीयप्रतियोगितायाः लक्षणाघटकत्वादतिव्याप्त्यसम्भवात् । नापिवह्नित्वेन तद्व्यक्त्यभावमादाय तादृशव्याप्यवृत्तितानिरूपकतद्व्यक्तित्वावच्छिन्न प्रतियोगित्वाश्रयसामानाधिकरण्यस्य हेत्वधिकरणावच्छेदनासत्त्वात् अव्याप्तिः कथितरूपावच्छिन्नप्रतियोगिताया मपि तादृशोभयाभावघटितत्वस्य विवक्षणीयत्वात् मैवं प्रतियोगिताविशिष्ट प्रतियोगितात्वावच्छिन्न प्रतियोगिताकभेदाविशिष्ट भेदकालीन हेतुतावच्छेदकं व्याप्तिरित्येवं निष्कृष्टार्थः । अत्र प्रतियोगिता-

हेतुसमानाधिकरणत्वात् एवञ्चात्र स्वविशिष्टपदं न कपिसंयोगाभावाद्यात्मकं गगणत्वादिविशिष्टस्यवा गगणाद्यभावस्याभाव मुपादाय कपिसंयोगाभाववान् प्रमेयत्वादित्यादा वव्याप्तिवारकं कपिसंयोगाभावत्वादं रुक्तव्यापकतावच्छेदकत्वाभावात् (४) किन्तु हेतुमतिकाले वर्त्तमानस्य सत्त्वासामान्याभावस्यापि निरुक्तरूपशालित्वात्तस्य चात्मादावसत्त्वेन यावद्धेत्वाधिकरणे प्रतियोगितावच्छेदकावच्छिन्न सामानाधिकरण्यविरहात् सत्त्वावान्द्रव्यत्वादित्यादावव्याप्तिवार-

---

वैशिष्ट्यन्तु स्वतादात्म्य-स्वसमानाधिकरण स्वावच्छेदकावच्छिन्नाधिकरणवृत्त्यभावीयत्वोभयसम्बन्धेन भेदवैशिष्ट्यञ्च स्वतादात्म्य-हेत्वाधिकरणवृत्तिस्वाश्रयसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायानिरूपकाभावकूटवत्वसम्बन्धेन कूटवत्तन्तु स्वनिरूपितत्व-स्वविशिष्ट हेत्वधिकरणत्व व्यापकाधिकरणता निरूपित निरूपकतावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन स्वविशिष्ट प्रतियोगिता वृत्तित्व सम्बन्धेनकथित सम्बन्धान्तर्गत लक्षणोक्तावच्छेदकत्वार्थकावच्छेदत्वानुपादाने धूमाद्यभावस्य धूमत्वेनप्रमेयाद्यभावात्मकत्वादुक्तातिव्याप्तेर्वज्रलेपत्वात् भेदवैशिष्ट्यञ्च समानकालीनत्वसम्बन्धेनेति सङ्क्षेपः । ननु समनियताभावानामैक्यमते लक्षणञ्चेत् द्रव्यान्यासमवेतत्वेन ह्रदान्यासमवेताभावस्य ह्रदवृत्तित्वविशिष्ट द्रव्यत्वाद्यभावरूपतया निरुक्तप्रतियोगितावच्छेदकावच्छिन्न सामानाधिकरण्यात् तादृशाभावमादायापि वह्निमान् धूमादित्यादौ नाव्याप्तिः किं तादृशरूपावच्छिन्नत्वदलेन चेन्न यादृश प्रतियोगिताकाभावे यादृश प्रतियोगितावच्छेदकावच्छिन्न सामानाधिकरण्य जगद्वृत्तिभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया लक्षणघटकत्वाद्द्रव्यान्यासमवेतत्वावच्छिन्नप्रतियोगिताया लक्षणाघटकतयाव्याप्ति निराशासम्भवात् ।

(४) ननु स्वरूपेण साध्यवद्वृत्तित्वस्योक्तव्यापकताघटकत्वात्कथं ग्रन्थसङ्गतिश्चेन्न स्वप्रतियोगिमत्वाबुद्धेर्विराधिताघटकसम्बन्धेनोक्तलक्षणे व्यापकताघटकसाध्यत्वद्वृत्तित्वस्य निवेशात् संयोगाभावत्वे निरुक्तव्यापकतावच्छेदकत्वाभावात् भावाभिन्नञ्चात्र पृथक् न निवेशनीय इतिध्येयं ।

कमेव स्वविशिष्टपदं । नच साध्यतावच्छेदकसम्बन्धेन साध्यताव-च्छेदकधर्म्मावच्छिन्न प्रतियोगिताकाभावो यद्धेत्वधिकरणावच्छेदेन स्वावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न समानाधिकरणस्तत्त्वमित्येव सम्यग्वाच्यत्ववत्वादिना घटाद्यभावमादायैव वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयादितिवाच्यं स्वरूपसम्बन्धेन प्रमेयत्वावच्छिन्नाभावाप्रसिद्ध्या प्रमेयवान् ज्ञेयत्वादित्यादावव्याप्तेः गुरुधर्म्मावच्छिन्न प्रतियोगित्वाप्रसिद्ध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तेर्वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकतया गोमांश्चैत्रत्वादित्यादौ स्वामित्वादिसम्बन्धेन गवादेः साध्यताया मव्याप्तेश्चेतिदिक् । ननुवह्नित्वेन धूमवद्वृत्तिसामान्याभावो धूमीयसंयोगसम्बन्धेन द्रव्यसामान्याभावो वा धूमाभावएव तथायोगौलकभेदतदभावान्यतरत्वेनायोगोलकान्यवृत्तेरभावोऽयोगोलेकान्यत्वनिरूपित स्वरूपसम्बन्धेन भेदसामान्याभावोवायोगोलकान्यत्वाभावएव समनियताभावानामैक्यात्तथा च धूमाद्यभावस्य प्रतियोगितावच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्नेन समं यावद्धेत्वधिकरणे धूमाद्यभावस्य प्रतियोगिसमानाधिकरणत्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः सामान्यधर्म्मेण विशेषाभावाभ्युपगमेतु सुतरां तथा धूमत्वेनधूमाद्यभावानामेव प्रमेयत्वादिना धूमाभावतया तस्यच प्रतियोगितावच्छेदकीभूत प्रमेयत्वाद्यवच्छिन्नसमानाधिकरणत्वादिति चेदत्रापि यावत्वस्य फलतःप्रतियोगित्वविशेषणतया साध्यव्यापकतावच्छेदकरूपावच्छिन्न यद्यत् प्रतियोगिताको यत् समानाधिकरणोऽभावःस्वविशिष्टहेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणस्तत्त्वं पर्य्यवसितार्थस्तथाच धूमादिनिष्ठ तादृशधूमत्वाद्यवच्छिन्न प्रतियोगिताकाभावस्य धूमादिनिष्ठं यत् प्रतियोगित्वं तदवच्छेदकीभूत धूमत्वाद्यवच्छिन्नेन समं हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिप्रसङ्गइति सम्प्रदायः। वस्तुतोऽत्रापि साध्यव्यापकतावच्छेदकरूपावच्छिन्नायाः स्वन्यूनवृत्तिधर्म्मानवच्छिन्नयादृशप्रतियो-

गितायां निरूपकोऽभावः स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृश-प्रतियोगितायाः यदवच्छेदकं तदवच्छिन्न सामानाधिकरण्यं वक्तव्यं (५) धूमत्वादिना धूमाद्यभावस्तु न प्रमेयत्वादिना धूमाद्यभावः सामान्यधर्म्मेण विशेषाभावानभ्युपगमात् तदभ्युपगमेतु यादृशप्रतियोगिताकाभावे तादृशप्रतियोगितावच्छेदकावच्छिन्नवद्वृत्तित्वस्य जगद्वृत्तिभिन्नत्वस्यच द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावानां तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्य (६) मतोन कश्चिद्दोष इति ध्येयं ॥

इति व्यधिकरणधर्म्मावच्छिन्नाभावीयजगदीश टीकाया द्वितीयलक्षणं ।

---

(५) स्वन्यूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेसति स्वसामानाधिकरण्यरूपं तत्तुसंसर्गसाधारणं धर्म्मपदन्तु-स्वरूपकीर्त्तनं तथाच स्वन्यूनवृत्तिधर्म्मभिन्ननिष्ठावच्छेदकताकत्वस्य प्रतियोगिताद्वये निवेशो तद्वह्निमद्वृत्तिवाच्यत्वप्रतियोगिकस्वरूपसम्बन्धेन वाच्यत्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिः एवं धूमप्रतियोगिकसंयोगेन प्रमेयाभावीयप्रतियोगितामादायातिव्याप्तिरतः स्वन्यूनवृत्तिधर्म्मनिष्ठावच्छेदकत्वानिरूपकत्वार्थकस्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वं प्रतियोगिताद्वये निवेशनीयमितिध्येयं ।

(६) अथात्र प्रमेयत्वेन गगणाभावस्य जगद्वृत्तित्वेनोक्तोभयाभावसत्वासदभावमादाय सर्व्वत्र लक्षणसमन्वयसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तिरिति न देश्यं यादृशप्रतियोतिताकाभावे इत्यादि तादृशप्रतियोगिताकाभावानामित्यन्तग्रन्थस्य जगद्वृत्तित्वघटिततयाऽसर्वज्ञस्य दुर्ज्ञेयत्वापत्तिवारणाय यादृशप्रतियोगितायां स्वावच्छेदकावच्छिन्नसमानाधिकरणाभावीयत्वस्य स्वसमानाधिकरणधर्म्मावच्छिन्नत्वस्य द्वयोर्व्यतिरेकस्तादृशप्रतियोगिताकाभावनिष्ठत्वार्थकतया तदभावस्य लक्षणाघटकत्वात् इति। नन्वत्र स्वावच्छेदकावच्छिन्नवद्वृत्तित्वदले स्वावच्छेदकताया पर्य्याप्त्यनिवेशे जलत्वविशिष्टद्रव्यत्वाद्यभावस्य लक्षणाघटकत्वेन तमादायाव्याप्तिवा-

चक्रवर्त्तिलक्षणान्याह केचित्त्विति अनवच्छेदकमिति यत्साध्यतावच्छेदकमिति परेणान्वितं घटत्वादिना वह्न्याद्यभावमादाय वह्निमान् धूमादित्यादौ लक्षणसङ्गति र्व्यभिचारिणितु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः कपिसंयोगी तत्त्वादित्यादावव्याप्तिवारणार्थे व्याप्यवृत्तेरिति वह्नित्वादिना घटादेरभावमादायाव्याप्तिरतः साध्येति (१) अत्रच प्रतियोगिता साध्यतावच्छेदकसम्बन्धेन ग्राह्या-

रणाय व्यापकतावच्छेदकरूपपर्य्याप्तावच्छेदकताकत्वप्रवेशोऽव्यर्थः धूमवद्वृत्तित्वविशिष्टगगणाभावत्वावच्छिन्नाया धूमाभावप्रतियोगिताया लक्षणाघटकत्वेन तामादायातिव्याप्तिवारकः प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र पर्य्याप्तिनिवेशश्च व्यर्थोऽयोगोलकान्यत्वाद्यभावस्य प्रतियोगितावच्छेदकभेदत्वावच्छिन्नसामानाधिकरण्यादयोगोलकभेदत्वावच्छिन्नप्रतियोगिताया लक्षणाघटकत्वेऽपिचायोगोलकभेदरूपतद्व्यक्तित्वावच्छिन्नप्रतियोगिताया लक्षणघटकत्वसम्भवादतिव्याप्त्यनवकाशादिति मैवं समनियतनानाधर्म्मावच्छिन्नप्रतियोगितानामैक्यमते अयोगोलकभेदरूपतद्व्यक्तित्वावच्छिन्नप्रतियोगिनैव तद्व्यक्तिवृत्तित्वविशिष्टगगणाभावावच्छिन्ना तत्प्रतियोगितावच्छेदकत्वाश्रयगगणाभावावच्छिन्नसामानाधिकरण्यसत्त्वेन कथितोभयाभावासत्त्वात् तद्व्यक्त्याद्यभावस्य लक्षणाघटकतया व्यभिचारिण्यतिव्याप्तेः स्वावच्छेदकतापर्य्याप्तिनिवेशस्यावश्यकत्वात् तथासति अन्यत्रापि पर्य्याप्तिर्निवेशनीया इतिध्येयं केचित्तु पर्य्याप्त्यनिवेशेऽपि तद्व्यक्तित्वेन वह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिरतस्तादृशरूपावच्छिन्नत्वदलमतएव इदवृत्तित्वविशिष्टद्रव्यत्वाद्यभावेत्यत्रादिपदमुपात्तमित्याहुः।

इतिश्रीमदन्नदाचरणतर्कवागीशप्रणितप्रभानामकटिप्पन्यांव्यधिकरणधर्म्मावच्छिन्नाभावीयद्वितीयलक्षणं।

---

(१) नचैतादृशरीत्याऽसम्भवसम्भवेऽव्याप्तिदान मनुचितमिति वाच्यं कालिकेन प्रमेयस्य साध्यतायां महाकालत्वहेतौ कालिकेन गगणादेर्वृत्तिमत्त्वनये हेतुमति प्रमेयत्वरूपेण कस्याप्यभावस्यास-

तेन समवायादिसम्बन्धेन वह्न्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वादेर्नासम्भवः प्रतियोगिवैयधिकरण्य प्रवेशो वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरतस्तत् परित्यागः (२) व्याप्यवृत्तित्वन्तु हेत्वधिकरणे निरवच्छिन्नवृत्तित्वं हेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तित्वं तत्त्वम्वा (३) एवञ्चैतल्लाभार्थमेव हेतुसमानाधिकरणस्येत्युक्तं नतु स्वातन्त्र्येण तद्विशेषणं वैयर्थ्याद्यत्किञ्चित्वनिवेशाच्च संयोगाभावत्वस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि

त्वात् घटत्वेन पटाद्यभावमादाय लक्षणगमनसम्भवात्। अत्र लक्षणे स्वसमानाधिकरण स्वावच्छेदकावच्छिन्नवद्वृत्त्यभावीयत्वाभाववत्त्वं प्रतियोगितायां विशेषणीयं तेनांशिकव्यधिकरणधर्म्मावच्छिन्नाभावमादाय न दोषइति ध्येयम्।

(२) ननु यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानवच्छेदकोक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिवारणसम्भवे किं व्याप्यवृत्तित्वनिवेशेन सत्यमुक्तरीत्यवलम्बने वह्नित्वेन घटाभावादेर्लक्षणाघटकतया साध्याभावपदवैयर्थ्यं स्यात् नच स्वाश्रयवृत्ति स्वावच्छेदकावच्छिन्नाधिकरणिका यावत्यः प्रतियोगितास्तदन्यसाध्यनिष्ठप्रतियोगित्वस्य प्रतियोगितान्तार्थकत्वे न साध्याभाववैयर्थ्यमिति वाच्यं निरुक्तव्याप्यवृत्तित्वापेक्षया गौरवेन तत्परित्यक्तत्वात्। (३) गगणाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यतायां आत्मत्वहेतावव्याप्तिः गगणाभावात्मक साध्यसामान्याभावस्यापि हेत्वधिकरणे निरवच्छिन्नवृत्तित्वादनुयोगिताघटितकल्पान्तरम्। ननु द्वितीयकल्पे यदभावव्यक्तित्वमित्यत्र किं व्यक्तिपदेन अत्र वदन्ति गुणकर्म्मान्यत्वविशिष्टसत्त्वावान् जातेरित्यादौ साध्याभावाभावस्य सत्त्वास्वरूपतया साध्यसामान्याभावस्य निरुक्तव्याप्यवृतित्वविरहेणातिव्याप्तिरतः व्यक्तिपदं तथाच साध्याभाववृत्तितद्व्यक्तित्वावच्छिन्नाभावस्य सत्त्वातिरिक्ततया यत्किञ्चिद्धेत्वधिकरणेऽसत्त्वादुक्ताभावस्य लक्षणाघटक-

संयोगिसत्त्वादित्यादौ नातिव्याप्तिः (४) ननु समनियताभावानामैक्यमते घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया हेतुसमानाधिकरणस्य तादृशस्यैव साध्याभावस्य प्रतियोगितावच्छेदकं वह्नित्वादिकमित्यव्याप्तिरतः समनियताभावैक्यमतेऽपि निरुक्तिमाह हेतुसमानाधिकरणस्येति (५) व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्नि–धूमोभयाभावस्य प्रतियोगिताया समानाधिकरणं सदेव वह्नित्वमवच्छेदकमित्यव्याप्तिस्तादृशप्रतियोगितायाः अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वोक्तावपि तथा, पर्व्वते वह्नित्वेन तार्णातार्णोभयं नास्तीति प्रतीतिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य नच तादृशाभावप्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रपर्य्याप्तं किन्तु तार्णातार्णोभयत्वेऽपि अन्यथा तादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवति पर्व्वतादौ तादृशाभावासत्त्वप्रसङ्गादिति वाच्यं सोन्दड़मते प्रतियोगितावच्छेदकधर्म्मावच्छिन्नवत्त्वामात्रस्याभावाविरोधित्वात् अन्यथा घटवति घटत्वेन पटाभावस्यापलापापत्तेः किन्तु प्रतीतिवलाद्व्यधिकरणधर्म्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्म्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नेनैव सार्द्धमनायत्याऽभावस्य विरोधित्वं वाच्यं (६) एवञ्च वह्नित्वादिना तार्णातार्णोभयाभावसत्त्वेऽपि वह्निवावच्छिन्नत्वादतिव्याप्तेरनवकाश इति।

---

(४) हेत्वंशेयत्किञ्चित्वनिवेशे धूमवान् वह्नेरित्यत्र नातिव्याप्तिरतः संयोगिसत्त्वादित्यप्रसिद्धस्थलानुधावनं।

(५) ननु समनियताभावानामैक्यमते प्रतियोगितायाः साध्यनिष्ठत्वविशेषणादेव नासम्भवः कथं लक्षणान्तरप्रदर्शनमिति चेन्न वह्नित्व-धूमत्वान्यतरवतः साध्यत्वे धूमादिहेतौ वह्नित्वेन धूमाद्यभावादिकमादायाव्याप्तिरतस्तत्परित्यागः।

(६) ननु वह्नित्वेन वह्निधूमोभयाभावस्य केवलान्वयितया तस्य विरोधित्वं न कल्प्यं किन्तु कथितप्रतिवध्यप्रतिवन्धकभावकल्पने

न्नवत्त्वं न क्षतिकरं अतएवच द्रव्यत्वेन वह्निर्नास्तीत्यादिप्रतीत्या सामान्यधर्म्मेणापि विशेषाभावोऽभ्युपेयते नच तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते द्रव्यत्वस्यतु वैशिष्ट्यमात्रं विषय इति वाच्यं वह्निमानयमित्येवं निश्चयसत्वेऽपि द्रव्यत्वेन वह्निर्नास्तीतिप्रत्ययात् द्रव्यत्वस्यैवावच्छेदकतया भानात् अन्यथा वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वप्रकारेण वह्न्यभावबुद्धौ वह्नित्वेन वह्निमत्त्वनिश्चयस्य प्रतिबन्धकत्वात्तादृशप्रतीत्यसम्भवापत्तेः अस्माकन्तु द्रव्यत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति द्रव्यत्वेन वह्नित्वविशिष्टनिश्चयस्यैव विरोधित्वात्तदसत्वादेव तादृशाभावस्य प्रतीतिसम्भवादित्यतोलक्षणान्तरमाह प्रतियोगिव्यधिकरस्यवेति केचित्तु सामानाधिकरण्यसभेदस्तुथाच हेतुसमानाधिकरणाभावीय स्वाभिन्न प्रतियोगितावच्छेदकं यद्यत् स्वं तदन्यत्वं

उक्ताभावस्य प्रतिबन्धकत्वकल्पनसम्भवात् कथं न केवलान्वयित्वव्याघातः चेन्न प्रतियोगिता-विशिष्ट प्रकारताविशिष्ट निरूपकतानिरूपिताधिकरणतया विरोधित्वमित्यर्थः । प्रतियोगितावैशिष्ट्यन्तु स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्ति तादात्म्यसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नत्व--स्वनिष्ठसंसर्गताकनिरूपकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वोभयसम्बन्धेन उक्तोभयघटकवृत्तित्वं स्वावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन प्रकारतावैशिष्ट्यन्तु स्वनिरूपितप्रकारतावच्छेदकताघटकसम्बन्ध--स्वावच्छेदकताघटकसम्बन्धान्यतरावच्छिन्न—स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसम्बन्धेन वृत्तित्वन्तु स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाच वह्नित्वेन वह्निधूमोभयाभावीया या प्रतियोगिता तद्विशिष्टातु वह्निवह्निधूमोभयवत्वात् एतज्ज्ञानीय तादात्म्यसम्बन्धावच्छिन्न वह्नित्वावच्छिन्न प्रकारतानिरूपितविशेष्यत्वावच्छेद्य वह्निधूमोभयत्वावच्छिन्नप्रकारता तादृशसम्बन्धावच्छिन्नतदवच्छेदकतात्वावच्छिन्न

साध्यतावच्छेदके (७) विवक्षितं प्रतियोगित्वं हि स्वरूपसम्बन्धविशेषः सच सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूपएव नतु प्रतियोगिस्वरुपोऽननुगमादाधाराधेयभावानुपपत्तेश्च सामान्यधर्म्मेण विशेषाभावस्थलेच प्रतियोग्यंशेप्रकारीभूतोविशेषधर्म्मएव नतु सामान्यधर्म्मैः अतिप्रसक्तत्वात् ।

व्यधिकरणधर्म्मावच्छिन्नाभावस्थलेच (८) प्रतियोगितावच्छेदकस्वरूपं न प्रतियोगित्वं किन्तु अतिरिक्तं अन्यथा प्रतियोगिता-

---

प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकरूपन्तु विलक्षणधीविशेषविषयत्वमेव तद्वृत्तिनिरूपकत्वास्वीकारात् विरोधित्वकल्पनासम्भवेन केवलान्वयित्वात् । तेन रूपत्वेन नित्यसमवेताभाव-रूपवृत्तिसत्त्वया स्पर्शवृत्तिसत्तावदभावस्थले न कोऽपि दोषइति विभावनीयम् । केचित्तु केवलान्वयितानवच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकत्वमुक्तप्रतियोगितावच्छेदके निवेश्यमिति न दोषः इत्याहुः ।

(७) ननु तादृशप्रतियोगिताभिन्नत्वं साध्यतावच्छेदके विवक्षणएव सम्यक्ते अभिन्नावच्छेदकत्वादिदलस्य वैयर्थ्यं चेन्न घटत्वेन वह्न्यभावीयप्रतियोगितावतः साध्यत्वे घटत्वेन वह्न्यभावमादायाव्याप्तिसम्भवात् उक्तलक्षणस्य स्वतादात्म्य-स्वावच्छेदकत्वोभय सम्बन्धेन प्रतियोगित्वाभाववत् साध्यतावच्छेदकमित्यर्थः तेन न व्यधिकरणधर्म्मावच्छिन्नाभावम्बिनालक्षणसमन्वयसम्भवे प्रतियोग्यवृत्तिश्चेत्यादि ग्रन्थानुत्थितिप्रसङ्गः नवा गगणादेर्वृत्तिमत्त्वमते कालो घटवान् महाकालत्वादित्यादावव्याप्तिरिति । सामान्यधर्म्मेण विशेषाभावस्वीकारे वह्नित्वेन महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणायात्रापि स्वसमानाधिकरणत्वे सति तद्भिन्नतिरिक्तम् यत् तदन्यत्वं साध्यतावच्छेदके वक्तव्यमत्र स्वपदं तादृश प्रतियोगितापरमिति ध्येयम् ।

(८) व्यधिकरणधर्म्मावच्छिन्नाभावत्वं हि प्रतियोगितावशिष्टान्यावच्छेदकताकप्रतियोगिताकाभावत्वं वैशिष्ट्यञ्च स्वाश्रयनिष्ठाधिकरणतानिरूपिताधेयतावत्त्वसम्बन्धेन आधेयतावत्त्वन्तु स्वसामानाधिकरण्य--स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धावच्छिन्नत्व वृत्ति

वच्छेदकविशिष्टप्रतियोगिनैव सार्द्धमभावस्य विरोधित्वात्तदवच्छिन्नवति तादृशाभावस्यासत्त्वप्रसङ्गात् विवादोऽपि अतिरिक्तायां प्रतियोगितायामेव अन्यथा समनियताभावैक्यमते निखिलव्यधिकरणधर्म्मावच्छिन्नाभावस्यैव गगणाभावात्मकतया गगणाभावस्वीकर्तॄणां तदनङ्गीकारानुपपत्तेः इत्थञ्च वह्नित्वेन पर्व्वते तार्णातार्णवह्नी न स्त इति प्रतीतिवलात्तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेऽपि तादृशप्रतियोगित्वं न वह्नित्वाभिन्नं किन्तु तादृशोभयत्वाभिन्नं अतिरिक्तम्वेति स्वाभिन्नायाः साधनवन्निष्ठाभावप्रतियोगिताया यदवच्छेदकं तदन्यत्वस्य वह्नित्वे सत्त्वान्न तस्य धूमव्यापकतावच्छेदकत्वहानिः नन्वत्र लक्षणे हेत्वधिकरणवृत्तित्वमभावस्य न सम्वन्धमात्रेण वाच्यं वह्निसामान्याभावस्यापि कालिकादिसम्वन्धेन धूमवति सत्त्वादव्याप्त्यापत्तेः (९) नापि दैशिकविशेषणतया घटभिन्नं द्रव्यत्वादित्यत्रातिव्याप्तेः (१०) घटत्वरूपस्य साध्याभावस्य

त्वैतच्चतुष्टयसम्वन्धेन अथवा अतिरिक्तप्रतियोगिताकाभावत्वमेव तत् इति विभावनीयम्।

(९) नन्वत्र लक्षणे वह्न्यभावस्य निरुक्तव्याप्यवृत्तित्वविरहात् कथं तदभावमादायाव्याप्तिः सङ्गता मैवं तत्रादिपदसत्त्वात् विषयितया वह्निसाध्यके वह्नित्वेन वह्निविषयकज्ञानहेतुके तथाप्यव्याप्तेरनुद्धारात् तथाहि विषयित्वसम्वन्धावच्छिन्नवह्न्यभावाभावत्वावच्छिन्नस्य विषयित्वसम्वन्धेनाधिकरणत्वस्य वह्नित्वेन वह्निविषयकज्ञाने विरहात् विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितानवच्छेदकं यदभावव्यक्तित्वमिति निवेशस्यावश्यकतया उक्ताभावस्य हेतुसामानाधिकरण्येऽपि न व्याप्यवृत्तित्वहानिरिति चिन्त्यम्।

(१०) अत्र स्वप्रतियोगिमत्त्वाबुद्धेर्विरोधिताघटकसम्वन्धेन वृत्तित्वमभावे वाच्यं ततोनातिव्याप्तिः किं लक्षणान्तरानुसरणेन न च संयोगसामान्याभाववान् सत्त्वादित्यत्रातिव्याप्तिः संयोगात्मकसाध्याभावस्य निरवच्छिन्नसमवायेन वृत्तित्वाप्रसिद्ध्या लक्षणाघट-

विशेषणतया मूर्त्तत्वविरहादित्यतो लक्षणान्तरमाह प्रतियोगिव्य-धिकरणस्यवेति प्राहुः। प्रागुक्तव्याप्यवृत्तित्वं यत्किञ्चित्स्वघटितत्वेन दुर्व्वचमतः प्रतियोगिव्यधिकरणस्यवेत्यादिलक्षणान्तरमुक्तमित्य-प्याहुः। हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदक-मितियोजना अथात्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमा-नाधिकरणभिन्नत्वं समनियताभावानामभिन्नतया घटत्वेन घटाभा-वादेरपि घटत्वेन प्रमेयसामान्याभावस्वरूपतया तस्यच प्रमेयात्म-कप्रतियोगिसमानाधिकरणतया तदन्यत्वासम्भवात् अतएव स्वप्र-तियोगितावच्छेदकावच्छिन्नसमानाधिकरणो यस्तदन्यत्वमपि न तथा घटत्वेन घटाभावादेरेव प्रमेयत्वादिना घटाभावात्मकत्वादप्र-सिद्ध्यापत्तेः व्यधिकरणधर्म्मावच्छिन्नाभावस्यापि ततएव वारण-सम्भवे सामानाधिकरण्येनेत्यस्य वैयर्थ्यापाताच्च नच साध्यताव-च्छेदकसम्बन्धेन यादृशप्रतियोगित्वाश्रयानधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितान्तार्थः तथाच वह्नित्वेन घटाभावीयं घटनिष्ठप्रतियोगित्वमपि तादृशमतस्तदवच्छेदकत्वं वह्नित्वेऽप्य-स्तीत्यतः सामानाधिकरण्यपदं तेन तादृशप्रतियोगितायाः समाना-धिकरणावच्छेदकाप्रसिद्ध्या तद्भिन्नप्रतियोगितैव लक्षणघटकेति वाच्यं विशिष्टसत्त्वावान् जातेरित्यादावतिव्याप्तेर्गुणादीनां विशिष्ट-सत्त्वानिष्ठप्रतियोगित्वाश्रयाधिकरणत्वाद्घटवान् महाकालत्वादि-त्यादावव्याप्तिप्रसङ्गाच्च हेतुमतो महाकालस्य साध्यताघटककालिक-सम्बन्धेन घटाद्यभावप्रतियोगित्वाश्रयाधिकरणतया प्रतियोगिव्य-धिकरणाभावाप्रसिद्धेरितिचेदत्राहुः। साध्यतावच्छेदकसम्बन्धेन

कत्वादिति वाच्यम् तथासति तादृशसम्बन्ध-समवायान्यतरसम्ब-न्धेन विवक्षायां निर्द्दोषत्वात् चेन्न घटभिन्नं कपालत्वादित्यादा घटा-त्मकसाध्याभावस्य समवायेन हेत्वधिकरण वृत्तित्वादव्याप्तेर्लक्षणान्त रस्यावश्यकत्वात्।

स्वाश्रयवृत्तिस्वावच्छेदकधर्म्मावच्छिन्नाधिकरणयावद्धेत्वधिकरणि
का यावत्यः प्रतियोगितास्तदन्यप्रतियोगित्वं प्रतियोगितान्तार्थः(११)
तथाच वह्नित्वेन घटाभावस्यापि घटादिनिष्ठप्रतियोगिता तादृशीति
तदवच्छेदकत्वं वह्नित्वेऽप्यस्तीत्यतः सामानाधिकरण्यपदं घटवान्
महाकालत्वादित्यादौतु गगणाभावीयं गगणनिष्ठमेव तादृशप्रतियो-
गित्वं सुलभमिति न कोपि दोषः । वस्तुतो धूमवति वह्नित्वेन घटो-
नास्तीतिवद्धूमवान् न वह्नित्वेन घटवान् किन्तु घटत्वेनेति प्रतीति-
बलाद्व्यधिकरणधर्म्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्या
भावोप्यस्ति अतएव समवायितया वाच्यत्ववद्भेदो घटादौ पक्षधर-
मिश्रैः स्वीकृतः तथाच यादृशप्रतियोगितावच्छेदकावच्छिन्नीय-
त्वेन साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगित्वाश्रयाधिकर-
णान्यत्वं (१२) हेतुमतस्तादृशप्रतियोगितासमानाधिकरणवृत्ति-
त्वावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकत्वाभाववत्त्वं
तादृशप्रतियोगितासमानाधिकरणत्वावच्छिन्नप्रतियोगिताकतादृश

---

(११) गगणादेर्वृत्तिमत्त्वमते महाकालान्यत्वविशिष्टघटस्य म-
हाकाले वृत्तित्वमतेच कालो घटवान् महाकालत्वादित्यादावव्याप्ति-
वारणाय स्वाश्रयवृत्तित्वदलं तथाच पटत्वेन घटस्य महाकालेऽस-
त्वात् तदभावोलक्षणघटकः नन्वत्र व्यधिकरणधर्म्मावच्छिन्नाभाव-
स्यैव लक्षणघटकत्वे तादृशप्रतियोगितायाः सामानाधिकरण्येनाव-
च्छेदकत्वाप्रसिद्ध्याऽव्याप्तिश्चेन्न स्वसामानाधिकरण्य-स्वावच्छेद-
कत्वोभयसम्बन्धेन प्रतियोगित्वाभाववत् साध्यतावच्छेदकमित्यर्थ-
कत्वात् वस्तुतस्तु स्वाश्रयवृत्तित्वदलं लाघवतः प्रत्युदाहृतमन्यथा
व्यधिकरणधर्म्मावच्छिन्नाभावीयप्रतियोगिताभेदस्यापि भेदकूटा-
न्तर्गततया भेदकूटाधिक्याद्गौरवमिति ध्येयम् ।

(१२) ननु यादृशप्रतियोगित्वाश्रयाधिकरणत्वाभावस्य हेत्व-
धिकरणे उक्तरीत्या निवेशे अव्याप्यवृत्तिसाध्यकेऽव्याप्तिरव्याप्यवृ-
त्त्यधिकरणत्वात्यन्ताभावस्यापि अव्याप्यवृत्तित्वादतस्तादृशाधिक-
रणान्यत्वं हेत्वधिकरणे निविष्टं । ननु यादृशप्रतियोगितावच्छेद-
केन यादृशप्रतियोगिमदन्यत्वं हेतुमतस्तादृशप्रतियोगितैव प्रतियो-

प्रतियोगितावच्छेदकान्यत्वम्वा (१३) साध्यतावच्छेदके विवक्षितं तथाच घटादिनिष्ठस्य वह्नित्वेन घटाद्यभावप्रतियोगित्वस्यापि तादृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वादव्याप्तिरतः सामानाधिकरण्येनेत्युक्तं तथाच वह्नित्वस्य तादृशप्रतियोगितावच्छेदकत्वेऽपि तादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्म्मेण तादृशप्रतियोगितावच्छेदकत्वाभावस्य तत्रसत्त्वान्नाव्याप्तिः कालोघटवान् महाकालत्वादित्यादौतु घटादिसामान्याभावप्रतियोगितायाअतथात्वेऽपि घटत्वेन पटाद्यभावमादायैव लक्षणसङ्गतिः कालः पटत्वेन पटवान् नतु घटत्वेनेत्यनुभवात्। वह्नित्वादिसामान्यधर्म्मेण

गितान्तार्थोवाच्यः किं गुरुतरनिवेशेन चेन्न इमे वह्नयस्त्वादित्यादावव्याप्तेर्बहुत्वत्वेन बहुत्वस्य कुत्राप्यसत्त्वात् साध्याभावस्यापि लक्षणघटकत्वात्।

(१३) ननु यादृशप्रतियोगितावच्छेदकावच्छिन्नीयत्वेन यद्धर्म्मावच्छिन्नाधिकरणतावदन्यत्वं हेतुमतस्तद्धर्म्मवृत्तित्वेन तादृशप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके विवक्षितां किं यादृशप्रतियोगित्वाश्रयनिरूपितत्वादिनिवेशेन चेन्न वह्नित्वेन वह्न्यभावीयप्रतियोगितावच्छेदकावच्छिन्नीयत्वेन घटत्वावच्छिन्नाधिकरणतावद्भेदस्यापि हेत्वधिकरणे निवेशनीयतया भेदकूटाधिक्येन गौरवात् वह्न्यधिकरणत्वेन घटभेदस्य हेत्वधिकरणे सत्त्वात् वह्न्यभावस्यापि लक्षणघटकतया ऽव्याप्तिवारणाय भेदकूटार्थकं अन्यत्वपदमिति ध्येयम्॥ अथ प्रतियोगिता यदिप्रत्याश्रयं नाना तदा महानसीयवह्न्यादिनिष्ठा या वह्न्यभावीयप्रतियोगिता तदाश्रयाधिकरणभेदकूटस्य हेत्वधिकरणे सत्त्वादव्याप्तिः एवं एकधर्म्मावच्छिन्नप्रतियोगितायाऐक्ये वह्नित्वेन घटाभावीया या प्रतियोगिता सैव वह्नित्वेन वह्निधूमोभयाभावीया वह्न्यधिकरणत्वात्मकतादृशप्रतियोग्यधिकरणत्वावच्छिन्नभेदकूटस्य हेत्वधिकरणे ऽसत्त्वाद्वह्नित्वेन घटाभावस्य लक्षणाघटकत्वेन अपिच घटाधिकरणत्व-हेत्वधिकरणत्वान्यतरावच्छिन्नप्रतियोगिताकभेदस्य हेत्वधिकरणेऽसत्त्वाद्वह्नित्वेन घटाभावस्य लक्षणाघटकतयाच व्यर्थं सामानाधिकरण्यदलमिति चेन्न अस्य लक्षणस्य हेत्वधिकरणवृत्तिप्रतियोगिता प्रतियोगिता-

महानसीयवह्नयाद्यभावसत्त्वेतु (१४) यादृशप्रतियोगितावच्छेदके-ष्वत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वं ग्राह्यं तच्च तदतिरिक्तवृत्तित्वे सति तत्समानाधिकरणं यत्तदन्यत्वं (१५) नातो व्यधिकरणधर्म्मा-वच्छिन्नप्रतियोगितायास्तत एव वारणसम्भवे सामानाधिकरण्यद-

---

न्तार्थः अत्र वृतित्वन्तु स्वविशिष्टावच्छेदकतानिरूपकप्रतियोगिता-कभेदकूटवत्त्वासम्बन्धेन अवच्छेदकतायां स्ववैशिष्ट्यन्तु स्वनिरू-पकानुयोगितानिरूपितप्रतियोगित्वाश्रयाधिकरणत्वमात्रनिष्ठत्व— स्वावच्छेदकावच्छिन्ननिरूपकतानिरूपितत्वावच्छिन्नत्वोभयसम्ब-न्धेन तथाच प्रोक्तसकलदोषस्य वारणादिति सुधीभिर्भाव्यं ॥ ननु वह्नित्वेन महानसीयवह्न्यभावीयप्रतियोगित्वाश्रयनिष्ठा या वह्नि-त्वावच्छिन्ननिरूपकता तन्निरूपिताधिकरणत्वावच्छिन्नभेदस्य हेत्व-धिकरणेऽसत्त्वाद्वह्नित्वेन महानसीयवह्न्यभावस्य लक्षणाघटकत्वे उत्तरग्रन्थासङ्गतिस्तदयुक्तं निरूपकभेदेन निरूपकताया भिन्नत्वात् महानसीयवह्निनिष्ठतादृशनिरूपकतानिरूपिताधिकरणभेदस्य पर्व्वते सत्त्वादुक्ताभावस्य लक्षणघटकत्वात् ॥

(१४) तादृशप्रतियोगितासमानाधिकरणवृत्तित्वेन प्रतियोगि-योगितावच्छेदकत्वाभावस्योक्तत्वादुक्तवृत्तित्वस्य तादृशप्रतियोगि-तावच्छेदकत्वे ऽन्यत्रच सत्त्वादत्र कल्पे सामान्यधर्म्मेण विशेषाभा-वस्यावश्यं स्वीकरणीयत्वाद्वह्नित्वादिसामान्यधर्म्मेण महानसीय-वह्न्यभावस्य सत्त्वेतु इत्यत्र तु शब्देनोभयपक्षावलम्बनेन ग्रन्थास-ङ्गतिश्चेन्न वृत्तित्वं वृत्तिभेदेन भिन्नमेव तादृशप्रतियोगितावच्छेदक-त्ववृत्ति यद्वृत्तित्वं तन्नान्यत्र इतिमतेऽत्र सामान्यधर्म्मेण विशेषा-भावास्वीकारपक्षस्य सम्भवाद्ग्रन्थसङ्गतेः। केचित्तु तु शब्दस्य प-धार्थकत्वान्नग्रन्थासङ्गतिरित्याहुः। (१५) नन्वत्र अनतिरिक्तवृत्तित्व-स्यतादृशार्थकत्वे समवायेन प्रमेयसाध्यकभावत्वाद्धेतावतिव्या-प्तिरिति चेन्न अनतिरिक्तवृत्तित्वपदेन साध्यतावच्छेदकविशिष्टान्य-त्वस्य प्रतियोगिताया विवक्षितत्वात् वैशिष्ट्यञ्च स्वावच्छिन्नत्व— स्वसमानाधिकरणाभावप्रतियोगित्व—स्वसामानाधिकरण्यैतत्त्रितय-सम्बन्धेन कथितग्रन्थस्याप्ययमेवार्थः इति ध्येयं केचित्तु तच्चेत्या-दिग्रन्थस्य स्वसामानाधिकरण्य—स्वातिरिक्तवृत्तित्वोभयसम्बन्धेन तादृशप्रतियोगित्वाभावकत्वार्थकत्वान्न कश्चिद्दोषइत्याहुः।

लवैयर्थ्यमित्यस्मद्गुरुचरणाः। यत्तु यत्प्रतियोगितावच्छेदकावशि-ष्टस्य यत्प्रतियोगित्वाश्रयस्यच द्वयोः साध्यतावच्छेदकसम्बन्धेना-नधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितान्तार्थस्तथाच वह्नित्वेन घटाद्यभावस्य घटनिष्ठप्रतियोगिताया अपि तादृशत्वाद्वह्नि-त्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतः सामानाधिकरण्येनेत्युक्ता-र्थकं। (१६) नच स्वरूपसम्बन्धात्मकप्रतियोगितायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान् धूमादित्यत्राव्याप्तिर्वह्निसामान्याभावीयं यन्महान-सीयवह्निनिष्ठप्रतियोगित्वं तदवच्छेदकीभूत वह्नित्वविशिष्टस्य तत्-प्रतियोगित्वाश्रयीभूतमहानसीयवह्नेश्च द्वयोरनधिकरणत्वस्य हेतु-मति पर्वते सत्त्वादितिवाच्यं प्रतियोगिव्यक्तीनां भेदेऽपि एकधर्म्मा-वच्छिन्नप्रतियोगिताया लाघवेनैक्यस्वीकारादिति नच कालोघटवान् महाकालत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तिर्गगणाभा-वीयप्रतियोगित्वे तदाश्रयीभूतगगणस्याधिकरणाप्रसिद्ध्या निरुक्त-रूपाभावादिति वाच्यं महाकालान्यत्वविशिष्टघटाद्यभावीयतादृशवि-शिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वात् यत्प्रतियोगि-तावच्छेदकविशिष्ट-यत्प्रतियोगित्वाश्रयोभयत्वस्वा हेत्वधिकरणयत् किञ्चिन्निष्ठाधिकरणतानवच्छेदकं, तादृशप्रतियोगिताया एव प्रवे-श्यतया घटत्वेन गगणाभावमादाय तत्र लक्षणसम्भवाच्चेति (१७)

---

(१६) विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय द्वयो-रनधिकरणमित्यन्तस्य यत्प्रतियोगित्वाश्रयाधिकरणत्व–यत्प्रतियो-गितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभाववत्त्वमर्थस्तेन एकव्य-क्तिसाध्यके व्यभिचारिण्यपि तत्तत्क्षणवृत्तित्वादिविशिष्टनानाधि-करणत्वसत्त्वान्न तादृशसाध्यकव्यभिचारिण्युभयाप्रसिद्ध्या साध्या-भावस्य लक्षणाघटकत्वेनातिव्याप्तिरिति ध्येयम्।

(१७) नन्वत्र प्रतियोगित्वाश्रयपदं किमर्थं सत्यं साध्यतावच्छे-दकसम्बन्धेन अत्र वृत्तित्वविवक्षणे संयोगेन प्रमेयसाध्यकद्रव्य-जा-त्यन्यतरत्वादि हेतावतिव्याप्तिभिया यत्किञ्चिद्धेत्वधिकरणनिरूपि-तवृत्तितासामान्ये यत्प्रतियोगित्वाश्रयनिष्ठत्व–यत्प्रतियोगिताव-

तत्र प्रतियोगिभेदेऽपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगिताया यद्यभेद स्तदा वह्नित्वेन घटाभावस्य या वह्नित्वावच्छिन्ना घटनिष्ठप्रतियोगिता सैव वह्नित्वेन धूमसामान्याभावस्यापि वह्नित्वावच्छिन्नधूमादिनिष्ठापि प्रतियोगिता लाघवा त्तथाच सामानाधिकरण्येनेत्यस्य वैयर्थ्यं दुर्व्वारं (१८) वह्नित्वेन घटाभावीयं तद्घटनिष्ठप्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्रतियोगित्वाश्रयीभूतधूमादेश्च द्वयो रधिकरणत्वस्य सर्व्वत्रैव हेतुमति सत्त्वेन वह्नित्वरूपव्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताया लक्षणाघटकत्वादिति दिक्। एवञ्चेति तथाचाव्यभिचारस्य पारिभाषिकत्वानादरेऽपि नक्षतिरिति भावः। वह्नित्वावच्छिन्नघटाद्यभाववति धूमादेर्व्वर्त्तमानत्वादुक्तं साध्याभावेति। अत्र साध्याभावो व्याप्यवृत्तिर्बोध्य एवं परत्रापि वि-

---

च्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-त्रितयाभावस्तादृशप्रतियोगितैव प्रतियोगितान्तार्थो वक्तव्यस्तथाच महाकालान्यत्वविशिष्टघटस्य गगणादेश्च महाकाले सत्त्वमते यत्प्रतियोगित्वाश्रयनिष्ठत्वपदानुपादाने कालो घटवान् महाकालत्वादित्यत्र तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्त्यापत्तिः सिद्धान्ते तु घटत्वेन पटाभावीया प्रतियोगिता धर्त्तव्या महाकालनिरूपितघटत्वावच्छिन्नवृत्तितायां पटनिष्ठत्वाभावेन तादृशत्रितयाभावात् अत्र कालो घटत्वेन न पटवान् इत्यनुभव एव प्रमाणमिति ध्येयं।

(१८) एकधर्म्मावच्छिन्नप्रतियोगित्वैक्यस्वीकारे स्वमते यादृशप्रतियोगितावच्छेदकावच्छिन्नीयत्वेनोक्तावपि सामानाधिकरण्यस्य वैयर्थ्याद्यन्तुमतखण्डनं कथं सङ्गतं चेन्न एकधर्म्मावच्छिन्नप्रतियोगिताया नानात्वमतेन चक्रवर्त्तिण स्तात्पर्य्यात्। ननु स्वमते यादृशप्रतियोगितावच्छेदकमित्यत्रावच्छेदकत्व मनतिरिक्तवृत्तित्वमुक्तं तथात्र धूमत्वस्य धूमसामान्याभावीया या प्रतियोगिता तस्य एवातिरिक्तवृत्तित्वात् साध्याभावस्य लक्षणाघटकत्वादतिव्याप्ति श्चेन्न स्वनिरूपकानुयोगितानिरूपितप्रतियोगितानतिरिक्तवृत्तित्वस्य तादृशप्रतियोगितानतिरिक्तवृत्तित्वपदेन विवक्षितत्वादथैवं प्रतियोगिताया नानात्वे वह्न्यभावस्यलक्षणघटकत्वे वह्निमान् धूमादित्यादावव्याप्ति श्चेन्न तत्र यादृशप्रतियोगित्वाश्रयत्वस्य स्वनिरूपकानुयोगितानि-

शिष्टेति महानसीयत्वादिविशिष्टवह्नित्वाच्छिन्नप्रतियोगिताकस्येत्यर्थः ननु विशिष्टस्यातिरिक्तत्वान्महानसीयत्व-वह्नित्वयोर्वैशिष्ट्यस्य वा परम्परया तदवच्छेदकत्वान्नैष दोष इत्यत आह ह्रदत्वर्वह्नित्वइति। ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगि सत्त्वादित्यत्रातिव्याप्तिः स्वसमानाधिकरणाभावाप्रतियोगित्वरूपस्यावच्छिन्नवृत्तिकान्यत्वस्य वा व्याप्यवृत्तित्वस्य संयोगाभावे ऽसत्वादतआह सत्त्ववतीति तथाच हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यन्तेन निरवच्छिन्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वम्वा अभावस्य विवक्षितमिति भावः। गुरुधर्म्मेण साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृतनिरुक्तावप्रवेशोऽपि न क्षतिरित्याशयेनाह वक्ष्यमाणम्वेति यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्त्वावान् जातेरित्यादावव्याप्ति स्तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वानतिरिक्तवृत्तित्वात् सत्त्वात्वस्य-

---

रूपितप्रतियोगितावत्त्वसम्बन्धेन वक्तव्यत्वात् एवञ्चेत् स्वमते वह्नित्वेन घटाभावस्य लक्षणघटकत्वात् सामानाधिकरण्यस्य स्वार्थैक्यं यत्तुमतेतु एकधर्म्मावच्छिन्न प्रतियोगिताय ऐक्यस्वीकारात् प्रतियोगित्वाश्रयत्वं स्वनिरूपकानुयोगितानिरूपितप्रतियोगितावत्त्वसम्बन्धेन न विवक्षितं अतो वह्नित्वेन घटाभावो न लक्षण घटक इति सामानाधिकरण्यदलं व्यर्थमेव नच सामानाधिकरण्यदलस्वार्थैक्याय कथितसम्बन्धेन प्रतियोगित्वाश्रयत्वं वक्तव्यमिति वाच्यं एकदलस्वार्थैक्यायापरदलनिवेशस्यासङ्गतत्वादिति नच वह्निभिन्नवान् जलादित्यादौ वह्निभिन्नत्वेन वह्न्यभावमादायाव्याप्ति वारणाय सामानाधिकरण्यदलस्वार्थैक्यसम्भवइति वाच्यं वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिताया वह्निभिन्नत्वेन वह्निघटोभयाभावीय-घटनिष्ठत्वादिति न तादृशाभावो लक्षणघटकः भट्टाचार्य्येण एतन्मते उक्तस्थले ऽव्याप्तिवारणाय तद्दलस्यस्वार्थैक्यं यदुक्तं तत्तु वह्निभिन्नत्वेन वह्निघटोभयाभावीयवह्निनिष्ठप्रतियोगिताया वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितानात्मकत्वाभिप्रायेण।

स्यतो वक्ष्यमानमिति सिद्धान्तलक्षणे वक्ष्यमाणमित्यर्थः तथाच हेतुमन्निष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्यनावच्छेदकं यद्धर्म्मविशिष्टसम्बन्धिनिष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं (१९) तदेव पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदके वाच्यमिति भावः। ननूत्पत्तिदशायां गुणसामान्याभावस्य संयोगवति घटादौ सत्त्वाद्गुणत्वस्य संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहान्न तमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसम्भावनापीत्यत आह गुणावृत्तित्वेति गुणासमवेतत्वेत्यर्थः घटादावुत्पत्तिदशायामपि गुणासमवेतस्य द्रव्यत्वादेः सत्त्वान्न तदभावइति भावः संयोगी गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं सम्भवति गुणावृत्तित्वावच्छिन्नाभावस्य हेतुसमानाधिकरणत्वासत्त्वादतः संयोगसाध्यकमात्रे यद्धर्म्ममादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्म्ममाह द्रव्यमात्रेति द्रव्यान्यासमवेतत्वेत्यर्थ उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकप्रतियोग्यधिकरणवृत्तित्वेन कदाचिद् गुणत्वादिरूपाणां तत्तत्प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं नस्यात् तदेव नास्तीति तेषां संयोगात्मक प्रतियोग्यधिकरणावृत्तित्वादेतन्मात्रं सूचयितुमुक्तं व्याप्यवृत्तीति ॥

इति चक्रवर्त्तिलक्षणीय जागदीशीटीका समाप्ता ।

---

(१९) एष तु साध्याभावाघटिततया द्वितीयादिलक्षणस्य परिस्कारः प्रथमस्यतु हेतुसमानाधिकरणसाध्याभावप्रतियोगितावच्छेदकम् स्वसमानाधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितानवच्छेदकमितिनिष्कर्षः। नच तादृशप्रतियोगितायां स्वसामानाधिकरण्यमपहाय तादृशप्रतियोगिताया सामानाधिकरण्येनानवच्छेदकं कुतो न निवेश्यमितिवाच्यं इन्धनत्वेन वह्न्याद्यभावमादाय

प्रगल्भलक्षणं दूषयितुमुपन्यस्यति साध्यतावच्छेदकेति स्वपदं हेतुतावच्छेदकविशिष्टहेतुपरं तथाच यद्धर्म्मावच्छिन्नसमानाधिकरणसाध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धर्म्मवत्त्वं पर्य्यवसितं अवच्छेदकत्वञ्चेहानातिरिक्तवृत्तित्वं व्यभिचारिणितु हेतुसमानाधिकरणस्य साध्याभावस्यैव साध्यसामानाधिकरण्यविरहान्नातिप्रसङ्गः विशिष्टसत्तावान् जातेरित्यादौ यावत एव हेतुसमानाधिकरणस्य साध्याभावस्य सत्तारूपसाध्यसामानाधिकरण्यादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति तथाच विशिष्टसत्ताभावस्य तादृशस्य विशिष्टसत्तात्वावच्छिन्नासमानाधिकरणत्वान्नातिप्रसङ्गः। अत्रच साध्यसामानाधिकरण्यं येन सम्बन्धेन साध्यता तेन सम्बन्धेन साध्याधिकरणे दैशिकविशेषणतया वृत्तित्वरूपं ग्राह्यं तेन द्रव्यत्वादिसमानाधिकरणस्य ज्ञानाद्यभावस्य विषयतया ज्ञानाद्यधिकरणे वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादिहेतौ नातिव्याप्ति र्नवा कालः प्रमेयत्वादित्यादौ सर्व्वेषामेव साध्याभावानां साध्यवति काले कालिकसम्बन्धेन वृत्तावप्यतिप्रसङ्गः (१) साध्याभावनिष्ठं हेतुसामानाधिकरण्यमपि हेतुतावच्छेदकसम्बन्धेन प्रकृतहेतोर्यादृशाधिकरणं तत्र विशेषणतया वृत्तिं

वह्निमान् धूमादित्यादावव्याप्ते रिन्धनत्वे वह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वादितिहृदयम्।

इति अन्नदाचरण तर्कवागीशकृत प्रभाग्रन्थेचक्रवर्त्ति लक्षणव्याख्या समाप्ता॥

---

(१) जन्यमात्रस्य कालत्वानङ्गीकर्त्तृनये अयोगोलकवृत्तिरूपध्वंसाद्यात्मकाभावमादाय धूमवान्वह्नेरित्यत्रातिव्याप्त्यभावात् स्थलान्तरमुक्तम् ननु समवायेन धूमाधिकरणे धूमाभावस्य वृत्तित्वाद्धूमवान् वह्नेरित्यत्रातिव्याप्तिसम्भवे स्थलान्तरानुधावनमयुक्तं चेन्न साध्यतावच्छेदकसंसर्गतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकसंसर्गताकाधिकरणत्वनिवेशे तत्रातिव्याप्त्यभावात् ननु

११

स्वरूपं बोध्यं (२) तेनाय मात्मा ज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्त्तमानस्यात्मत्वाभावस्य द्रव्यं विशिष्टसत्त्वादित्यादौच सत्तासमानाधिकरणस्य साध्यसामान्याभावस्य साध्यसामानाधिकरण्यविरहेऽपि नाव्याप्ति र्नवा कालः कालपरिमाणादित्यादौ हेत्वधिकरणे कालिकसम्बन्धेन वर्त्तमानस्य कालत्वादिसामान्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तित्वविरहेऽपि न क्षतिः साध्याभावस्तु पूर्वोक्तद्वितीयरीत्या बोध्यः तेन व्यधिकरणधर्म्मावच्छिन्नाभावासत्त्वेऽपि साध्यस्य विशिष्टाभावादिकमादायैव लक्षण सङ्गमना न्न प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारासङ्गतिः कपिसंयोगी सत्त्वादित्यादौ कपिसंयोगाभावस्य साध्यसमानाधिकरणत्वेऽपि द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभावस्य साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रतियोगिताके गगनाभावस्याभावे साध्ये यत्र मेयत्वादिकं हेतुस्तत्र हेतुमति दैशिकविशेषणतया वर्त्तमानस्याकाशाभावात्मकस्य साध्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तावपि हेतुसमानाधिकरणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभावतया तस्यैव सामानाधिकरण्यविरहान्नातिव्याप्तिः ॥

स्वरूपेण वृत्तित्वोक्तावपि धूमाधिकरणे महाकाले धूमाभावस्य वृत्तित्वात्तत्रातिव्याप्तिसम्भवे कालः प्रमेयत्वादित्यभिधानमनुचितम् चेन्न वृत्त्यनियामकसम्बन्धेन व्याप्यव्यापकभावानभ्युपगमे संयोगेन धूमाधिकरणत्वस्य महाकाले ऽसत्वाद्धूमवान् वह्नेरित्यत्रातिव्याप्त्यभावात्। (२) नचात्र तद्घटभिन्नं घटत्वादित्यत्रातिव्याप्ति स्तद्घटभेदाभावस्य तद्घटत्वस्य विशेषणतया वृत्तित्वविरहेण लक्षणाघटकतया व्यधिकरणधर्म्मावच्छिन्नस्यैवाभावस्य साध्यसमानाधिकरणस्य लक्षणघटकत्वादिति वाच्यं तद्घटत्वप्रकारकयत्किञ्चिज्जन्यज्ञानविशेष्यत्व--तद्घटभिन्नत्वप्रकारकप्रमाविशेष्यत्वैतदन्यतराभावस्यैव तादृशजन्यज्ञानशून्यतादशायां हेतुसमानाधिकरणस्य लक्षणघटकत्वादिति चिन्त्यम् अत्र वह्निमान् धूमादित्यत्र साध्याधि-

यत्समानाधिकरणेति यत्समानाधिकरणसाध्याभावप्रमासामान्यइत्यर्थस्तेन धूमवान् वह्नेरित्यादौ व्यधिकरणधर्म्मावच्छिन्नसाध्याभावप्रमाव्यक्तेः साध्यवत्त्वाज्ञानाविरोधित्वेऽपि साध्यसामान्याभावप्रमाया एव साध्यवत्ताज्ञानविरोधितया नातिव्याप्ति व्यधिकरणधर्म्मावच्छिन्नसाध्याभावस्य साध्यसामान्याभावत्वभ्रमदशायां पर्व्वतो न वह्निमान् इत्याकारकतद्बुद्धेः साध्यवत्ताज्ञानविरोधित्वादसम्भवः स्यादतः प्रमात्वोपादानं प्रमात्वञ्चात्र भ्रमसामान्यभिन्नज्ञानत्वं (१) नातस्तादृशबुद्धेरप्यंशतः प्रमात्वादुक्तदोषतादवस्थ्यं ह्रदादौ वह्निसामान्याभावप्रमायाः साध्यवत्त्वधीविरोधित्वादव्याप्तिरतो यत्समानाधिकरणेति तच्च फलतः प्रमाविशेषणं (२) तथाच यद्धर्म्मावच्छिन्नवद्विशेष्यकसाध्याभावप्रमासामान्य इत्यर्थः तेन एतद्वृक्षत्वसमानाधिकरणस्य संयोगसामान्याभावस्यैव गुणे धर्म्मिणि प्रमायां साध्यवत्ताज्ञानविरोधित्वेऽपि संयोगी एतद्वृक्षत्वादित्यादौ नाव्याप्तिः। यत्तु साध्यवत्ताज्ञानविरोधित्वं हेतुमन्मात्रवृत्तिधर्म्मावच्छिन्नविशेष्यकं यत् साध्यवत्ताज्ञानं तद्विरोधित्वं वाच्यं (३) तथाच गुणो न संयोगीतिप्रमाया गुणः संयोगीत्याकारकबुद्धिविरोधित्वेऽपि

करणवृत्तित्वस्य सम्बन्धविशेषस्य निवेशेऽनिवेशेवोभयथा ऽव्याप्त्यभावादयमात्मा ज्ञानादित्यनुधावनम्॥

(१) अत्र ज्ञानपदानुपादाने कामिनी घटवतीत्यादौ घटत्वेन पटाभाववती कामिनीति जिज्ञासायाः साध्यवत्ताज्ञानविरोधित्वादव्याप्तिः स्यादिति ध्येयम्।

(२) ननु वह्नित्वेन घटाभाववत्पर्व्वतकालीनह्रदो वह्न्यभाववानिति बुद्धेः साध्यवत्ताज्ञानविरोधित्वेऽपि हेतुमत्त्वावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारतासामान्यं तादृशप्रतिबन्धकतावच्छेदकं इत्यस्य तात्पर्य्यात् न कोऽपिदोष इति ध्येयं यद्धर्म्मावच्छिन्नावच्छेदकताकविशेष्यताकप्रमासामान्ये इत्यस्यैव सम्यक्त्वे मतुपा यद्धर्म्मावच्छिन्नवन्निष्ठविशेष्यताकत्वकथनं वह्निमान् वह्न्यभावादित्यादावतिव्याप्तिवारणाय इतिध्येयम्। (३) धर्म्मिविशेषमन्तर्भाव्य प्रतिबध्यप्रतिबन्धकभावस्वीकारे प्रमेयत्वावच्छिन्नह्रदविशेष्य-

तादृशी साध्यवत्त्वधी नं हेतुमन्मात्रवृत्तिधर्म्मावच्छिन्नविशेष्यिका गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो नोक्तदोष इति तत्तुच्छं यत्समानाधिकरणाद्दत्यस्य व्यर्थतापत्तेः साध्याभावप्रमासामान्ये यद्वन्मात्रवृत्तिधर्म्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानस्य विरोधित्वं नास्ति तत्त्वमित्यस्यैव सम्यक्त्वात् जलादिधर्म्मिकवह्निसामान्याभावप्रमायाःसाध्यवत्त्वधीविरोधित्वेऽपि धूमवन्मात्रवृत्तिधर्म्मावच्छिन्नविशेष्यकं यद्वह्निमत्ताज्ञानं तदविरोधित्वादेव वह्निमान्धूमादित्यादावव्याप्त्यभावादिति दिक्। अत्रच साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकरूपेणच साध्यवत्ताज्ञानं बोध्यं तेन पर्व्वतः समवायसम्बन्धेन न वह्निमानितिप्रमायाः समवायेन वह्निमत्ताबुद्धिं पर्व्वतो महानसीयवह्निमानिति प्रमायाश्च संयोगेन महानसीयवह्निमत्ताबोधं प्रति प्रतिबन्धकत्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः (४) प्रतिबन्धकत्व-

---

ककपिसंयोगवत्ताबुद्धिम् प्रति प्रमेयत्वावच्छिन्नहृदविशेष्यताककपिसंयोगाभावप्रमायाः प्रतिबन्धकत्वात् कपिसंयोगी तत्त्वादित्यादावव्याप्तिरतोमात्रपदं । अत्र हेतुमन्मात्रवृत्तित्वं स्वव्यापक हेतुताकत्वं नतु हेतुमदितरावृत्तित्वं तथासति हेतुमदितराप्रसिद्ध्या वाच्यम् ज्ञेयत्वादित्यत्राव्याप्तिरिति ध्येयम् ।

(४) ननु तन्मन्दं प्रतियोग्यवृत्तिश्चेत्यादि मूलावतारानुरोधेन साध्याभावस्य पूर्व्वोक्तद्वितीयरीत्यैव वक्तव्यतयेत्यादिग्रन्थेन प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वस्य प्रतियोगितायां निवेशोऽस्तीत्यायाति तथासति महानसीयवह्न्यभावस्य लक्षणाघटकतया महानसीयवह्न्यभावमादाय वह्निमान्धूमादित्यत्राव्याप्तिदानमनुचितम् चेन्न महानसीयवह्न्यभाववान् पर्व्वतो वह्नित्वेन घटाभाववानितिप्रमाया हेतुमद्विशेष्यकनिरुक्तसाध्याभावप्रमासामान्यान्तर्गतत्वाद्वह्निमान् धूमादित्यत्र महानसीयवह्निमानितिज्ञानप्रतिबन्धकत्वेनाव्याप्तेरिति साध्यतावच्छेदकावच्छिन्नत्वं प्रकारतायां निवेशनीयं एवंरीत्या साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमपि प्रकारतायां वक्तव्यमिति यद्यप्येवमपि ह्रदो वह्निसामान्याभाववान् पर्व्वतश्च वह्नित्वेन घटाभाववानिति प्रमायां ह्रदो वह्निमानिति ज्ञानप्रतिबन्ध-

श्चावच्छेदकधर्म्मवत्ताग्रहादिव्यावृत्तं ग्राह्यं तेन वह्निसामान्याभावावच्छेदकतया गृहीतस्य महानसीयवह्न्यभावादेः पर्व्वतादौ प्रमायाः संयोगसम्बन्धावच्छिन्नपर्व्वतधर्म्मिकवह्निमत्ताबुद्धिविरोधित्वेऽपि नासम्भवः सर्व्वत्रेति साध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणत्वकत्वमित्यत एव प्रथमस्य द्वितीयेऽस्मिंश्च यत्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वमित्यत एव सामञ्जस्यादिति भावः (५)। यत्तु यत्समानाधिकरणसाध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं

कत्वाद्वह्निमान् धूमादित्यादावव्याप्तिस्तथापि साध्याभावप्रकारतानिरूपितहेतुमन्निष्ठमुख्यविशेष्यताभिन्ना या-साध्याभावप्रकारतानिरूपितविशेष्यता--तदनिरूपकत्वस्य प्रमायां निवेशान्न दोष इति प्रथमसाध्याभावप्रकारत्वानिवेशे वाच्यं ज्ञेयत्वादित्यादौ हेतुमन्निष्ठविशेष्यताभिन्नविशेष्यत्वाप्रसिद्धेरव्याप्तिर्द्वितीयसाध्याभावप्रकारत्वा--निवेशे वह्नित्वेन घटाभावनिष्ठविशेष्यतामादाय वह्निमान् धूमादित्यादावव्याप्तिरिति ननु ह्रदे वह्न्यभावः पर्व्वतो वह्नित्वेन घटाभाववांश्च इति प्रमायाः साध्यवत्ताज्ञानाविरोधित्वादव्याप्तिश्चेन्न निरुक्तद्वितीयसाध्याभावप्रकारतानिरूपितविशेष्यतापदेन साध्याभावविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितसांसर्गिकविषयतानिरूपितानुयोगित्वविषयतानिरूपितधर्म्मिविषयताया विवक्षितत्वात् तथा-च ह्रदे वह्न्यभावइतिज्ञाने तादृशविषयतायाः सत्त्वान्नोक्तप्रमा निरुक्तप्रमान्तर्गता इति विभावनीयम्। केचित्तु मुख्यविशेष्यताद्वयानिरूपकत्वं प्रमायां निवेश्य ह्रदो वह्न्यभाववान् वह्नित्वेन घटाभाववांश्च पर्व्वत इति ज्ञानवारणं सम्भवतीत्याहुः समवेतत्वेन वह्न्यभावस्य वह्नित्वेन महानसीयवह्न्यभावस्य समवायेन वह्निमत्ताज्ञानस्य महानसीयवह्निमत्ताज्ञानस्यच प्रतिबन्धकतावच्छेदकत्वात् साध्यांशे प्रकृतेति जगदीशतात्पर्य्यं तथाच समवायसम्बन्धोऽपि व्यापकताघटकः सम्भवतीति अस्मद्गुरुचरणाः॥

(५) सिद्धिप्रतिबन्धकतामादायासम्भववारणन्तु समूहालम्बनज्ञानप्रतिबन्धकतामादायासम्भववारकेन साध्यवत्ताज्ञानत्वावच्छिन्नप्रतिबध्यतानिवेशेनैव इति ध्येयम्॥

तत्त्वमेव प्रथमलक्षणार्थः तथाच धूमसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वावच्छिन्नघटाद्यप्रसिद्धया साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावादसम्भवः स्यादतः साध्याभावपदं (६) नचैवमपि प्रतियोगिपदवैयर्थ्यमिति वाच्यं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्व साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावस्याखण्डस्यैव निविष्टत्वात्। एवं द्वितीयलक्षणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्तावोधविरोधित्वं निवेश्य साध्याभावपदसार्थक्यं वोध्यं इति तन्मन्दं प्रतियोग्यवृत्तिश्चेत्यादिमूलावतारानुरोधेन साध्याभावस्य पूर्व्वोक्तद्वितीयरीत्यैव वक्तव्यतया हेतुसमानाधिकरणस्य वह्नित्वेन घटाभावादेः साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याप्रसिद्धया तादृशपदप्रक्षेपेऽप्यव्याप्तितादवस्थ्यात्। नच घटत्त्वेन वह्न्यभाव एव वह्नित्वेन घटाभावः समनियताभावानामैक्यात् तथाच तस्यापि साध्यतावच्छेकविशिष्ट वह्निरूपप्रतियोगिनः सामानाधिकरण्य मक्षतमेवेति वाच्यं तथासति घटसामान्याभावादेरपि घटत्वादिना प्रमेयसामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासम्भववारकस्य साध्याभावपदार्थस्य व्यर्थताया वज्रलेपत्वादिति ॥ ०। प्रगल्भस्यैवलक्षणान्तरमुपन्यस्यति यत्त्विति यद्वृत्ताविति यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्य इत्यर्थः तेन वह्निनिष्ठस्य व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेऽपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः धूमादिनिष्ठस्येन्धनत्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वस्यापीन्धनत्वादिप्रकारेण वह्न्यनुमितेर्विरोधित्वादसम्भवः स्यादतः प्रकृतेति

(६) ननु स्वरूपसम्बन्धेन प्रमेयसाध्यकस्थले प्रमयत्वेन गगनाभावमादाय साध्याभावपददानेऽपि प्रतियोगिसामानाधिकरण्याप्रसिद्ध्या ऽव्याप्तिरितितु न युक्तं सामान्यधर्म्मेण विशेषाभावानङ्गीकारात्। ननु प्रमेयसाध्यकस्थले ऽव्याप्त्यभावात् कथमसम्भवोक्तिः सत्यं तादात्म्येन व्याप्यव्यापकभावानभ्युपगमादिति ॥

साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकरूपेणच प्रकृतसाध्य-केत्यर्थः (७) तथाच तादृशसाध्याभाववद्वृत्तित्वस्य वह्नित्वेन वह्न्यनुमितिं प्रत्यविरोधित्वाददोषः प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविषयत्वमात्रं धूमनिष्ठ वह्नित्वादिना घटाद्यभाववद्वृत्तित्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्य विषयत्वसम्भवात् किन्तु विषयतया प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वं तथाच वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधित्वाभावाद्व्यभिचारिण्यतिव्याप्तिरतः साध्याभाववतीति (८) तथाच यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं प्रकृतानुमितिप्रतिब-

---

(७) वह्निमान् धूमादित्यत्र स्वरूपेण वह्न्यभाववद्वृत्तिर्धूमइति ज्ञानीयतादृशवृत्तितायां स्वरूपेण वह्निमानितिज्ञानस्य प्रतिबन्धकत्वादव्याप्तिरतो साध्यतावच्छेदकसम्बन्धेनेत्युक्तम्।

(८) अत्रेयमनुपपत्तिः साध्यसामान्याभाववद्वृत्तितात्वेन वह्निनिष्ठवृत्तित्वस्यापि धूमानुमितिप्रतिबन्धकतावच्छेदकत्वात् कथमतिव्याप्ति नच वह्निमान् धूमादित्यादौ वह्न्यभाववन्निरूपितत्वेन गृहीतस्य धूमादिनिष्ठवृत्तित्वस्यापि प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वात् तादृशावच्छेदकतापर्य्याप्त्यधिकरणत्वस्य विवक्षणीयतया ऽव्याप्तिवारणे ऽतिव्याप्तिसङ्गतिरिति वाच्यं इदानीं तादृशभ्रमस्वीकारे विषयस्य प्रतिबन्धकतावच्छेदकत्वासम्भवादेवाव्याप्तिविरहात् नच निरूप्यनिरूपकभावापन्नविषयितासम्बन्धेन धूमादिनिष्ठवृत्तित्वविशिष्टज्ञानत्वेन प्रतिबन्धकत्वाद्विषयस्य प्रतिबन्धकतावच्छेदकत्वसम्भव इति वाच्यं तथासति पर्य्याप्तिविवक्षया प्यव्याप्तेरप्रतीकारादत्रोच्यते उक्ताव्याप्तिवारणाय यद्वृत्तितावच्छेदकसाध्याभाववद्वृत्तितात्वावच्छिन्नावच्छेदकतासामान्ये प्रकृतानुमितिप्रतिबन्धकतानिरूपितत्वाभाव इत्येवनिष्कृष्टार्थस्य वक्तव्यतयां साध्याभाववतीत्यनुक्तौ यद्वृत्तितावच्छेदकवृत्तितात्वावच्छिन्नावच्छेदकतासामान्येइत्येतावत्सम्मततया वह्न्यभाववद्वृत्तितात्वावच्छिन्नावच्छेदकताया वृत्तितात्वावच्छिन्नावच्छेदकतात्वेन तादृशाप्रतिबन्धकतानिरूपितत्वेन तेनच रूपेण धूमवृत्तितावच्छेदकत्वेनच वह्निमान् धूमादित्यादावव्याप्तिप्रसङ्गेन यद्वृत्तितावच्छेदकवृत्तिता-

न्धकतानवच्छेदकं तत्वमित्यर्थः नच घटाभाववद्वृत्तित्वादौ धूमाभाववद्वृत्तितात्वभ्रमदशायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वह्निनिष्ठस्य निर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबन्धकतानवच्छेदकत्वाद्व्यभिचारिण्यतिव्याप्तितादवस्थ्यमिति वाच्यं यन्निष्ठसाध्याभाववद्वृत्तित्वविषयतासामान्यं न प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वमित्यस्योक्तत्वात् (९) साध्याभावस्तु पूर्व्वोक्तद्वित्वपर्य्याप्तावच्छेदकताकावच्छेदकतासामान्ये इत्येव वक्तव्यतया धूमवान् वह्नेरित्यादावतिव्याप्तिसङ्गतिरिति सुधीभिरालोचनीयम् ।

(९) अत्र साध्याभाववद्वृत्तितात्वविशिष्टनिरूपितविषयितासामान्यमित्यर्थ स्तेन वह्न्यभाववद्वृत्तितात्वेन धूमादिनिष्ठव्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायाः प्रतिबन्धकतावच्छेदकत्वेऽपि नासम्भव इति । नचात्र यन्निष्ठवृत्तित्वविषयितासामान्यं न प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वमित्यस्यैव सम्यक्त्वे साध्याभाववत्पदं निरर्थकमिति वाच्यं वह्न्यभावत्वेन वह्नित्वेन घटाभावावगाहिवह्न्यभाववद्वृत्ति धूमइति ज्ञानीयधूमनिष्ठवृत्तित्वविषयित्वस्य निरुक्तसामान्यान्तर्गतस्य निरुक्तानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वाद्वह्निमान् धूमादित्यादावव्याप्तेर्व्वारणाय यन्निष्ठवृत्तितात्वपर्य्याप्तावच्छेदकताकविषयितासामान्यं न प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वमित्यर्थो वक्तव्य स्तथाच वह्निनिष्ठवृत्तितात्वपर्य्याप्तावच्छेदकताकविषयितासामान्यस्यैव धूमसाध्यकानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वाभावाद्धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय तद्दलस्य स्वार्थकयात् ॥ नन्वत्र स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेनैव सामञ्जस्ये अनतिरिक्तवृत्तित्वानुसरणं व्यर्थमिति चेन्न वह्नित्वेन घटाभाववद्वृत्तित्वावच्छेदेन वह्न्यभाववद्वृत्तित्वनिश्चयविशिष्ट-वह्नित्वेन घटाभाववद्वृत्तिर्धूम इतिनिश्चयत्वेन वह्न्यनुमितिप्रतिबन्धकत्वाद्धूमनिष्ठवह्नित्वेन घटाभाववद्वृत्तित्वविषयितासामान्यस्य स्वरूपसम्बन्धरूपप्रतिबन्धकतावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्ते रथवा यादृशव्यभिचारिस्थले व्यभिचारज्ञानस्य कदापि न भ्रमत्वं तद्गतरूपेणान्यावगाहित्वादिकञ्च न तादृशस्थलविशेषे व्यभिचारज्ञानस्य विष-

तीयरीत्या प्रवेशनीयः तेन नानुगमोदोषः इति अनुमित्यविरोधित्वे- ति अनुमितिविरोधित्वं न अनुमितेः साक्षात्प्रतिबन्धकत्वं व्यभि- चारधियः साक्षादतथात्वेन व्यभिचारिमात्रे ऽतिव्याप्तिप्रसङ्गापत्तेः किन्त्वनुमितिजनकज्ञानविरोधित्वं तज्जनकश्च यदि निरुक्तव्याप्ति- ज्ञानं तदा तादृशज्ञानं प्रति साध्याभाववद्वृत्तित्वज्ञानं न विरोधि किन्तु साध्याभाववद्वृत्तित्वमनुमितिविरोधीत्याकारकं ज्ञानमेव त- थेति व्यभिचारिण्यतिव्याप्ति यदि च साध्याभाववद्वृत्तिर्हेतुरित्याका- रकं ज्ञानं प्रकृतानुमितिजनकं तदा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमर्थान्तरग्रस्तमिति भावः एतेन प्रकृतानुमितिपदं प्रकृत- हेतुधर्म्मिकसाध्यव्याप्त्यनुमितिपरं (१०) ननु प्रकृतसाध्यकानुमि- तिपरं विरोधित्वञ्च तत्र साक्षादेव निविश्यते तदा न व्यभिचारिण्य- तिप्रसङ्ग इत्यपास्तं॥ इतिजगदीशकृतप्रगल्भलक्षणव्याख्यासमाप्ता।

मिश्रलक्षणं परिस्कर्त्तुमुपन्यस्यति केचित्विति केवलान्वयिनि

यविशिष्टत्वेनैव प्रतिबन्धकत्वं लाघवात् तथाच तादृशविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावादतिव्याप्त्यापत्तिरिति ध्येयम्। ननु प्रकृतानुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वनिवेशेनैवोपपत्तौ नञ्द्वय- प्रवेशो गौरवमिति मैवं धूमवान् वह्नेरित्यादौ वह्निनिष्ठनिर्धूमवृत्ति- त्वावगाह्याहार्य्यज्ञाने अप्रामाण्यज्ञानास्कन्दिततादृशज्ञाने तद्विषया- वगाहिसंशयेच निर्धूमवृत्तित्वविषयितायाः सत्त्वेन निरुक्तप्रतिबन्ध- कत्वातिरिक्तवृत्तित्वादतिव्याप्तेः सिद्धान्तेतु नञ्द्वयोपादानात् यद्- रूपावच्छिन्नविषयितासामान्यं प्रकृतानुमिति प्रतिबन्धकताशून्याना हार्य्याप्रामाण्यज्ञानानास्कन्दितनिश्चयावृत्ति तादृशविषयिताभिन्न-य- न्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं तत्त्वमित्यर्थो बोध्य स्तथाच सद्धेतुस्थले नियताहार्य्यज्ञानविषयसंयोगाभाववत्संयोग- वत्त्वस्य यद्रूपपदेन धर्त्तव्यतया तद्रूपावच्छिन्नविषयिताभिन्नत्व- स्य हेतुनिष्ठ-साध्याभाववद्वृत्तित्वविषयितासामान्ये सत्त्वाल्लक्षणस- मन्वयः व्यभिचारिणितु साध्यसामान्याभाववद्वृत्तितात्वस्यापि यद्रूपपदेन धर्त्तुं शक्यत्वान्न क्षतिरिति। (१०) ननु व्याप्तिपदेन साध्याभाववद्वृत्तित्वमेवोच्यते इति नास्त्यर्थान्तरग्रस्तत्वमिति चेन्न

प्रसिद्धावपि वह्न्यादिसाध्यके व्यतिरेकिणि यावन्तः साध्याभावास्त-त्सजातीयत्वं तद्वृत्त्यन्यतररूपात्मकमप्रसिद्धमत उक्तं प्रत्येकमिति (१) यावन्तः साध्याभावास्तेषां प्रत्येकमपि सजातीयत्वमेकस्मिन्न-भावे नास्तीत्यत उक्तं तत्तत्सजातीया इति तदधिकरणवृत्तित्वा-भावा इत्युक्ते तत्पदेन यावत्साध्याभावपरामर्शे वह्निमान् धूमात् रूपसामान्याभाववान् वायुत्वादित्यादौ साध्याभावात्मकतत्तद्विपक्षा-वृत्तित्वावच्छिन्नाभावयावद्रूपाधिकरणाप्रसिद्ध्याऽव्याप्तिरतस्तत्तद-धिकरणेति तथाच प्रातिस्विकरूपेण साध्याभावानुपादाय तत्तत्सजा-तीयास्तत्तदधिकरणवृत्तित्वाभावाग्राह्या इतिभावः । व्यधिकरणध-र्म्मावच्छिन्नसाध्याभावसजातीयं घटत्वादिना तदधिकरणवृत्तित्वा-भावमादाय व्यभिचारिण्यतिव्याप्ते र्व्वारणाय यावन्त (२) इति तथाच

यादृशस्थलविशेषे यादृशवस्तुविशेषे व्याप्तिभ्रमोऽप्रसिद्धस्तादृशाङ्कुरविशेषे ऽव्याप्तिरिति तादृशनिवेशासम्भवइति विभावनीयम् ।

इति श्रीअन्नदाचरणतर्कवागीशकृतप्रभाग्रन्थे
प्रगल्भलक्षणव्याख्या समाप्ता ।

---

(१) अत्र लक्षणे द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणाय प्रकृतहेतुसमानाधिकरणत्वस्य निरुक्ताभावे निवेशस्यावश्यकतया सर्व्वत्र सद्धेतौ व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकतया यावन्तो हेतुसमानाधिकरणा निरुक्तसाध्याभावास्तत्सजातियतदधि-करणनिरूपितवृत्तित्वाभाववत्त्वं व्याप्तिरित्यस्यैव सम्यक्त्वे प्रत्येकप-द-तत्तत्पदघटितलक्षणादरो व्यर्थः व्यभिचारिणितु यावत्साध्याभा-वसजातीयतादृशाभावाप्रसिद्ध्या ऽतिव्याप्त्यभावात् चेन्न हेत्वधि-करणत्वप्रवेशे सामान्यधर्म्मावच्छिन्नाधिकरणत्वानङ्गीकारे वह्निमान् धूमादित्यादावव्याप्तिरतो हेतुतावच्छेदकधर्म्मे यन्निष्ठाधिकरणतान-वच्छेदकत्वाधिकरणतावच्छेदकत्वोभयाभावस्तदेव हेत्वधिकरणम् वाच्यम् तथाच वह्निमान् धूमादित्यादौ तथाविधहेत्वधिकरणम् हृदादि एवञ्च प्रत्येकपदाद्यनिवेशे तद्दोषतादवस्थ्यमिति ध्येयम् (२) नन्वत्र यावत्पदस्य व्युत्क्रमेण व्यावृत्तिदानमयुक्तं सत्यं यावत्पदस्य

साध्याभावसजातीयस्य तदधिकरणवृत्तित्वसामान्याभावस्य तत्रा-
सत्त्वान्न दोषः । साध्यसामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणध-
र्म्मावच्छिन्नाभावो व्यभिचारिण्यप्यस्तीत्यतः सजातीया इत्युक्तं ननु
घटत्वेन निर्धूमवृत्तित्वस्याभावोऽप्यभावत्वादिना धूमसामान्याभाव-
सजातीय एव इत्यातिव्याप्तितादवस्थ्यमत आह साजात्यञ्चेति। यद्यपि
साध्याभावनिष्ठं यत्समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्व-
व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तेनैव साजात्यं
वाच्यं तथाच वह्निसामान्याभावनिष्ठं यत्तादृशान्यतररूपं वह्नित्वा-
वच्छिन्नप्रतियोगिताकत्वरूपं तस्य निर्व्वह्निवृत्तित्वाभावादावसत्त्वाद-
सम्भवः तथापि यावन्तः समानाधिकरणधर्म्मावच्छिन्नाभावास्तावद-
न्यतमत्व-तदभावान्यतररूपेण साजात्यं वाच्यमित्यदोषः (२) सम-
नियताभावानामैक्याद्गगणाभाव एव निखिलव्यधिकरणधर्म्माव-
च्छिन्नाभाव इति मतेतु गगणाभावत्व-तदन्यत्वान्यतररूपेणैव सा-

व्यावृत्तिं जानतः शिष्यस्य प्रथमतः प्रत्येकादिपदव्यावृत्तिजिज्ञासायां
श्यादौ प्रत्येकादिपदस्य व्यावृत्तिदानं ततस्तत्पदप्रत्येकपदयोः प्रवे-
शस्य फलं ज्ञात्वा शिष्यस्य यावत्पदं किमर्थमिति पुनर्जिज्ञासायां
पश्चाद्यावत्पदव्यावृत्तिरिति ध्येयम् । (३) अथात्र पूर्व्वक्षणवृत्तित्व-
विशिष्टस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्याभावोऽप्यस्ति तस्या-
भावः व्यधिकरणधर्म्मावच्छिन्नाभाव एव तस्यच पूर्व्वक्षणवृत्तित्व-
विशिष्टव्यधिकरणधर्म्मावच्छिन्नाभावाभावत्वरूपसमानाधिकरणध-
र्म्मावच्छिन्नप्रतियोगिताकत्वात् न समानाधिकरणधर्म्मावच्छिन्नप्र-
तियोगिताकभिन्नो व्यधिकरणधर्म्मावच्छिन्नाभाव इति तथाचोक्त-
युक्त्या व्यभिचारिण्यतिव्याप्ति श्चेन्न भाववृत्तिप्रतियोगितासमाना-
धिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावा यावन्तस्तावदन्यतमत्व-
तदभावान्यतरस्य विवक्षितत्वात् प्रकृतेच न तथा तद्धर्म्मस्याभाववृ-
त्तित्वात् अथवोक्तसमानाधिकरणधर्म्मे स्वनिरूपकाभावाभावत्वाति-
रिक्तत्वं निवेशनीयं स्वपदं प्रतियोगितापरं तथाच गगणाभावभि-
न्नमभावत्वादित्यादौ न काप्यनुपपत्तिरिति विभावनीयम् । केचित्तु
अभावाभावस्यातिरिक्तत्वात् व्यधिकरणधर्म्मावच्छिन्नाभावे न समा-
नाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमिति यथाश्रुतमेव सम्य-

जात्यं वाच्यं तेन घटत्वेन निर्धूमवृत्तित्वाभावस्यैव गगणत्वादिसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकतया धूमसामान्याभावसजातीयत्वेन नातिव्याप्तिः। (४) साध्याभावश्चेति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगित काभा--वोऽत्र साध्याभावपदेनोक्त इत्यर्थः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्वरूपप्रथमरीत्याभिधाने घटत्वविशिष्टवाच्यत्वाद्यभावस्यापि साध्याभावपदार्थतया तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य कुत्रापि हेतावसत्त्वादसम्भवः स्यादतस्तत्परित्यागः (५) अत्र साध्यव्यापकताघटकसम्बन्धेनैव साध्यव्यापकस्याभावोग्राह्य स्तेनैकसम्बन्धेन साध्यव्यापकस्य सम्बन्धान्तरावच्छिन्नाभाववति हेतोर्वृत्तावपि न क्षतिः। यत्तु साध्यतावच्छेदकसम्बन्धेनैव साध्यव्यापकत्वं तेनैव सम्बन्धेन साध्यव्यापकाभावोनिवेश्य इति मतं तत्तुच्छं यत्र तादात्म्येन प्रमेयमात्रं साध्यं तत्र तादृशसम्बन्धेन साध्यव्यापकतावच्छेदकं यत्प्रमेयत्वादिकं तादात्म्येन

गित्याहुस्तच्चिन्त्यं निरुक्तायास्तदन्यप्रतियोगिताया एव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वमित्यादिग्रन्थे ऽभावाभावस्य प्रतियोगिस्वरूपत्वस्वीकारेण तद्विरोधापातात्। (४) समनियताभावानामैक्यमते कथिततदभावस्य कुत्राप्यसत्त्वादप्रसिद्ध्या ऽसम्भवसम्भावना कथमतिव्याप्तिदानमिति चेन्न समानाधिकरणधर्म्मावच्छिन्नप्रतियोगितानिरूपितानुयोगित्वानि यावन्ति तावदन्यतम-तदभावान्यतररूपेण साजात्यविवक्षणान्नान्यतमाप्रसिद्धिस्तदभावस्य व्यधिकरणधर्म्मावच्छिन्नाभावत्वरूपानुयोगितायां प्रसिद्धेरिति केचित्तु गगणाभावस्याभावानङ्गीकारमते गगणे तत्प्रसिद्धिरित्याहुस्तन्न मनोरमं विषयितया गगणवद्भेदाभावस्य गगणस्वरूपत्वात्। (५) ननु स्वसमानाधिकरण स्वकीययत्प्रतियोगित्वाश्रयसामानाधिकरण्यम् तदन्यप्रतियोगिताकाभावस्य लक्षणघटकत्वस्वीकारे घटत्वविशिष्टवाच्यत्वाभावस्य यावदनन्तर्गतत्वान्नदोषः रूपत्वेन तद्रूपाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वेनोक्तव्याप्यवृत्तितानिरूपकत्वानिवेशोऽपि रूपवान् पृथिवीत्वादित्यादौ ना-

तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तत्र सद्धेतावव्याप्तेः प्रमेयत्वेन घट-पटोभयभेदस्वीकारेण कथञ्चित्तत्राव्याप्तिवारणसम्भवेऽपि वृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः किञ्चैवं धूमवान् वह्नेरित्यादावतिव्याप्तिः संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाद्यभावस्य तादृशयावदन्तर्गतत्वेन तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य वह्नौ सत्त्वात् अस्माकन्तु स्वरूपसम्बन्धेनायःपिण्डभेदस्यापि धूमव्यापकतया वह्नेस्तदभाववद्वृत्तित्वादेवातिव्याप्तिनिरासादिति ध्येयं। ननु कपिसंयोगि एतत्त्वादित्यत्राव्याप्तिः (६) कपिसंयोगसामान्याभावस्यापि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदन्तर्गतत्वात् त-

---

व्याप्तिरिति प्रथमरीत्यवलम्बने नकश्चिद्दोषइति चेन्न तथाविधोक्तौ लक्षणान्तरत्वात् केचित्तु एकधर्म्मावच्छिन्नप्रतियोगिताया ऐक्यमते धूमसामान्याभावीया या प्रतियागिता सैव धूमत्वेन प्रमेयाभावीया तथाच धूमाभावीयधूमत्वावच्छिन्नप्रतियोगिताया अप्युक्तव्याप्यवृत्तितानिरूपकत्वाभावेन धूमाभावादेर्लक्षणाघटकत्वेन व्यधिकरणधर्म्मावच्छिन्नाभावमादायातिव्याप्तिरिति यथाश्रुतमेवग्रन्थसङ्गतिरिति प्राहुः नच तथापि रूपवान् पृथिवीत्वादित्यादावव्याप्तिवारकोक्तप्रतियोगिवैयधिकरण्यघटकस्वावच्छेदकावच्छिन्नसामानाधिकरण्यमित्यत्र स्वावच्छेदकतायाः पर्य्याप्त्यनिवेशे घटत्वविशिष्टवाच्यत्वाभावस्य लक्षणाघटकत्वान्नासम्भव इतिवाच्यम् आधेयतासम्बन्धेन जलविशिष्टाभावमादायासम्भवसम्भवादिति। ननु वह्निमान् धूमादित्यादौ पर्व्वतत्वविशिष्टवाच्यत्वाभावादिरूपसाध्याभाववद्वृत्तित्व-पर्व्वतान्यसाध्याभाववद्वृत्तित्वोभयाभावमादाय लक्षणगमनसम्भवे ऽसम्भवोक्तिर्न सङ्गता इतिविभावनीयम्।

(६) ननु प्रतियोगिवैयधिकरण्यघटितव्यापकतास्वीकारेतु प्रमेयमित्याकारकयत्किञ्चिज्जन्यज्ञानीयविषयत्वाभावस्य यावदन्तर्गतत्वात्तत्सजातीयतदधिकरणवृत्तित्वाभावस्य हेतावसत्वादसम्भव एव स्यात् कथमव्याप्तिदानमिति चेन्न, हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितानिवेशस्यावश्यकत्वे संयोगसम्बन्धावच्छि-

त्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावभावादत आह व्याप्यवृत्तिश्चेति व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वं संयोगीसत्त्वादित्यादौ तु द्रव्यत्वादिसामान्याभावस्यापि साध्याभावतया हेतोस्तदधिकरणवृत्तित्वादेव नातिव्याप्तिः ननु रूपवान् पृथिवीत्वादित्यादावव्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावान्तर्गतत्वात् (७) तत्सजातीयस्य तदधिकरणवृत्तित्वसामान्याभावस्य हेतावसत्त्वात् सामान्यधर्म्मेण विशेषाभावस्वीकारेतु रूपत्वेन तत्तद्रूपाभावमादायाव्याप्तिरत आह प्रतियोगितावच्छेदके-

---

न्नवृत्तित्वस्याव्याप्यवृत्तित्वात् वह्निमान् धूमादित्यादौ लक्षणगमनात्। ननु कपिसंयोगाभावस्य केवलान्वयितया समनियताभावानामैक्यमते गगणाभावत्वमस्ति तदाधिकरणवृत्तित्वाभावस्यतु तदन्यत्वमिति गगणाभावत्व-तदभावान्यतररूपेण साजात्यं न सम्भवतीति कथमव्याप्तिश्चेन्न मूले वृक्षे न कपिसंयोगइति प्रतीतिवलात् वृक्षे कपिसंयोगाभावो मूलावच्छिन्नवृत्तिकः गगणाभावस्तु वृक्षे निरवच्छिन्नवृत्तिकइति कपिसंयोगाभावो न गगणाभावस्वरूपः, अवच्छिन्नवृत्तिकानवच्छिन्नवृत्तिकयोरैक्यस्यात्यन्तमसम्भवात्, अतः कपिसंयोगाभावे गगनाभावान्यत्वमस्ति, तादृशवृत्तित्वाभावेऽपि तदस्तीत्यव्याप्तिदानस्य सङ्गतत्वात्।

(७) ननु रूपत्वेन नित्यसमवेताभावमादायैव वह्निमान् धूमादित्यादावव्याप्तिसम्भवे रूपवान् पृथिवीत्वादित्याद्यनुधावनम् सन्दर्भविरुद्धमिति न देश्यं, साध्यतावच्छेदकसम्बन्धेन व्यापकता तत्सम्बन्धेन प्रतियोगिता इति मते वह्निमान् धूमादित्यादावव्याप्तिविरहात् एतदुभयमतेऽव्याप्तिप्रदर्शनपरोक्ताव्याप्तिकथनात्। यद्वा—आधेयताया अव्याप्यवृत्तित्वमते वह्निमान् धूमादित्यादावव्याप्तिर्न सम्भवतीत्यपि वदन्ति। वृत्तिमन्मात्रनिष्ठप्रतियोगित्वानिवेशो नित्याभाववारणसम्भवात् समवेतपर्य्यन्तानुधावनम्। नित्यसमवेतस्य जलीयपरमाणुरूपस्य व्याप्यवृत्तितया रूपत्वेन नित्यरूपसमवेताभावोऽवच्छिन्नवृत्तिकान्य एव इति तादृशाभावमादायाव्याप्तिर्द्दत्ता, अत्रच नित्यश्चासौ समवेतश्चेति कर्म्मधारयएव ननु नित्ये समवेत इति तत्पुरुष स्तथासति तादृशाभावस्यावच्छिन्नवृत्तिकान्यत्वस्या-

त्यादि। (८) प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरण-त्वञ्च यत्प्रातियोगिताकाभावे स्वावच्छदकसम्बन्धेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वं। (९) तेन नित्यरूपात्मकेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिना सामानाधिकरण्यविरहेप्युक्ताभावस्य न संग्रहः, नवा

सत्त्वान्न लक्षणघटकत्वं, पार्थिवपरमाणौ प्रलयावच्छेदेन तत्सत्त्वात्, अपरकालावच्छेदेन तदसत्त्वादिति विभावनीयम्।

[८] ननु रूपत्वेन तद्रूपाभावाधिकरणनिरूपितवृत्तितात्वेन जलवृत्तित्व--जलान्यतादृशसाध्याभाववद्वृत्तित्वोभयाभावमादाय नाव्याप्तिरिति ग्रन्थासङ्गतिरिति न युक्तं घटानुयोगिकसमवायेन पृथिवीत्वस्य हेतुत्वं बोध्यम्, तथाच गुणवृत्तित्वगुणान्यनिर्धूमवृत्तित्वोभयाभावमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वमात्रनिष्ठप्रतियोगिताकत्वस्य तादृशाभावे निविष्टतया उक्ताभावस्य लक्षणाघटकत्वात्। ननु तथापि पूर्वक्षणवृत्तित्वविशिष्टतादृशवृत्तित्वाभावमादाय नाव्याप्तिरिति कथं ग्रन्थसङ्गमनम्? अत्र केचित् तादृशाभावीयप्रतियोगितायां धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थं वैशिष्ट्यानात्मकत्वं निवेशनीयं तथाचोक्ताभावस्य लक्षणाघटकतया अव्याप्तिनिवारणसम्भावनाविरहात् न ग्रन्थासङ्गतिरित्याहुः, तन्न मनोरमं, एतल्लक्षणपरित्यागबीजप्रस्तावे पूर्वक्षणवृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्वात् गुणभिन्नं सत्वादित्यादावतिव्याप्तिप्रसङ्गाच्चेति जगदीशोक्तेरसङ्गत्यापत्तेः। नव्यास्तु शब्दस्य साध्यतायां तत्शब्दप्रतियोगिकसमवायेन तद्व्यक्तित्वेन एकक्षणमात्रवृत्तितत्शब्दस्य हेतुतायामव्याप्तिस्तत्शब्दप्रतियोगिकसमवायसम्बन्धावच्छिन्नवृत्तित्वस्य अपरक्षणवृत्तित्ववैशिष्ट्याप्रसिद्ध्या अपरक्षणवृत्तित्वविशिष्टतादृशवृत्तित्वाभावाप्रसिद्धेः, नच तादृशवृत्तित्वाभावस्यापि अव्याप्यवृत्तितया नाव्याप्तिरिति वाच्यं, अव्याप्यवृत्तिहेतुकव्यभिचारिण्यतिव्याप्तिवारणप्रकारस्यानुसरणीयत्वादित्याहुस्तद्विभावनीयम्।

[९] नन्वत्र समानाधिकरणदलं व्यर्थं, गगनेन वाच्यत्वाभावमादाय केवलान्वयिसाध्यकस्थले लक्षणगमनसम्भवात् चेन्न, तन्नाशोक्तौ मूलोपात्त "प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः"

वाच्यत्वत्वेन प्रमेयत्वाद्यभावस्यैव ज्ञेयत्वत्वेन वाच्यत्वाद्यभावतया व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणत्वेऽपि तदसंग्रहः, निरुक्ताया स्तदन्य प्रतियोगिताया एव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं तेन कपिसंयोगात्मकस्यैव साध्याभावस्य समवेतसामान्याभावनिष्ठ-निरुक्तप्रतियोगिताकत्व—कपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेऽपि कपिसंयोगाभाववान् वाच्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभावस्यैव नित्यरूपसामान्याभावतया नित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकत्व-साध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेपिच रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः समवेतसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छेद्यत्वादिति ध्येयं। द्वितीयरीतेः प्रवेशस्य फलमाह तत्तत्साध्यव्यक्तेरिति। अभाववति वृत्तावपि हेतोर्नाव्याप्तिरित्यन्वयः व्याप्यवृत्तित्वादेः फलमाह अव्याप्यवृत्तेर्व्वा साध्यस्येति पूर्व्ववद्योजना तत्तत्साध्याभावेत्यादि सामान्यतःसाध्याभाववद्वृत्तित्वत्वव्यापकइत्युक्तौ वह्निसामान्याभावसजातीयस्य व्यधिकरणधर्म्मावच्छिन्नाभावसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकाभावस्याप्रसिद्ध्या व्यतिरेकिमात्रे ऽव्याप्तिरतस्तत्तदिति (१०) साध्याभावस्य विशेषणं, तथाच निर्व्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्तत्र सा-

इत्यत्र प्रतियोगिपदं व्यर्थमेव, "अवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदकः" इत्यस्यैव सम्यक्त्वात्, तथाच मूलग्रन्थीयव्याख्यारक्षायै समानाधिकरणदलस्य यथासन्निवेशो वैयर्थ्यविरहेणोक्तत्वात्।

(१०) नन्वत्र वह्निमान् धूमादित्यादौ साध्याभाववद्वृत्तितात्वेन पर्व्वतवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयाभावमादायाव्याप्तिवारणसम्भवाद्व्यतिरेकिमात्रे ऽव्याप्तिदानमसङ्गतमिति चेन्न, धूमवान् वह्नेरित्यत्र जलवृत्तित्व-जलान्यवृत्तित्वोभयाभावमादायातिव्याप्तिवारणार्थमधद्यं साध्याभाववद्वृत्तित्वमात्रनिष्ठप्रतियोगिताकत्वेन तादृशवृत्ति-

ध्याभावसजातीयोऽस्तीत्यदोषः। नन्वेवमपि निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्व—वह्निभेदोभयाभावस्य जलवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्यच धूमाभावसजातीयस्य निरुक्तरूपशालिनो वह्नौ सत्त्वादतिव्याप्तिः नच व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वमिव स्वन्यूनवृत्तिधर्म्मानवच्छिन्नत्वमपि प्रतियोगितायां विशेषणं वाच्यमतो नोक्तदोषः, तथापि निर्धूमवृत्तितात्वेन जलवृत्तित्व—जलान्यनिर्धूमवृत्तित्वोभयाभावमादायातिव्याप्तितादवस्थ्यात्। (११) गुणभेदाभावसजातीयस्य पूर्व्वक्षणवृत्तित्वविशिष्टगुर्णसमवेतत्वाभावस्य हेतौ सत्त्वात् गुणभिन्नं सत्त्वादित्यादावतिप्रसङ्गाच्चेत्यत आह (१२) तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तसमामाधिकरणधर्म्मानवच्छिन्नप्रतियोगि—

त्वाभावो विशेषणीयः, तथाच पर्व्वतवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयाभावस्य लक्षणाघटकत्वात्। नच तथाप्युक्तोभयाभावस्य साध्याभाववद्वृत्तितामात्रनिष्ठप्रतियोगिताकत्वेन लक्षणघटकत्वसम्भव इति वाच्यं तादृशवृत्तितामात्रनिष्ठप्रतियोगिताकत्वविशिष्टाभावपदेन स्वविशिष्टतादृशवृत्तित्वाभावस्य विवक्षितत्वात्, वैशिष्ट्यञ्च स्वसाजात्य--स्वाधिकरणवृत्तितामात्रनिष्ठप्रतियोगिताकत्वोभयसम्बन्धेन स्वपदं साध्याभावपरं। उपाध्यायास्तु यद्भावप्रयुक्तउभयाभावस्तत्रैव प्रतियोगितास्वीकारे उक्तोभयाभावीया तादृशप्रतियोगिता न तादृश वृत्तितात्वव्यापिका, तथाच साध्याभाववद्वृत्तितात्वेन पर्व्वतवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयाभावमादाय कुतोऽव्याप्तिनिरासस्सम्भावना इत्याहु स्तन्न मनोरमं निर्धूमवृत्तितात्वेन जलवृत्तित्व-जलान्यनिर्धूमवृत्तित्वोभयाभावमादाय वक्ष्यमानातिव्याप्तिदानस्यासङ्गत्यापत्तेरिति ध्येयं।

(११) अत्र जलवृत्तित्वजलान्यवृत्तित्वोभयाभावमादायातिव्याप्तिसम्भवे निर्धूमपदं व्यर्थमिति चेन्न, तत्तदधिकरणवृत्तित्वमात्रनिष्ठत्वविशेषणदानादेव तादृशाभाववारणान्नातिव्याप्तिरतोनिर्धूमत्वोपादान मिति।

(१२) नन्वत्र तादृशाभावमादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिसम्भवे अत्रातिव्याप्तिदानमसङ्गतमिति चेन्न, व्याप्यवृत्तित्वविशेष-

१३

ताको वा बोध्यइत्ययं पाठः काचित्कः, तत्रातिरिक्तान्तेन निर्व्वह्नि-वृत्तित्वसामान्याभावादेः संग्रहः, अन्यथा वह्निसामान्याभावसजातीयस्य समानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्या ऽव्याप्तिप्रसङ्गात्। नच निर्धूमत्वादिसजातीयस्य निर्धूमवृत्तित्वत्वादिना वह्न्यवृत्तेरभावस्य हेतौ सत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः, हेतुताघटकसम्बन्धावच्छिन्नवृत्तित्वमात्रनिष्ठत्वेन प्रतियोगितायां विशेषणीयत्वे ऽपि निर्धूमवृत्तित्वत्वेन जलवृत्तित्व-जलान्यनिर्धूमवृत्तित्वोभयाभावमादायातिव्याप्तितादवस्थ्यमिति वाच्यं, एतदस्वरसेनैव यद्वेत्यादिलक्षणान्तरस्य वक्ष्यमानत्वात्। यद्यपि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्यस्यैव सम्यक्त्वे समानाधिकरणधर्म्मादिकं प्रक्षिप्य निषेधद्वयप्रवेशो व्यर्थः, सर्व्वत्र व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्यैव तादृशसाध्याभावसजातीयस्य सम्भवात्तथापि यथासन्निवेशान्न वैयर्थ्यं। यत्र तादात्म्यसम्बन्धेन हेतुता तत्र सद्धेतौ व्यधिकरणधर्म्मावच्छिन्नाभाववत्तादात्म्यस्य जगत्स्वरूपतया तादृशतादात्म्यत्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिद्ध्या ऽव्याप्तिः स्यादतोवा निषेधद्वयगर्भता [१३] यत्तु तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्युक्तावसम्भवः स्यात् व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः तादृशाभाववृत्तित्वत्वमपेक्ष्य लघोर्वृत्तित्वत्वमात्रस्यैव उक्ताभावप्रतियोगितावच्छेदकत्वादिति तत्तुच्छं गुरोः प्रतियोगितावच्छेदकत्वमङ्गीकृत्यैव लक्षणकरणात् अन्यथा महाकालभेदे साध्ये जन्यत्वविशिष्टघटादेः कालिकसम्बन्धेन हेतुतायामव्याप्तिप्रसङ्गात् महाकालभेदाभाववद्वृत्तित्वणेनैव तत्रातिव्याप्तिवारणसम्भवात्, नचात्रापि वारणसम्भव इति वाच्यं इत्यस्वरसेनैव काचित्कमित्युक्तमिति।

(१३) सामान्यधर्म्मेण विशेषाभावानङ्गीकर्त्तृमतएवेद मन्यथा तादृशतादात्म्यत्वेन घटाभाव मादाय लक्षणसमन्वयाद्ग्रन्थासङ्गतिः

त्वमपेक्ष्य लघुना वृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगिताया अवच्छेदान्महाकालभेदाभावसजातीयस्य तद्वद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धेरिति ध्येयं। तादृशवृत्तित्वत्वव्यापकेत्यस्य प्रयोजनमाह साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्येति। अभावमादाय नातिप्रसङ्ग इत्यन्वयः। ननु व्यभिचारनिरूपकाधिकरणव्यक्त्यन्यत्वाभावस्यापि साध्याभावतया तद्वद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यसत्त्वात् कुतो ऽतिव्याप्तिरित्यत आह पार्थिवत्वादीति। पार्थिवत्वादिविशिष्टं यन्निर्धूमवृत्तित्वं तद्वह्नौ नास्ति वह्नेरपार्थिवत्वादित्यतिप्रसङ्ग इति भावः आदिना जलत्वादिसंग्रहः व्यासज्यवृत्तिधर्म्मानवच्छिन्नेत्यस्य प्रयोजनमाह द्वित्वावच्छिन्नस्येति निर्धूमवृत्तित्व-वह्निभेदोभयत्वाद्यवच्छिन्नस्येत्यर्थः न दोष इति अन्यथा निर्वह्निसंयुक्तत्वाभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावान्निर्वह्निवृत्तित्वसामान्याभावस्य च धूमे ऽसत्त्वादव्याप्तिरेव स्यादिति भावः। इत्थञ्चेति वृत्तित्वस्य हेतुतावच्छेदकसम्बन्धेन उक्तौचेत्यर्थः तादृशसम्बन्धेन हेत्वधिकरणतात्वप्रवेशे गौरवमतः कस्यचिदित्युक्तं तथाच हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतावद्वृत्तित्वं साध्याभावे विशेषणमित्यर्थः। सत्त्वादित्यादावित्यादिपदेन वह्निमान् धूमादित्यादिपरिग्रहः। तत्रापि जातिसामान्याभावादेः साध्याभावतया तद्वति संयोगेन वृत्तेरप्रसिद्धेरव्याप्तिसम्भवात्। ननु द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिर्विशिष्टसत्त्वस्य सत्तानतिरिक्तत्वेन द्रव्यत्वाभाववति वृत्त्या

निषेधद्वयप्रवेशे तु गगणादिरूपेण तादृशतादात्म्याभावमादाय लक्षणसमन्वय इति भावः। एवं समनियताभावानामैक्यानङ्गीकारमतेनेदं अन्यथा तन्मते गगणाभावत्व-तदभावान्यतररूपेण साजात्यविवक्षणात् गगणाभावरूप-तादात्म्येन यावान्नेत्याकारकाभावमादायाव्याप्त्यसम्भवादुग्रन्थालग्नकत्वापत्तिः प्रकृते तु समानाधिकरणधर्म्मावच्छिन्नाभावा यावन्तस्तावदन्यतमत्व-तदभावान्यतर-

द्रव्यत्वाभावसजातीयस्य तद्वद्वृत्तित्वाभावस्य हेतावसत्वात् नचैवं विशिष्टहेत्वधिकरणे वर्त्तमान एव साध्याभावो गृह्यतां तावतैव उक्तदोषव्युदासादिति वाच्यं [१४] तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिर्निर्धूमवृत्तित्वसामान्याभावस्यापि महानसीयवह्नौ सत्वात् नच हेतुतावच्छेदकधर्म्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितं तथापि निर्धूमवृत्तितात्वेन जलवृत्तित्व—जलान्यनिर्धूमवृत्तित्वोभयाभावसत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्ते र्महागौरवापत्तेश्चेत्यत आह यद्वेति [१५] वह्नित्वावच्छिन्नधूमाभावसजातीयस्य तद्व्यापकीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वावच्छिन्नं प्रति व्यापकतावच्छेदाद्व्यभिचारिण्यतिव्याप्तिरतो यावन्त इति तथाच धूमादिसामान्याभावस्यापि साध्याभावत्वात्तद्व्या-

---

रूपेण साजात्यविवक्षणान्न तादात्म्येन यावान्नेत्याकारकाभावमादाय प्रसिद्धिस्तत्रव्यधिकरणधर्म्मावच्छिन्नाभावसाजात्यविरहादिति ध्येयम्।

(१४) नन्वत्र द्रव्यत्वाभाववद्वृत्तितात्वेन तद्रूपनिरूपित तद्रूपत्वनिष्ठवृत्तित्व--तद्रूपान्यद्रव्यत्वाभाववद्वृत्तित्व एतदुभयाभावमादाय लक्षणगमनसम्भवे विशिष्टहेत्वधिकरणवृत्तित्वविशेषणं व्यर्थमिति चेन्न सत्ताप्रतियोगिक समवायेन हेतुत्वात् तथाच हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमात्रनिष्ठप्रतियोगिताकत्वविरहादुक्ताभावस्य लक्षणाघटकत्वादिति। अथ यद्यपि अभावस्य हेत्वधिकरणवृत्तित्वं विवक्षितं तदा सद्धेतुस्थले साध्यसामान्याभावस्य लक्षणाघटकत्वाल्लक्षणे कथिततत्तत्पदस्य प्रत्येकपदस्य च वैयर्थ्यमिति तथापि सामान्यधर्म्मावच्छिन्नाधिकरणत्वमस्वीकृत्यैव लक्षणमिदं एवञ्च हेतुतावच्छेदकधर्म्मे यन्निष्ठाधिकरणतानवच्छेदकत्व-सामान्यतोऽधिकरणतावच्छेदकत्वोभयाभाव स्तथाविधव्यक्तिरेव हेतुतावच्छेदकावच्छिन्नाधिकरणं तथाच तादृशहेत्वधिकरणे घटादौ वह्निसामान्याभावस्य सत्वान्न वैयर्थ्यमिति ध्येयम्।

(१५) नन्वत्र उक्तव्याप्यवृत्तित्वनिवेशेऽतिव्याप्तिवारणसम्भवे वक्ष्यमाणापेक्षया गौरवमत आह मैत्यादि इति दिक्।

पक्षीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकेन धूमत्वादिना वह्न्यादिकं प्रति व्यापकत्वाभावान्नातिप्रसङ्गः। तत्तद्वह्न्यभावसजातीयस्य तद्व्यापकीभूताभावस्य प्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना धूमादिकं प्रति व्यापकत्वाभावादसम्भव इत्यत स्तादृशाभावा इति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावा इति तदर्थः। तत्तद्वह्नित्वादिकन्तु न साध्यव्यापकतावच्छेदकमतस्तदवच्छिन्नाभावमादाय नोक्तदोषः तादृशयावत्साध्याभावसाजात्यं तादृशयावत्साध्याभाववृत्तिप्रागुक्तान्यतररूपवत्वं तच्च व्यतिरेकिण्यप्रसिद्धमतः प्रत्येकमिति यद्यपि तादृशयावत्साध्याभावानां प्रत्येकनिरूपित मपिसाजात्यं न कुत्राप्यभावे ऽस्तीति व्यतिरेकिण्यव्याप्तितादवस्थ्यं तथापि तेषामित्यत्र तस्यतस्येत्येकशेषकरणाद् यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयस्य तद्व्यापकीभूताभावस्य लाभाददोषः धूमादिसामान्याभावव्यापकस्य वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाद्व्यभिचारिण्यतिव्याप्ति रतः सजातीयस्येति। साजत्यन्तु प्रागुक्तदिशा ग्राह्यं तेन संयोगादिसम्बन्धावच्छिन्नगगणाभावात्मकद्रव्यत्वाद्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना वह्न्यादिव्यापकत्वेऽपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिः तादृशाभावस्यापि धूमादिसामान्याभावसाजात्यविरहादिति ध्येयं (१) धूमादिसामान्याभावसजातीयस्य तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकतया तद्व्यापकीभूतस्य वह्निसंयोगाद्यभावस्यच प्रतियोगितावच्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रति

---

[१] नन्वत्र लक्षणे समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्व-व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साजात्योक्तावपि व्यभिचारिणि व्यभिचारिस्थलान्यत्वाद्यभावस्य तादृशयावदन्तर्गतत्वात् तादृशाभावमादाय नातिव्याप्तिसम्भावना। नवा वह्निमान् धूमादित्यादौ वह्न्यभावसजातीयवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वादिना धूमादिव्यापकत्वसत्त्वात् प्रागुक्तलक्षण इवा-

व्यापकत्वादतिव्याप्तिरतोऽव्याप्यवृत्तेरिति वस्तुतो वह्नित्वेन धूमवद्वृत्तेरभावस्यैव प्रतियोगितावच्छेदकेन वह्नित्वेन वह्निं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तितानिरूपकप्रतियोगितालाभाय व्याप्यवृत्तिपदं (२) तेन यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसमानाधिकरण्य-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया एव लक्षणघटकत्वात् नोक्तदोषः धूमाद्यभावसजातीयस्य वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्न्यादिकं प्रति व्यापकत्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिरतो

सम्भवस्य सम्भावना। तथाच साजात्यन्तु प्रागुक्तचरमदिशा ग्राह्यमिति ग्रन्थासङ्गति श्चेन्न व्यापकीभूतइति दलस्य व्याप्यवृत्तिदलस्यच व्यर्थतापत्तेः। धूमवान् वह्नेरित्यत्र धूमाभावनिष्ठं यद्धूमत्वावच्छिन्नप्रतियोगिताकत्वं तस्यच वह्न्यभावे असत्त्वात् धूमाभावसजातीयवह्न्यभावमादायातिव्याप्त्ययोगादिति चिन्त्यम्। यद्यपि कालिकसम्बन्धेन धूमत्वादेर्वह्निव्यापकतावच्छेदकत्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिभिया अवश्यं स्वप्रतियोगितावच्छेदकसम्बन्धेन व्यापकत्वं वाच्यं तथाच संयोगेन द्रव्यत्वाभावमादाय न दोषः संयोगेन द्रव्यत्वत्वेन धूमव्यापकत्वाभावात् तथापि समनियताभावानामैक्यात् समवायेन द्रव्यत्वत्वेन घटाद्यभावस्यापि संयोगेन द्रव्यत्वाभावस्वरूपतया स्वप्रतियोगितावच्छेदकः सम्बन्धः समवायोऽपीति ध्येयम्।

ननु वह्निमान् धूमादित्यादावव्याप्तिवारणार्थं यद्रूपावच्छिन्नम् प्रति व्यापकत्वमवच्छिद्यते इत्यत्र व्यापकत्वं प्रतियोगिवैयधिकरण्यघटितमवश्यं वाच्यं अतएव वह्निसंयोगाद्यभावमादायातिव्याप्तिवारणाय व्याप्यवृत्तित्वदलस्य स्वार्थक्यसम्पादनमपि साधु सङ्गच्छते तथाच सति द्रव्यत्वत्वस्य संयोगसम्बन्धावच्छिन्नाधेयतावच्छेदकत्वाभावात् वह्न्यादिव्यापकतावच्छेदकत्वविरहेण नातिव्याप्तिरिति ग्रन्थासङ्गति रत्रकेचित् गौरवेण व्यापकतायां तत्सम्बन्धावच्छिन्नाधेयतावच्छेदकत्वमत्र न निविष्टमित्याहुः।

[२] अत्र व्यापकत्वदलस्य व्यावृत्तिं प्रथमतो ऽनालोच्य व्यतिक्रमेण व्याप्यवृत्तित्वदलस्य व्यावृत्तिः कथं दर्शितेति चेन्न तद्घटाभिन्नं घट-

व्यापकीभूतस्येति यद्यपि व्यभिचारिस्थलान्यत्वाभावस्यापि निरुक्त-साध्याभावतया तत्तत्समानाधिकरणस्य तत्तत्सजातीयाभावस्य प्रतियोगितावच्छेदकेन धर्म्मेण तत्तदयोगोलकभेदत्वादिना वह्नित्वावच्छिन्नं प्रति व्यापकत्वाभावात् सामानाधिकरण्यमात्रोक्तावपि नातिव्याप्तिः तथापि साध्याभावव्यापकत्वघटितनिरुक्तौ साध्याभावसजातीयाभावे समानाधिकरणस्याप्रविष्टतया न व्यापकीभूतपर्य्यन्तस्य व्यर्थतेति ध्येयं। यत्तु साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया यदवच्छेदकं तेनैव सम्बन्धेन तद्रूपावच्छिन्नाभावोऽत्र साध्याभावपदार्थः तथाचायोगोलकभेदत्वस्य न संयोगात्मकसाध्यतावच्छेदकसम्बन्धेन धूमव्यापकतावच्छेदकत्वमिति तदवच्छिन्नाभावो न साध्याभावः किन्तु धूमाद्यभावएव तत्समानाधिकरणस्यच वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वावच्छिन्नं प्रति व्यापकत्वादतिव्याप्तिरतः समानाधिकरणस्येत्यपहाय व्यापकीभूतस्येत्युक्तं नचैवं वह्निमान् धूमादित्यादावव्याप्तिः संयोगेन वह्न्यभावस्यापि साध्याभावतया तस्य केवलान्वयित्वेन तत्सजातीय-तद्व्यापकीभूत-व्याप्यवृत्त्यभावाप्रसिद्धेरिति वाच्यं। यावन्तो व्याप्यवृत्तयः साध्याभावास्तेषामेव प्रवेश्यतया वह्निसामान्याभावस्यच निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वरूपव्याप्यवृत्तित्वविरहेण यावदनन्तर्गतत्वात्। (३) धुमाभावस्तु वह्निमत्ययोगोलकएव ताद्दशव्याप्यवृत्तिरिति तन्न तादात्म्येन प्रमेयमात्रस्य साध्यतायामव्याप्तेस्तत्र प्रमेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया ता-

त्वादित्यादिस्थलविशेषे व्यापकत्वानिवेशेपि व्याप्यवृत्तित्वनिवेशादतिव्याप्तिविरह इत्यावेदयितुं व्यतिक्रमेण व्यावृत्तिरिति चिन्त्यम्।

[३] नन्वत्र वह्न्यभावस्य लक्षणाघटकत्वेपि वह्नित्वेन पर्व्वतवृत्त्यभावस्य ताद्दशव्याप्यवृत्तिसाध्याभावान्तर्गततया तस्य केवलान्वयित्वात् तत्सजातीयतद्व्यापकीभूतव्याप्यवृत्तितानिरूपकप्रतियोगिताकताद्दशाभावाप्रसिद्धेरिति चेन्न ताद्दशव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायाः धर्म्मविशिष्टान्यत्वनिवेशात् तदभावो

दात्म्येन तदवच्छिन्नाभावाप्रसिद्धेः। अन्येतु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठं यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं तत्तत्साध्याभावव्यापकतावच्छेदकं तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमर्थः तत्रच साध्याभावव्यापकतावच्छेदकत्वमपहाय साध्याभावसमानाधिकरणवृत्तित्वोक्तौ गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावादित्यत्रातिव्याप्तिः गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्यान्यत्वाद्यभावरूपस्य वा निरुक्तसाध्याभावस्य सजातीये समानाधिकरणे च सत्तास्वरूपे अभावे वर्त्तते यद् द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्म्मावच्छिन्नप्रतियोगिताकाभावत्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्म्मेण हेतुतावच्छेदकावच्छिन्नं प्रति व्यापकतावच्छेदात्। (४) साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावत्वादिकं न गुणान्यत्वविशिष्टसत्ताभावा-

---

न तादृशसाध्याभावान्तर्गतइति कुतः वह्नित्वेन पर्व्वतवृत्यभावमादायाप्रसिद्धिनिबन्धनाव्याप्तिः प्रतियोगितायां धर्म्मवैशिष्ट्यन्तु स्वावच्छिन्नत्व-स्वसामानाधिकरण्य-स्वभिन्नत्वैतत्त्रितयसम्बन्धेनेति चिन्त्यम्। अत्र निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वपदेन हेत्वधिकरणे अवच्छिन्नवृत्तिकान्यत्वरूपोर्थो ग्राह्यस्तेन सत्तावान् जातेरित्यादौ सत्ताभावोपि लक्षणघटकस्तथाच सत्ताभाव-व्यधिकरणधर्म्मावच्छिन्नाभावसाधारणसजातीयाभावाप्रसिद्ध्या अव्याप्तिवारणाय प्रत्येकपदमपि सार्थकं भवति अन्यथा सद्धेतुस्थले व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकतया तत्साजात्याप्रसिद्ध्याऽव्याप्तिविरहात् व्यर्थमेव प्रत्येकपदादिकमिति ध्येयम्।

[४] ननु गुणान्यत्वविशिष्टसत्तावान् द्रव्यान्यत्वविशिष्टसत्वादित्यत्र गुणान्यत्वविशिष्टसत्ताभावात्मकसाध्याभावसमानाधिकरणे उक्ताभावे सत्ताभावत्वेन द्रव्यान्यत्वतिशिष्टसत्तात्वरूपयद्धर्म्मावच्छिन्नप्रतियोगिताकाभावत्वं वर्त्तते तद्रूपस्य हेतोर्व्यापकतावच्छेदकत्वादतिव्याप्तिसम्भवे साध्यांशे हेत्वंशे चाभावनिवेशनम् किमर्थं चेन्न अभावस्यातिरिक्तत्वमताश्रयणात् उक्ताभावे सत्ताभा-

भावात्मकस्य द्रव्यान्यत्वाभावरूपस्य वा साध्याभावस्य व्यापकतावच्छेदकं द्रव्यएव व्यभिचारादतोनोक्तदोष इति प्राहुः। द्रव्यं वि-

---

षसाध्यकद्रव्यान्यत्वविशिष्टसत्तादिहेतुकस्थलेऽतिव्याप्तिसम्भवे साध्यांशे विशिष्टनिवेशनम् न मनोरमं इति न देश्यं। हेतोः साध्यत्वे साध्यस्यच हेतुत्वे इत्युभयस्थलएवातिव्याप्तिसूचनाय साध्यांशे विशिष्टत्वनिवेशात्। ननु तथापि धूमाभावस्य सजातीयः समानाधिकरणो यः सत्तारूपोऽभावस्तन्निष्ठं यद् द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं तदादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिसम्भवे स्थलान्तरानुधावनं कथं न सन्दर्भविरुद्धं सत्यं तादृशसाध्याभावसजातीयाभावे यदि साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वं किम्वा हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वं निविशते तदा धूमवान् वह्नेरित्यत्र नातिव्याप्तिः किन्त्वत्रैवेत्यावेदयितुं प्रसिद्धस्थलत्याग इति। ननु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयाभावनिष्ठयद्रूपावच्छिन्नाभावत्वं तत्तत्साध्याभावाधिकरणनिरूपितवृत्तितावच्छेदकमित्यर्थे नातिव्याप्तिः कथं व्यापकत्वाद्यनुधावनं चेन्न सामान्यधर्म्मावच्छिन्नाधिकरणत्वास्वीकारे पारिभाषिकादरे लाघवानवकाशादिति। अत्र व्यापकतावच्छेदकत्वनिवेशेपि धूमवान् वह्नेरित्यादावतिव्याप्तिः तथाहि धूमाभावसजातीयो यो वह्नित्वेन धूमवद्वृत्तेरभावो वह्निसंयोगाभावश्च तन्निष्ठं यद् वह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वं तस्य साध्याभावव्यापकतावच्छेदकतया वह्नित्वादिरूपेण वह्नित्वावच्छिन्नं प्रति व्यापकतावच्छेदात् तद्वारणार्थं यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्य-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं निविशते तदा सत्तारूपाभावे वर्त्तते यद् द्रव्यान्यत्वविशिष्टसत्त्वाभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं तस्य निरुक्तप्रतियोगिताकत्वविरहेण लक्षणाघटकतया गुणान्यत्वविशिष्टसत्त्वाभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावादित्यादावतिव्याप्तिविरहेण कृतं व्यापकत्वनिवेशेनेति चेन्न गगणाभावभिन्नं घटाभावत्वादित्यत्र गगणाभावात्मकगगणाभावभेदाभावरूपसाध्याभावस्य यावदन्तर्गततया लक्षणघटकत्वेन तत्सजातीय-तद्व्यापकीभूत-तादृशव्याप्य-

शिष्टसत्त्वादित्यादौ व्यापकीभूततादृशाभावप्रतियोगितावच्छेदकेन गुणत्वादिना सत्त्वादिकं प्रति व्यापकतानवच्छेदादव्याप्तेराह यद्रूपावच्छिन्नं प्रतीति नचेदं गमनं स्पन्दत्वादित्यादौ तादृशस्य गतित्वाभावस्य प्रतियोगितावच्छेदकीभूतगतित्वत्वादिनापि कालिकसम्बन्धेन स्पन्दत्वव्यापकत्वादतिव्याप्तिरिति वाच्यं तादृशाभावस्य यत्प्रतियोगिताया अवच्छेदको धर्मस्तत्प्रतियोगितावच्छेदकसम्बन्धेन हेतुव्यापकत्वस्योक्तत्वादिति भावः॥ परैः परिष्कृतं निरासितुमाह साधनस्येत्यादिना तादृशेति यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयतद्व्यापकीभूताभावेत्यर्थः। तदवच्छेदकत्वं वेति तत्तत्साध्याभावसजातीयतद्व्यापकीभूताभावप्रतियोगितावच्छेदकत्वं वेत्यर्थः प्रथमे दूषणमाह द्रव्यमित्यादि तादृशाभावेति साध्याभावसजातीयतद्व्यापकीभूताभावेत्यर्थः। द्वितीये दूषणमाह प्रमेयत्वादेरिति नच सामान्यधर्म्मेण विशेषाभावस्यापि व्यवस्थापितत्वात् प्रमेयत्वेन गगनाभावस्यैव प्रागुक्तक्रमेण साध्याभावसजातीयस्य प्रतियोगितावच्छेदकं प्रमेयत्वमादाय नाव्याप्तिरिति वाच्यं वह्नित्वेन महानसीयवह्न्यभावमादाय धूमसाध्यकवह्नावतिव्याप्तिभिया स्वाधिकदेशवृत्तिधर्म्मानवच्छिन्नाया एव प्रतियोगितायाः प्रवेश्यत्वात् प्रमेयत्वेन

वृत्त्यभावाप्रसिद्ध्याऽव्याप्तिः। नच गगनाभावनिष्ठप्रतियोगित्वस्वरूपाभावमादाय न दोष इति वाच्यं तस्यापि गगणाभावस्वरूपत्वात् अतस्तादृशव्याप्यवृत्तित्वं न वक्तव्यं अपितु यत्प्रतियोगिताकाभावस्वरूपानुयोगितायां स्वावच्छेदकावच्छिन्नाधिकरणनिरूपितवृत्तितावच्छेदकत्व-व्यधिकरणधर्म्मावच्छिन्नप्रतियोगित्वानिरूपकत्वोभयाभावस्तादृशयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वमेव लक्षणे निवेशनीयं। तथाच गगणाभावभेदत्वरूपयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वमादाय नाव्याप्तिः गुणान्यत्वविशिष्टसत्त्वाभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावादित्यत्र द्रव्यान्यत्वविशिष्टसत्ताभावरूपयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वमादायोक्तातिव्याप्तिवारणाय व्यापकतावच्छेदकत्वमुक्तमिति ध्येयम्।

गगनाद्यभावप्रतियोगितायाश्चातथात्वात् विषयत्वापेक्षया गुरोः प्रमाविषयत्वस्य प्रतियोगितानवच्छेदकत्वेन प्रोक्ताव्याप्तितादव-स्थ्यादिति भावः। (५) नव्यास्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयो यस्तत्तत्समानाधिकरणो व्याप्यवृत्त्यभावस्तत्प्रतियोगित्वमेव व्याप्तिः। व्याप्यवृत्तित्वन्तु प्रकृतहेतुसामानाधिकरण्य-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वं तेन धूमसामान्याभावसमानाधिकरणस्य तत्सजातीयस्यच वह्निधूमोभयत्वावच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्यकवह्न्यादौ नातिव्याप्तिः तादृशोभयाभावस्य निरुक्तव्याप्यवृत्तित्वाभावात्। एवञ्च यत्राभावे प्रकृतसाध्यसामानाधिकरण्य—व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्याभावपदार्थस्तेनाभाववान् प्रमेयत्वादित्यादौ घटं-साध्यप्रतियोगिकस्य घटावृत्तित्वावच्छिन्नाभावस्यापि घटादौ वर्त्तमानस्य तत्सजातीयहेत्वभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धावपि नाव्याप्तिः। (६) इत्थञ्च द्रव्यं सत्त्वादित्यादौ गुणान्यत्वाद्यभावस्यापि

---

(५) ननु धूमवान् वह्नेरित्यादौ वह्नित्वे स्वनिरूपकाभावीयप्रति-योगितातिरिक्तवृत्तित्वरूपस्वाधिकदेशवृत्तिधर्म्मत्वाभावेन वह्नित्वेन वह्नि-महानसीयवह्न्युभयाभावमादायातिव्याप्तिः न चोभयाभावीयप्र-तियोगिता प्रत्येकपर्य्यवसन्ना उक्तरीतिश्चादरणीया तथासति उक्ता-भावस्यैव महानसीयवह्निनिष्ठं अपरञ्च महानसीयवह्नीतरवह्नि-निष्ठं प्रत्येकप्रतियोगिताया एव अधिकदेशवृत्तिधर्म्मत्वस्य वह्नित्वे सत्त्वात् उक्ताभावस्य लक्षणाघटकत्वमिति वाच्यं वह्निमान् वह्नि-धूमोभयस्मादित्यत्र प्रतियोगितायाः प्रत्येकपर्य्यवसितत्वे उक्तरीत्या हेत्वभावस्य लक्षणाघटकतया ऽव्याप्तेः अत्र समाधानं स्वाधिकदे-शवृत्तिधर्म्मानवच्छिन्नत्वपदेनप्रागुक्तव्याप्यवृत्तितानिरूपकत्वमेव व-क्तव्यं तथाच प्रमेयत्वेन गगनाभावीयप्रतियोगिताया अप्यतथात्वान्न दोष इत्यतोदोषान्तरमाह विषयत्वापेक्षयेत्यादिना अस्माकन्तु गु-रुधर्म्मस्य प्रतियोगितानवच्छेदकत्वेपि तादृशाभावप्रतियोगिताव-च्छेदकीभूतविषयत्वादिनैव ज्ञेयत्वादिव्यापकत्वात् केवलान्वयिनि लक्षणसङ्गतिः। (६) अथात्र धूमवान् वह्नेरित्यत्र अयोगोलकान्य-

निरुक्तसाध्याभावत्वात्तदधिकरणे गुणादौ वर्त्तमानस्य तत्सजातीयाभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धयैव नातिव्याप्तिः। वाच्यं प्रमेयादित्यादौ तु व्यधिकरणधर्म्मावच्छिन्नवाच्यत्वाभावसमानाधिकरणस्य विरुद्धघटत्वपटत्वाभ्यां प्रमेयाभावस्य घटत्वादिना वाच्यत्वाद्यभावस्य वा निरुक्तव्याप्यवृत्तिताशालिनः प्रतियोगितामादाय लक्षणसम्भव इति यथाश्रुतमेव मिश्रलक्षणं सम्यगिति प्रतीमः। व्यापकीभूतस्य सजातीयस्येत्यादिपरित्यागेन लघुलक्षणमाह यद्वे-

---

त्वाभावाधिकरणे अयोगोलके यत्किञ्चिद्देशावच्छेदेन वह्न्यभावस्य सत्त्वात् अयोगोलकान्यत्वाभावमादायापि नातिव्याप्तिवारणसम्भवः। अतस्तत्तत्समानाधिकरणपदेन तत्तदधिकरणनिरूपितनिरवच्छिन्नवृत्तिमत्त्वं वाच्यं तथाचावश्यं तत्तदयोगोलकान्यत्वाभावस्य धर्त्तव्यतया साध्याभावश्च पूर्व्वोक्तद्वितीयरीत्या वक्तव्यः। एवञ्चेत् घटावृत्तित्वस्य साध्यव्यापकतावच्छेदकत्वाभावात् घटावृत्त्यभावस्य लक्षणाघटकतया कथमभाववान् मेयत्वादित्यादौ साध्यप्रतियोगिकस्य घटावृत्त्यभावस्येत्यादिग्रन्थसङ्गतिरिति न देश्यं जगदीशोक्तघटाभावपदेन अभावत्वेन वाच्यत्वत्वेन वा घटावृत्त्यभावस्य विवक्षितत्वात्। ननु तथापि वह्निमान् धूमादित्यादावभावत्वेन वाच्यत्वत्वेन वा तत्तत्पर्व्वतावृत्त्यभावमादायाव्याप्तिसम्भवे अभावसाध्यकानुसरणं किमर्थं नच साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया निवेशात् तादृशाभावस्य लक्षणाघटकत्वमिति वाच्यं धूमवान् वह्नेरित्यत्रातिव्याप्त्यापत्तेरिति चेन्न साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व-साध्यवद्वृत्त्यभावीयत्वोभयाभावस्य प्रतियोगिताया निवेशात् वह्निमान् धूमादित्यादावव्याप्त्यभावात् इति॥ अथ द्रव्यं कपिसंयोगादित्यादावव्याप्तिः कपिसंयोगाभावस्याव्याप्यवृत्तित्वेन साधने तादृशाभावप्रतियोगित्वाभावादिति चेन्न उक्तहेतुसामानाधिकरण्य-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभावघटकहेतुसामानाधिकरण्यपदेन हेत्वधिकरणनिरूपितनिरवच्छिन्नवृत्तित्वस्य विवक्षणादुक्तस्थले कपिसंयोगाभावे उक्तहेतुसामानाधिकरण्याभावेन तादृशोभयाभावस्याद्रव्यत्वभावस्यापि लक्षणघटकतयाऽव्याप्त्यनवकाशादिति विभा-

स्यादि ताद्दशा इति । प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्र-
तियोगिताका अभावा इत्यर्थः । अत्रापि यत्सम्बन्धेन साध्यव्याप-
कता तत्सम्बन्धावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्म्मैस्तत्-
सम्बन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यतइति पर्य्यवसि-
तार्थः तेन गमनं स्पन्दत्वादित्यादौ गमनत्वत्वाद्यवच्छिन्नाभावप्रति-
योगितावच्छेदकैर्गमनत्वत्वादिभिः कालिकसम्बन्धेन स्पन्दत्वादिहे-

---

घनीयम् । केचित्तु समवेताभावमादायाव्याप्तिर्वारणीयेति प्राहुः ।
अथ साध्यसामानाधिकरण्य-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्न-
त्वोभयाभाववन्तो यावन्तः साध्याभावा यद्धर्म्मावच्छिन्नसामानाधि-
करण्य--व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभाववन्तस्तद्ध
र्म्मवत्त्वमेव व्याप्ति रुच्यतां तथाच सजातीयत्व-सामानाधिकरण्य-
घटितलक्षणं गौरवग्रस्तमिति । अत्र केचित्ताद्दशोभयाभावघटक-
व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वमुभयत्र विफलं केवलान्व-
यिस्थले अवृत्तिगगनस्वरूपाभावमादायैव लक्षणगमनसम्भवात्
मच तत्परित्यज्यैवोच्यतामिति वाच्यं तथासति व्यधिकरणधर्म्मा-
वच्छिन्नाभावमन्तरेण लक्षणगमनसम्भवे प्रतियोग्यवृत्तिश्चेत्यादि-
ग्रन्थानुत्थितिप्रसङ्गात् । प्रकृतेतु समानाधिकरणदलस्य सत्त्वे ग-
गनस्वरूपाभावमादायासम्भववारणाय साध्याभावे वृत्तिमत्त्वं निवे-
शनीयं केवलान्वयिस्थलेतु व्यधिकरणधर्म्मावच्छिन्नाभावमादायैव
लक्षणसंगमनं कार्य्यं तथाचोभयत्र निरुक्तव्याप्यवृत्तित्वघटकं व्यधि-
करणधर्म्मावच्छिन्नाभावभिन्नत्वमवश्यं निवेशनीयं अथ यथा प्रकृ-
ते सामानाधिकरण्यस्य प्रथमतो यथासन्निवेशेन सार्थक्यं वक्तव्यं
तथोक्तलघुलक्षणेपि व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वदलस्या-
पि सम्भवतीतिचेदुक्तलघुलक्षणस्य लक्षणान्तरत्वान्न दोष इति
ध्येयं केचित्तु गगनाभावभिन्नमभावत्वादित्यत्र समनियताभावाना-
मैक्यमते गगनाभावभेदाभावस्य गगनाभावस्वरूपत्वेन व्यधिकर-
णधर्म्मावच्छिन्नाभावरूपतया उभयथा व्यधिकरणधर्म्मावच्छिन्ना-
भावभिन्नत्वाभावात्ताद्दशोभयाभाववान् साध्याभावोपि भवतीत्य-
तिव्याप्तिरतो यावन्तः साध्याभावास्तत्सजातीयनिरुक्तव्याप्यवृत्त्यभा-
वप्रतियोगित्वं वक्तव्यम् साजात्यन्तु समानासमानाधिकरणधर्म्माव-
च्छिन्नप्रतियोगिताकत्वरूपेण बोध्यमन्यथा ताद्दशगगनाभावसजाती-

तुव्यापकतावच्छेदकत्वेपि नातिव्याप्तिः तथा वाच्यत्वादिभेदप्रतियोगितावच्छेदकमादायैव केवलान्वयिस्थले लक्षणसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारकत्वानुपपत्तिः । (७) नच धूमत्वेन धूमाभावस्यैव वह्नित्वेन धूमवद्वृत्तेरभावत्वादयःपिण्डान्यत्वाद्यभावस्य चायःपिण्डभेदलक्षणस्वरूपसम्बन्धेन भेदत्वावच्छिन्नाभावत्वात्तत्प्रतियोगितावच्छेदकीभूत वह्नित्व-भेदत्वादिभिर्वह्नित्वाद्यवच्छिन्नं प्रति व्यापकतावच्छेदात् धूमवान् वह्नेरित्यादावतिव्याप्तिरिति वाच्यं यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नवद्वृत्तित्व-व्यधिकरणधर्म्मावच्छिन्नाभावाभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया एवावच्छेदकधर्म्मस्य लक्षणघटकत्वादिति संक्षेपः ॥

इति जगदीशकृतसाजात्यलक्षणव्याख्यासमाप्ता ।०।

य-घटत्वेनाभावत्वाभावमादायातिव्याप्तिः । सामानाधिकरण्यदलन्तु धूमवान् वह्नेरित्यादौ व्यभिचारिणि हेत्वभावमादायातिव्याप्तिवारणायेति यद्यपि यावन्ति साध्याभावत्वानि साध्याधिकरणनिरूपितवृत्तितावच्छेदकत्व-व्यधिकरणधर्म्मावच्छिन्नप्रतियोगित्वानिरूपकत्वोभयाभाववन्ति हेतुसामानाधिकरण्यावच्छेदकत्वव्याधिकरणधर्म्मावच्छिन्नप्रतियोगित्वानिरूपकत्वोभयाभाववन्ति इत्युच्यते तदा विशेषतो विभावनीयमित्याहुः ।

(७) अथ यत्सम्बन्धेन व्यापकता तत्सम्बन्धेन प्रतियोगित्वाद्युक्तौ वाच्यत्वभेदमादाय लक्षणसमन्वयेऽपि वक्ष्यमानव्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वघटितोभयाभावघटितव्याप्यवृत्तित्वदलेनैव तद्ग्रन्थावतारः सम्भवतीति चेदुच्यते व्यापकत्व-प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वानुक्तौ वाच्यत्वादिभेदमादायैव लक्षणसमन्वयात् प्रयोजनविरहेण व्याप्यवृत्तित्वशरीरे व्यधिकरणधर्म्मावच्छिन्नस्यानिवेशात् स्वावच्छेदकावच्छिन्नसामानाधिकरण्याभावनिवेशे नैव सामञ्जस्यादिति ध्येयं । अथ व्यापकत्व-प्रतियोगित्वयोरेकसम्बन्धावच्छिन्नत्वनिवेशो यदि व्यधिकरणधर्म्मावच्छिन्नाभावोत्थापकार्थस्तदातादृशविशेषणं कथं न व्यर्थमिति चेन्न अभावकूटलाघवार्थं

समुदायपदाप्रवेशेन सार्व्वभौमीयलक्षणं परिस्कर्त्तुमाह परेति- ति। साध्याभाववद्वृत्तित्वस्य घटत्वादिनाऽभावमादाय व्यभिचारि- ण्यतिव्याप्तिरतो यावन्त इत्युक्तं। (१) तादृशवृत्तित्वाभावत्वमपि दैशिकविशेषणतया ग्राह्यं तेन निर्धूमवृत्तित्वादिसामान्याभावस्यापि कालिकादिसम्बन्धेन वह्न्यादिवृत्तित्वात् यावत्त्वोपादानेऽपि नाति- व्याप्तितादवस्थ्यं। वह्निमान् धूमात् वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्संयुक्तत्वादिसमनियतप्रति योगिताकस्य संयुक्तत्वादिसामान्याभावस्य हेतावसत्त्वादतो वृत्तिम- द्वृत्तयंइत्युक्तं, तदनुक्तावसम्भवस्तु नास्ति तादात्म्यसम्बन्धेन सद्धे- तावेव निरुक्तलक्षणगमनात् व्यधिकरणधर्म्मावच्छिन्नसाध्याभावव- त्तादात्म्यप्रतियोगिकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वस्तु- गत्या तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकतया तथाविधयावदभा- वस्य हेतौ सत्त्वादिति ध्येयं, येन सम्बन्धेन हेतुता वृत्तिमद्वृत्तय- इत्यत्रापि वृत्तिमत्त्वं तेनैव बोध्यमिति पाठः। तदभावस्येति तत्सा- मान्याभावस्येत्यर्थः। जात्यादाविति समवेतत्वघटितजातित्वोक्त्या सम्बन्धान्तरेण यो वृत्तिमांस्तद्वृत्तित्वमुपदर्शितं। नक्षतिः नाव्याप्तिः हेतुताघटकसंयोगेन यो वृत्तिमांस्तद्वृत्तित्वेन तादृशाभावस्य या- वदन्तर्गतत्वादिति भावः। अत्र वृत्तिमति वृत्तिर्दैशिकविशेषणतया ग्राह्या तेन वाच्यं द्रव्यत्वादित्यादौ व्यधिकरणधर्म्मावच्छिन्नवाच्य- त्वाभाववत्समवेतत्वसमनियतप्रतियोगिताकस्य समवेतत्वसामान्या-

भाव प्रतियोगितायां व्यापकताघटकसम्बन्धावच्छिन्नत्वस्य निवेश- नीयत्वादिति विभावनीयमिति संक्षेपः।

इति श्रीअन्नदाचरणतर्कवागीशकृतप्रभाग्रन्थे
साजात्यलक्षणव्याख्या समाप्ता।

(१) अत्र वृत्तिमद्वृत्तित्वदलस्य व्यावृत्तिं प्रथममनालोच्य कथं यावत्पदव्यावृत्तिर्दीयते चेन्न यावत्पदस्य व्यावृत्तिर्दत्तैव वृ- त्तिमद्वृत्तयइत्यस्य सार्थक्यमतो व्युत्क्रमेण व्यावृत्तिर्दत्तेति चिन्त्यं।

भावस्य हेतुताघटकसमवायसम्बन्धेन वृत्तिमति स्पन्दादौ कालिकसम्बन्धेन वर्त्तमानस्य दैशिकविशेषणतया द्रव्यत्वादिहेतावसत्त्वेपि नाव्याप्तिः। (२) इत्यत्रापीत्यपिकारेण साध्याभाववति वृत्तिरपि हेतुताघटकसम्बन्धेनैव ग्राह्येति व्यञ्जितं तेन तत्तद्धूमावयवान्यत्वाभावस्यापि पूर्व्वोक्तद्वितीयरीत्या साध्याभावत्वेन तद्वति सम्बन्धसामान्येन या वृत्ति स्तदभावस्य तत्तद्धूमावयवासमानकालीनद्रव्यवृत्तेर्धूमहेतावसत्त्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः। वस्तुतो यथाश्रुतलक्षणस्य द्रव्यत्वादिसाध्यतायामवृत्तिगगनादिहेतावतिव्याप्तिः विशिष्टसत्त्वादावव्याप्तिश्च द्रव्यान्यस्मिन् गुणादौ विशिष्टसत्ताया अपि वृत्तेरतो वृत्तिमद्वृत्तयो यावन्त स्तत्तत्साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणताकधर्म्मवत्त्वमेवव्याप्तिर्वक्तव्येति अत्र साध्याभाववद्वृत्तित्वं स्वरूपसम्बन्धेनैव निवेश्यं नतु हेतुताघटकसम्बन्धेन तथासति अधिकरणतामात्रस्यैव संयोगादिसम्बन्धेनावर्त्तमानत्वाद्धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेरत एव महाकालान्यो घटादित्यादौ कालिकसम्बन्धेन हेतावपि नातिव्याप्तिः स्वरूपसम्बन्धेन महाकालवृत्तित्वसामान्याभावस्यैव महाकालभेदादिनिष्ठस्य कालिकसम्बन्धावच्छिन्नाधिकरणतायामसत्त्वात्, अन्यथा साध्याभाववति महाकाले कालिकसम्बन्धेन वृत्तित्वाभावस्य व्यधिकरणधर्म्मावच्छिन्नस्यैव तादृशसम्बन्धेन यो वृत्तिमांस्तद्वृत्तित्वेनातिव्याप्तेर्दुर्वारतापत्तेरिति युक्तमुत्पश्यामः। ननु साध्यप्रतियोगिकाभावमात्रस्य प्रवेशे धूमस्य तत्तद्वह्न्यभाववद्वृत्तित्वाद् वह्निमान् धूमादित्यादावव्याप्तिः साध्यतावच्छेदकधर्म्मावच्छिन्नाभावस्य प्रवेशेतु गगनादेः साध्यत्वे द्रव्यत्वादावतिव्याप्तिः साध्याभावस्य के-

(२) नन्वत्र वह्निमान् धूमादित्यादावव्याप्तिसम्भवे अत्राव्याप्तिदानमसङ्गतं चेन्न वह्निमान्धूमादित्यादौ उक्तवृत्तित्वाभाववत्त्वस्य स्वरूपसम्बन्धेनोक्तावव्याप्तिः वाच्यं द्रव्यत्वादित्यत्रतु स्वरूपसम्बन्धेनोक्तावनुक्तावपीत्यावेदयितुं प्रसिद्धस्थलस्य परित्यक्तत्वादिति।

घलान्वयित्वात् एवं घ्राणग्राह्यगुणवान् प्रमेयवान् वा पृथिवीत्वादि-
त्यादावव्याप्तिः तादृशधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह
साध्याभावश्चेति। (३) पूर्ववदिति प्रकृतसाध्यव्यापकतावच्छेदक-
रूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिश्चाभावोऽत्र साध्याभावपदार्थः
यथाश्रुतसाध्याभावप्रवेशेनासङ्गत्यापत्तेः अत्रापि येन सम्बन्धेन
व्यापकता तत्सम्बन्धेन तादृशरूपावच्छिन्नाभावो ग्राह्यः तेन ज्ञान-
वानात्मत्वादित्यादौ स्वरूपसम्बन्धेन साध्यव्यापकस्य प्रमेयत्वादेः
कालिकसम्बन्धावच्छिन्नाभावाधिकरणात्मसमवेतत्वाभावस्य स्प-
न्दादिनिष्ठस्य हेतावसत्वेपि न क्षतिः। (४) यत्तु साध्यतावच्छेदकस-
म्बन्धेन तादृशरूपावच्छिन्नाभावानां विवक्षणान्न ज्ञानवानात्मत्वादि-
त्यादावव्याप्तिः कालिकसम्बन्धेन प्रमेयत्वाभावस्य साध्याभावघट-
कस्य समवायसम्बन्धानवच्छिन्नत्वादित्थञ्च व्यापकतापि तेनैव च स-
म्बन्धेन ग्राह्या, तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यता-
घटकसमवायसम्बन्धेनाभाववति हेतोर्वर्त्तमानत्वेपि द्रव्यं पृथिवी-
त्वादित्यादौ नाव्याप्तिरिति, तत्तुच्छं वृत्त्यनियामकसम्बन्धेन साध्य-
तायां तदवच्छिन्नप्रतियोगित्वाप्रसिद्ध्या सद्धेतावव्याप्तेः धूमवान् वह्ने-
रित्यादावतिव्याप्तेश्च, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव
संयोगसम्बन्धावच्छिन्नाभावस्य व्याप्यवृत्तितया तद्वद्वृत्तित्वाभाव-
स्यापि व्यधिकरणधर्मावच्छिन्नस्यैव वृत्तिमद्वृत्तित्वात्, प्रमेयं द्र-
व्यत्वादित्यादौ तादात्म्येन साध्यतायामव्याप्तेश्च साध्यताघटकसम्ब-

---

(३) अधिकरणतावच्छेदकसाध्यतावच्छेदकावच्छिन्नाभावस्य
निवेशेनातिव्याप्तिरत आह एवमिति, गुरुधर्मस्य प्रतियोगितावच्छे-
दकत्वस्वीकारे घ्राणग्राह्यगुणसाध्यकेऽव्याप्तिरत आह प्रमेयेति, ननु
घ्राणग्राह्यगुणस्य पार्थिवपरमाणावभावात् कथं न पृथिवीत्वहेतु-
र्व्यभिचारी चेन्नात्र पृथिवीत्वपदेन जन्यत्वविशिष्टपृथिवीत्वपरत्वात्,
केचित्तु घ्राणग्राह्यगुणपदं घ्राणग्राह्यत्वे सति गुणत्वाव्यापकजातिम-
त्परं अतो न कश्चिद्दोष इत्याहुः। (४) नन्वत्र स्वरूपसम्बन्धेन
साध्यव्यापकस्य वाच्यत्वस्य भेदमादाय वह्निमान् धूमादित्यादाव-

न्धेन तदवच्छिन्नाभावाप्रसिद्धेरिति दिक्। वह्निमान् धूमादित्यादाव-व्याप्तिः वह्निसंयोगाभावस्यापि साध्यव्यापकतया तदभावात्मकवह्नि संयोगवद्‌वृत्तित्वसामान्याभावस्यापि घटादिनिष्ठस्य हेतावभावाद-तो व्याप्यवृत्तित्वेनाभावो विशेषितः। वस्तुतस्तु निरुक्तसाध्याभावाधिकरणमवश्यं विशेषणताविशेषेण प्रवेश्यमन्यथा द्रव्यं गुणादि-त्यादौ द्रव्यत्वाभावस्य कालिकसम्बन्धेनाधिकरणे काले गुणस्य वृत्ते द्रव्यत्वाभाववत्समवेतत्वसामान्याभावस्य ज्ञानादिनिष्ठस्य हेतावसत्वादव्याप्त्यापत्तेस्तथाच वह्निसंयोगाद्यात्मकाभावस्य तादृशसम्बन्धेनाधिकरणाप्रसिद्ध्या तमादायाव्याप्तेर्वारणार्थं न व्याप्यवृत्तिपदं, परन्तु रूपवान् पृथिवीत्वादित्यादौ नित्यत्वादिना रूपाद्यभावस्यापि तादृशधर्म्मावच्छिन्नाभावतया तद्वत्समवेतत्वाभावस्य नित्यरूपादिनिष्ठस्य हेतावसत्वादव्याप्तिरतो व्याप्यवृत्तिपदं, नच तस्यापि व्याप्यवृत्तित्वादुक्तदोषतादवस्थ्यं यत्प्रतियोगिताकाभावे स्वावच्छेदकसम्बन्धेन स्वावच्छेदकधर्म्मावच्छिन्नवद्‌वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वस्यच द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावस्योक्तत्वात् नित्यत्वादिना रूपाद्यभावस्यच व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वाद्यवच्छिन्नवद्‌वृत्तित्वादेव व्युदासः, एतेन संयोगाभावत्वादेः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतानवच्छेदकत्वेपि न व्याप्य-

---

व्याप्तिसम्भवे अत्राव्याप्तिदानमसङ्गतमिति न देश्यम् उक्ताभावाधिकरणवृत्तित्वाभावस्य संयोगेन वृत्तिमदवृत्तित्वात् व्यधिकरणधर्म्मावच्छिन्नाभावमादाय तत्र लक्षणसमन्वयात्। ननु तथापि स्वरूपेण साध्यव्यापकस्य वाच्यत्व-महानसीयवह्निमदन्यतरस्यभेदमादाय वह्निमान् धूमादित्यत्राव्याप्तिः। अत्र केचित् यन्निष्ठं साध्यव्यापकतावच्छेदकप्रतियोगित्वं तन्मात्रनिष्ठप्रतियोगिताकत्वं यदि तादृशाभावे निविशते तदोक्ताभावस्य लक्षणाघटकतया न वह्निमान् धूमादित्यत्राव्याप्तिरतः स्थलान्तरानुसरणमित्याहुः।

वृत्तिपदवैयर्थ्यमिति ध्येयं, मिश्रलक्षण इवात्रापि तत्तत्साध्याभाववद्वृत्तितात्वव्यापकव्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकत्वप्रवेशे आलोकावृत्तित्वाद्यवच्छिन्नाभावस्य हेतावसत्त्वाद्वह्निमान् धूमादित्यत्राव्याप्तिरतो ऽन्यथा व्याचष्टे स्वव्यापकेति स्वं प्रतियोगितातद्व्यापकीभूतं यत् तत्तत्साध्याभाववद्वृत्तित्वत्वं तद्व्यापकप्रतियोगिताक इत्यर्थः। व्याधिकरणधर्म्मावच्छिन्नाभावसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्यभिचारिण्यतिव्याप्तिरत उक्तं तत्तदिति स्वनिष्ठवृत्तित्वत्वरूपेण वृत्तित्वसामान्याभावस्य व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वात् हेतुमात्रेऽसम्भवापत्तेः कल्पान्तरमाह तत्तदिति समानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिताकस्य यावद्भावस्यैव व्यभिचारिण्यतिप्रसक्तत्वादतिरिक्तान्तं तत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्म्मतया तदवच्छिन्नसामान्याभावमादायातिव्याप्तेर्वारणायोगात्तत्तदित्युक्तं, नचैवमपि व्यधिकरणधर्म्मावच्छिन्नद्रव्यत्वाभाववद्वृत्तित्वत्वेन घटवृत्तित्व-जातित्वान्यतरस्य घटावृत्तेर्वाभावमादाय द्रव्यंपृथिवीत्वादित्यादावव्याप्तिः, हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेनापि प्रतियोगिताया विशेषणीयत्वात्॥ (५) अतएव तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्युक्तौ वाच्य

---

(५) ननु घटवृत्तित्वाभावमादायाव्याप्तिसम्भवे जातित्वघटितान्यतराभावानुसरणमसङ्गतं चेन्न सामान्यधर्म्मेण विशेषाभावास्वीकारे तादृशवृत्तितात्वेन घटवृत्तित्वाभावस्यासत्त्वात् न तमादाय व्याप्तिसम्भावना अपितु उक्ताभावमादायैवेत्यावेदयितुं जातित्वघटितान्यतराभावावलम्बनात्। ननु एवं रीत्या पर्व्वतादिवृत्तित्वजातित्वान्यतराभावमादाय वह्निमान्धूमादित्यत्राव्याप्तिसम्भवे अत्राव्याप्तिदानमसङ्गतमिति न देश्यं वह्निमान् धूमादितिवद्द्रव्यंपृथिवीत्वादितिस्थलस्य प्रसिद्धत्वेन विशेषव्याप्तिग्रन्थेऽभिहितत्वात्। न-

क्षेयत्वादित्यादावव्याप्तिः साध्याभाववद्वृत्तित्वत्वावच्छिन्नं यद्धेतुताघटकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तिप्रतियोगित्वं तादृशप्रतियोगिताकस्य वृत्तिमद्वृत्त्यभावस्याप्रसिद्धेरतो निषेधद्वयगर्भता, तेन घटत्वादिना तादृशवृत्तित्वाभावमादायतत्सङ्गतिः। केचित्तु यद्यपि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्ना यावन्तो ऽभावा इत्येवलाघवाद्वक्तुमुचितं तथापि वाच्यं प्रमेयादित्यादौ तादात्म्येन हेतौ जगत एव साध्याभाववत्तादात्म्यतया तादृशतादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्या ऽव्याप्तिरतो निषेधद्वयगर्भता, इत्थञ्च विरुद्धघटत्व--पटत्वाभ्यामेव तादृशवृत्तित्वाभावः सुलभ इत्याहुः। यत्तु वृत्तित्वत्वमपेक्ष्य गुरोर्वाच्यत्वाभाववद्वृत्तित्वत्वस्य प्रतियोगितानवच्छेदकतया केवलान्वयिन्यव्याप्तिभिया तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा नोक्ता इति, तत्तुच्छं गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमादृत्यैवं लक्षणकरणादन्यथैतत्कल्पे वृत्तिमद्वृत्तिपदवैयर्थ्यापत्तेः वृत्तित्वत्वमात्रस्य तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्म्मतयैव तदवच्छिन्नसामान्याभावमादायाव्याप्त्यसम्भवात्, किञ्च गुरुधर्म्मस्यानवच्छेदकत्वे तद्घटभिन्नं घटत्वादित्यादावतिव्याप्तिरपि स्यात्, तद्घटवृत्तित्वत्वापेक्षयागुरुत्वेन तद्घटभेदाभाववद्वृत्तित्व-

---

चासम्भवसम्भवेऽव्याप्तिदानं न युक्तिसहमिति वाच्यं धूमप्रतियोगिकसंयोगेन धूमस्यहेतुतायां पृथिवीत्वप्रतियोगिकसमवायसम्बन्धेन पृथिवीत्वस्य हेतुतायाञ्च हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्वृत्तेर्हेत्ववृत्ते रभावस्याप्रसिद्ध्या लक्षणगमनसम्भवात् स्वनिष्ठवृत्तितात्वेन वृत्तित्वसामान्याभावमादायासम्भवइति यदुक्तं तत्तु शुद्धसंयोगसम्बन्धेन हेतुकस्थलाभिप्रायेणेति ध्येयम्। अथ प्रतियोगितायां हेतुताघटकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेन प्रतियोगिताया विशेषणीयत्वेपि तादृशप्रतियोगितायां व्यासज्यवृत्तिधर्म्मानात्मकत्वं विशेषणीयं अन्यथा घटवृत्तित्व-घटान्यवृत्तित्वोभयाभावस्य वृत्तिमद्घटत्वादिवृत्तेः पृथिवीत्वादावसत्वात् द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति अतएव तादात्म्येन प्रमेयहेतुकस्थले साध्याभाव-

त्वावच्छिन्नाभावाप्रसिद्धेस्तद्घटवृत्तित्वत्वस्य च साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्म्मतया तदवच्छिन्नाभावस्य लक्षणाघटकत्वात्। (६) एवं स्नेहशून्यं द्रव्यत्वादित्यादौ स्नेहशून्यत्वाभाववद्वृत्तित्वत्वादे र्जलवृत्तित्वत्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽतिव्याप्तिर्द्रष्टव्येति दिक्। यस्य कस्यचित् सामानाधिकरण्य मव्यावर्त्तकमतस्तत्तत्प्रतियोगितासमानाधिकरणत्वनिवेशापेक्षया लाघवमनुसमृत्याह वृत्तित्ववृत्तिनावेति (७) साध्याभाववद्वृत्तित्ववृत्तिना वेति पाठे साध्याभाववत्त्वं सम्पातायातं, यद्यपि तादृशवृत्तित्ववृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वादिसामान्याभावस्य घटाद्यन्यत्वाभावस्य च यावदन्तर्गतस्य हेतावसत्त्वा-

---

षद्वृत्तितात्वेन यावान्नेत्यभावमादायैव लक्षणसमन्वये तत्राव्याप्तिवारणाय केचित्त्वित्यादिना वक्ष्यमाणनिषेधद्वयप्रवेशव्यावृत्तिदानमसङ्गतमित्यपि परास्तं। अत्र सामान्यधर्म्मेण विशेषाभावस्वीकारे साध्याभाववद्वृत्तितात्वव्यापकत्वमपि प्रतियोगितायां विशेषणीयमन्यथा व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वेन घटवृत्तित्वाभावमादाय तद्दोषतादवस्थ्यमिति।

[६] अत्र कल्पे वृत्तिमद्वृत्तित्वपदवैयर्थ्यापत्तौ इष्टापत्तेराह किञ्चेति। ननूकरील्या घटभिन्नं द्रव्यत्वादित्यत्रातिव्याप्तिसम्भवे तत्पदं किमर्थं चेन्न घटवृत्तितात्वपदेन घटनिरूपितत्वविशिष्टवृत्तितात्वमेव वक्तव्यं तथाच घटव्यक्तिभेदेन तादृशवृत्तितात्वं यदि नाना तदा नैकमपि घटवृत्तितात्वं घटभेदत्वरूपाखण्डधर्म्मावच्छिन्नाभाववद्वृत्तितात्वसमनियतमिति न तत्रातिव्याप्तिस्तत्पदेनेत्यस्योक्तत्वात्। नच घटवृत्तितात्वपदेन घटत्वावच्छिन्नवद्वृत्तितात्वमेव वक्तव्यं तथाचानुगतधर्म्मस्य घटत्वस्य तदन्तर्गततया तादृशवृत्तितात्वमप्येकमिति समनैयत्यमस्तीति भवत्यतिव्याप्तिरिति वाच्यम् पृथिवीत्वतेजस्त्वादिना साङ्कर्य्यात् घटत्वं यदि नाना तदा न कस्यापि घटत्वावच्छिन्नवद्वृत्तितात्वस्य तादृशवृत्तितात्वसमनैयत्यसम्भावनेति तद्दोषस्य जागरूकत्वात्। [७] ननु तत्तत्प्रतियोगितासामानाधिकरण्यनिवेशेपि कालिकसम्बन्धमादायाव्यावर्त्तकत्वात्तस्वावच्छेदकताघटकसम्बन्धेन तत्र वृत्तित्वं निवेद्यं तथाच तत्त-

तु वह्निमान् धूमादित्यादौ सर्व्वत्रासम्भवः, तादृशधर्म्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावविवक्षणेपि घटभेदत्वेन घटभेद-निर्व्वह्निवृत्तित्वान्यतराभावस्य तादृशहेतावसत्वात्, तथापि पूर्व्ववदत्रापि कल्पे हेतुताघटकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेन प्रतियोगित्वञ्च विशेषणीयमित्यदोषः, अतएव पूर्व्ववद्वाच्यं ज्ञेयत्वादित्यादिसंग्रहार्थमेव निषेधद्वयगर्भता। स्वन्यूनवृत्तिधर्म्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताया एव तादृशवृत्तित्वत्वातिरिक्तवृत्तित्वनिष्ठधर्म्मानवच्छिन्नत्वं विवक्षितमित्यपि कश्चित्, वृत्तित्ववृत्तिना धर्म्मेणवेति पाठे तु धूमत्वाद्यभावमादायासम्भवतया धर्म्मेण वेति कल्पान्तरोल्लेखः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन पूर्व्वेणान्वयि, तथाच तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताक इत्यर्थः तथाच धूमत्वत्व-घटभेदत्वादेस्तादृशवृत्तित्वत्वातिरिक्तधर्म्मत्वादेव तदवच्छिन्नसामान्याभावमादाय नासम्भवो वाच्यं प्रमेयादित्यादौतु तादात्म्येन हेतौ विरुद्धघटत्व-पटत्वाभ्यामवृत्तिगगणादिना वा वृत्तित्वाभावमादाय लक्षणसमन्वय इति ध्येयं। स्वव्यापकतत्तत्साध्याभाववद्वृत्तितात्वेत्यस्य व्यावृत्तिमाह आलोकाद्यवृत्तित्वेनेति निर्व्वह्निवृत्तित्वस्येति प्रतियोगितायां तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वप्रदर्शनार्थं, नच स्वव्यापकवृत्तितात्वकेत्युक्त्वा प्यालोकावृत्तित्वावच्छिन्नाभावस्य वारणसम्भवात् प्रतियोगिताव्यापकत्वादिरिति तत्तत्साध्याभाववदन्तर्भावो व्यर्थ इति वाच्यम् आलोकावृत्तिवृत्तित्वाभावमादायाव्याप्तिवारणार्थं तस्यावश्यकत्वात् स्वसमानाधिकरणात्यन्ताभावाप्रतियोगि-तत्तत्साध्याभाववद्वृत्तित्वत्वाश्रयनिष्ठात्यन्ताभावाप्रतियोगिःप्रतियोगिता-कत्वरूपपर्य्यवसितार्थे

कनिवेशेपि विरुद्धघटत्वादिना व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावसंग्राहकतया सार्थक्यसम्भवादव्यावर्त्तकत्वकथनमनुचितमिति चेन्न जन्यमात्रस्य कालोपाधित्वास्वीकारात् स्वावच्छेदकताघटकसम्बन्धेन तद्घटक वृत्तित्वस्यानिवेशादिति ध्येयं।

तत्तत्साध्याभाववतः सकृदेव निविष्टतया वैयर्थ्याशङ्कानवकाशश्चेति भावः। तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य फलमाह यश्चेत्यादिना, घटत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तदवच्छिन्नाभावस्य लक्षणाघटकत्वादाह इन्धनत्वादीति, इन्धनत्वावच्छिन्नसामान्याभावस्य महानसादावसत्त्वात्तमादाय क्षतिविरहादाह वह्न्यभावेति, तादृशवृत्तितात्वव्यापकप्रतियोगितेत्यस्यानुक्तावसम्भव एव स्यात् नतु वह्निमान् धूमादित्यादावव्याप्तिमात्रम्, (८) प्रमेयमात्रस्य हेतुतास्थलेपि तत्तत्प्रमेयनिष्ठवृत्तित्वाभावस्य प्रमेयान्तरवृत्तेस्तत्तत्प्रमेये विरहादित्यावेदयितुं सर्व्वसाधनसाधारण्येनाह स्वनिष्ठेति। स्वनिष्ठं यत् साध्याभाववद्वृत्तित्वं तत्तत्सामान्याभावस्येत्यर्थः, अत्र घटत्वादौ साध्ये स्वीयविशेषणतया घटान्यत्वादिहेतावतिव्याप्तिः साधनस्यैव हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्तया तन्निष्ठस्य यावदभावस्यैव हेतौ सत्त्वात् नचैतस्य विरुद्धत्वात् साध्यसमानाधिकरणत्वेन हेतुविशेषणादेव नाव्याप्तिरिति वाच्यं तथापि द्रव्यत्वादौ साध्ये स्वीयसमवायादिना सत्त्वादिहेतावतिव्याप्तिस्तादृशसम्बन्धेन हेतोरेव वृत्तिमत्तया तन्निष्ठयावदभावस्य साध्यसामानाधिकरण्यस्यच हेतोः सत्त्वात् एवं महाकालान्यो घटादित्यत्र कालिकसम्बन्धेन हेतावतिव्याप्तिर्हेतुताघटककालिकसम्बन्धेन महाकालवृत्तेः तेन सम्बन्धेन तदवृत्तित्वासम्भवात् सामानाधिकरण्यस्य व्याप्यवृत्तित्वात् अन्यथा घटादिहेतावपि खण्डकालावच्छेदेन महा-

---

[८] ननु तद्रूपे साध्ये स्वीयसमवायसम्बन्धेन तद्वसहेतौ साधनस्यैव हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्तया तन्निष्ठयावदभावस्यैव हेतौ सत्त्वात्तत्राव्याप्तिविरहेणासम्भवकथनमयुक्तं अत्र केचित् वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणतासामान्यकधर्म्मवत्त्वं व्याप्तिरिति निष्कृष्टलक्षणमभिप्रेत्यासम्भवोऽभिहितः व्यधिकरणधर्म्मावच्छिन्नाभाववद्धेतुवृत्तित्वाभावस्यापि दैशिकविशेषणतया वृत्तिमद्वृत्तित्वेन लक्षणघटकत्वादिति प्राहुः।

कालवृत्तित्वाभावसत्त्वादुक्तातिव्याप्तितादवस्थ्यात्, एवं द्रव्यत्वादेः साध्यतायामवृत्तिगगनादिहेतावतिव्याप्तिर्विशिष्टसत्तायामव्याप्तिश्च द्रव्यान्यस्मिन् गुणादौ विशिष्टसत्ताया वृत्तिमत्त्वादिति वदन्ति, यदि च वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणतासामान्यकधर्म्मवत्त्वं व्याप्तिरिति वक्ष्यते, तदा नैतेषामेकोऽपि दोषः पदमादधाति (९) वृत्तिमद्वृत्तय इत्यादौ सर्व्वत्र दैशिकविशेषणतासम्बन्धेनैव वृत्तेर्निवेशनीयत्वात् अन्यथाऽधिकरणत्वमात्रस्यैव संयोगादिसम्बन्धेनावर्त्तमानत्वात् धूमवान् वह्नेरित्यादावतिव्याप्तेरपि प्रसङ्गादिति ध्येयं ॥*॥

इतिजगदीशकृतसार्व्वभौमीयकूटाघटितलक्षणव्याख्यासमाप्ता।

कूटपदप्रवेशे सार्व्वभौमीयं लक्षणं परिस्कुर्व्वण्णाह अन्येत्वित्यादि अत्र साध्याभावकूटाधिकरणवृत्तित्वस्य घटत्वादिनाऽभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावन्त इत्युक्तं तथाच तादृशवृत्तित्वसामान्याभावस्यैव तत्र हेतावसत्त्वान्नातिप्रसङ्गः नच तादृशवृत्तित्वत्वावच्छिन्नाभाववत्त्वोक्त्यापि तादृशाभावव्युदासः सम्भवतीति वाच्यं तथापि तादृशवृत्तित्वत्वेन घटादेरभावमादायातिव्याप्तितादवस्थ्यात् इदं वाच्यं ज्ञेयत्वादित्यादौ तादृशवृत्तित्वत्वस्य गुरुतया तदवच्छिन्नाभावाप्रसिद्धेश्च, अतएव तादृशवृत्तित्वसामान्याभाववत्त्वमपि न विवक्षितं केवलान्वयिन्येवाव्याप्ते र्वाच्यत्वाभावकूटाधिकरणवृत्तित्वसामान्याभावस्य ज्ञेयत्वहेतावभावादिति भावः। (१) इत्थमपि

---

[९] अत्रापि आलोकावृत्तिवृत्तित्वाभावं महानसनिरूपितवृत्तित्वाभावञ्चादाय प्रागुक्तरीत्या दोषसम्भवेन साध्याभाववद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तितात्वव्यापकप्रतियोगिताको ग्राह्यः।

इति श्रीअन्नदाचरणतर्कवागीशकृतप्रभाग्रन्थे कूटाघटितसार्व्वभौमीयलक्षणविचारः समाप्तः।

---

[१] अतएवेतिपदस्य वक्ष्यमाणकेवलान्वयिन्यव्याप्तेरेवेत्यर्थः। ज्ञेयत्वहेतावभावादित्यस्य हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्वृत्तिरू-

साध्यस्याभावकूटाधिकरणवृत्तित्वसामान्याभावस्य यावदन्तर्गतस्य ज्ञेयत्वादिहेतावसत्त्वाद्वाच्यं ज्ञेयत्वादित्यादावव्याप्तिरतो वृत्तिमद्वृत्तेः स्य इत्युक्तं तथाच तस्य वृत्तिमदवृत्तित्वान्न निरुक्तयावदन्तर्गतत्वं किन्तु घटत्वादिना तादृशवृत्तित्वाभावस्यैव सच ज्ञेयत्वादिहेतौ वर्त्तत एवेति नाव्याप्तिरत्रवृत्तिमत्त्वादिकं पूर्वलक्षणदिशाऽवसेयं तेन न प्रागुक्तदोषः । ननु प्रलयभिन्नं गोत्वादित्यादौ कालिकसम्बन्धेन हेतावतिव्याप्तिः ।

(२) महाकालस्यापि कालिकसम्बन्धेन प्रलयान्यत्वाभावकूटवत्त्वेन तत्र या हेतुतावच्छेदककालिकसम्बन्धेन वृत्तिस्तस्या व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात् नच दैशिकविशेषणतया साध्याभावकूटवत्त्वं विवक्षितं अतस्तादृशकूटाधिकरणप्रलयवृत्तित्वसामान्याभावस्याधुनिकघटादिवृत्तेर्गोत्वादिहेतावसत्त्वान्नातिव्याप्तिरिति वाच्यं, घटत्वाभाववान् पटत्वादित्यादावभावसाध्यकेऽव्याप्तिप्रसङ्गात्, साध्याभावकूटान्तर्गतस्य घटत्वरूपसाध्याभावस्य विशेषणतयाधिकरणाप्रसिद्धेर्विशेषणतया वृत्तिमतामेव साध्याभावानां प्रवेशे तु घटत्वाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तत्र दैशिकविशेषणतया वृत्तिमद्वृत्तित्वात् एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताके गगनत्वाद्यभावस्याभावे साध्ये ज्ञानादिहेतावव्याप्तिः गगनत्वाद्यभावघटितकूटस्य दैशिकविशेषणतासम्बन्धेन यदधिकरणं तद्वृत्तित्वाभावस्य वृत्तिमति शब्दादौ प्रसिद्धस्य ज्ञानादिहेतावभावादिति चेन्न

षस्य तादृशवृत्तित्वाभावस्याप्रसिद्ध्या ज्ञेयत्वहेतावसत्त्वादित्यर्थः अतो नासङ्गतारति ध्येयं । [२] अथात्र द्रव्यं महाकालत्वादित्यादौ आत्मत्वाधिकरणत्वरूपवृत्तिमद्वृत्तेः कालिकसम्बन्धेन साध्याभावकूटाधिकरणवृत्तित्वाभावकूटस्य हेतावसत्त्वादव्याप्तिसम्भवे उक्तातिव्याप्तिकथनं न युक्तं, चेन्न यत्किञ्चित्सम्बन्धेन तादृशकूटाधिकरणत्वनिवेशे द्रव्यं महाकालत्वादित्यादावव्याप्तिवारणं सम्भवतीत्यतिव्याप्तेरुक्तत्वात् ।

साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्त्वबुद्धेः संसर्गविधया प्रतिबन्धकतावच्छेदकोयः सम्बन्धस्तेन वृत्तिमतः साध्याभावकूटस्य तादृशसम्बन्धेनैवाधिकरणत्वस्योक्तत्वात् संयोगाभाववान् प्रमेयादित्यादौच संयोगादिरूपः साध्याभावो न तादृशसम्बन्धेन वृत्तिमान् निरवच्छिन्नसमवायसम्बन्धेनैव संयोगादिनिश्चयस्य तदभावविरोधित्वादतो न तत्राव्याप्तिः। (३) केवलान्वयिनिच तादृशप्रतियोगितावच्छेदकविशिष्टसाध्यवत्त्वबुद्धिर्भ्रमरूपैव सुलभा, सत्यां हि घटत्वेन वाच्यत्वं नास्तीति बुद्धौ जात्वपि घटत्वेन वाच्यत्वमस्तीति ज्ञानानुदयात्। घटत्वाद्यभाववत्ताबुद्धिं प्रातच समवायादिना घटत्वादिमत्तानिश्चयस्य प्रतिबन्धकत्वादेवोक्ताव्याप्त्यादेर्व्युदासः। तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वे प्रवेशित एव समुदायपदं सार्थकं भवत्यतः प्रागेव वृत्तित्वाभावं व्याचष्टे तादृशेति, स्वेति स्वं प्रतियोगिता, तद्व्यापकं यत्साध्याभावसमुदायाधिकरणवृत्तित्वत्वं तद्व्यापकप्रतियोगिताका इत्यर्थः। प्रयोज-

---

[२] गगनत्वाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावे साध्ये, आत्मत्वहेतावव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन तादृशसाध्यवत्त्वं निवेशितं, तथाच स्वरूपस्य कालिकेन साध्यवत्ताज्ञान विरोधिताघटकत्वेऽपि न क्षतिः। स्वप्रतियोगिसाध्यवत्त्वोपादाने जगदीशोक्तज्ञानादिहेतुके ऽव्याप्तिः, घटत्वेन कालिकसम्बन्धावच्छिन्नगगनत्वाभावाभावप्रकारकबुद्धेः स्वरूपस्य प्रतिबन्धकतावच्छेदकसंसर्गतया तेन सम्बन्धेन साध्याभावकूटाधिकरणे हेतोर्वृत्तेः, संयोगाभाववान् प्रमेयादित्यत्राप्यव्याप्तिर्बोध्या, समवायस्यापि संयोगरूपाभावप्रतियोगिसमवेताभावसाध्यवत्त्वबुद्धेः प्रतिबन्धकतावच्छेदकसंसर्गत्वात्। स्वप्रतियोगितावच्छेदकविशिष्टमात्रप्रवेशे वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः घटानुयोगिक-पटानुयोगिकस्वरूपसम्बन्धेन वाच्यत्वाभाववत्वेन वाच्यत्वस्याभावस्य प्रतियोगितावच्छेदकीभूतं यत्तादृशाभाववत्वं तद्विशिष्टवत्ताबुद्धेः प्रतिबन्धकतावच्छेदकघटानुयोगिकपटानुयोगिकस्वरूपसम्बन्धेन तादृशकूटाधिकरणाप्रसिद्धेरिति चिन्त्यं। स्वरूपवद्गगनत्वाभावस्य

नञ्चेति वह्निमान् धूमादित्यत्रालोकावृत्तिसामान्याभावस्य साध्याभावकूटाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य यावदन्तर्गतस्य हेतावसत्त्वादव्याप्तिरतः स्वव्यापकेति, तथाचालोकवृत्तित्वावच्छिन्नाभावप्रतियोगित्वस्य व्यापकं न निर्वह्निवृत्तित्वत्वं, धूमत्वादौ व्यभिचारित्वादित्ययमभावो न लक्षणघटक इति नाव्याप्तिः। प्रतियोगितायां तादृशवृत्तित्वत्वव्यापकत्वानुक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः, स्वप्रतियोगिताव्यापकसाध्याभावकूटवद्वृत्तित्वत्वकस्य घटवृत्तित्वसामान्याभावस्य यावदन्तर्गतस्य हेतावसत्त्वात्तदुपादानेच तादृशाभावप्रतियोगित्वं न वाच्यत्वाभाववद्वृत्तित्वत्वव्यापकं पट वृत्तित्वे व्यभिचारादित्येतस्य लक्षणाघटकत्वान्नाव्याप्तिरिति भावः। अत्रच प्रतियोगिता स्वन्यूनवृत्तिधर्म्मानवच्छिन्ना ग्राह्या, तेनेदं वाच्यं ज्ञेयत्वादित्यादौ घटवृत्तितात्वेन वृत्तित्वसामान्याभावस्य घटान्यत्वादिवृत्ते ज्ञेयत्वादिहेतावसत्त्वेपि नाव्याप्तिः। सार्व्वभौममते एकविशिष्टापरत्वमेवोभयत्वं तेन घटवृत्तित्व-घटान्यवृत्तित्वोभयाभावमादायापि नासम्भवः स्तत्प्रतियोगितायास्तादृशवृत्तित्वत्वाव्यापकत्वादिति ध्येयं। (४) स्वव्यापकत्वदलस्य पूर्व्वलक्षणोक्तैव व्यावृत्तिस्तादृशवृत्तित्वत्वव्यापकत्वदलस्यतु प्रागिव न वह्निमान् धूमादित्यादौ व्यावृत्तिः तादृशमहानसादेः साध्याभावकूटानधिकरणत्वादतः केवलान्वयिस्थल एव इत्याशयेनाह उक्तप्रायमिति, नच स्वव्यापकेत्याद्यपेक्षया लाघवात् साध्याभावकूटाधिकरणवृत्तितात्वावच्छिन्ना-

---

कालिकेनाभावस्य साध्यत्वे आत्मत्वादिहेतावव्याप्तिवारणाय संसर्गाविषयेति, तथाच स्वरूपस्य विषयविधया तादृशसंसर्गत्वेऽपि न क्षतिः। स्ववृत्तित्व-साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताबुद्धिप्रतिबन्धकतावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन साध्याभावविशिष्टा या निरूपकता तन्निरूपिताधिकरणताकूटवत्त्वमेव विवक्षणीयमन्यथा एकेन सम्बन्धेन कूटाधिकरणाप्रसिद्ध्या घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः स्यादिति ध्येयम्। (४) वक्ष्यमाणस्य साध्याभावे हेतुसामानाधिकरण्यनिवेश-

मावा एव यावन्तो निविदयन्तां तादृशवृत्तित्वत्वेन घटादेरभावमादाय केवलान्वयिनि लक्षणसम्भवादिति वाच्यं वह्निमान् धूमाद्वाच्यं ज्ञेयत्वादित्यादौ सर्व्वत्रासम्भवापत्तेः निर्वह्निवृत्तित्वत्वस्यवृत्तित्वत्वाद्यपेक्षया गुरुत्वेन वह्न्यभावकूटवद्वृत्तित्वस्य घटत्वेनवाच्यत्वाभावकूटवद्वृत्तित्वत्वादेः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावस्याप्रसिद्धेरितिभावः । ननु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकाभावास्तद्वत्त्वमेवोच्यतां कृतं कूटनिवेशेनेत्यत आह साध्याभावेति, साध्यप्रतियोगिकाभावेत्यर्थः व्यधिकरणेति साध्यप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावस्यावृत्तिमात्रवृत्तित्वादिति भावः । अत इति तथाच धूमाभावकूटाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य निर्धूमवृत्तित्वसामान्याभावस्यैव वह्न्यादिहेतावसत्त्वान्न व्यभिचारिण्यतिव्याप्तिः । नचैवं गगणाभाववान् वाच्यत्वादित्यत्राव्याप्ति गगणस्यापि साध्याभावतया तदधिकरणाप्रसिद्धेरिति वाच्यं वृत्तिमत्त्वेनापि साध्याभावस्य विवक्षणीयत्वा न्नव्यमते गगणस्य स्वाभावविरहत्वे मानाभावाच्चेति (५) भावः । अत्र साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगितेत्यत्र समुदायपदस्य फलं ग्रन्थकृतैवोक्तं प्रतियोगिताव्यापकं साध्याभावसमुदायाधिकरणवृत्तित्वत्वमित्यत्र समुदायपदस्य फलन्तु नालोकावृत्तेरभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणं, तादृशाभावस्य स्वव्यापकसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्याभिप्रायेणासम्भवदानं, तद्रूपवान् तद्रसादित्यादावपि रसत्वावच्छिन्नवृत्तित्व—तदनवच्छिन्नवृत्तित्वोभयाभावमादायाव्याप्तिसम्भवादिति ध्येयम् ।

(५) नन्वत्र साध्यतावच्छेदकसंम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्त्वबुद्धेः संसर्गविधया प्रतिबन्धकतावच्छेदको यः सम्बन्ध स्तेन वृत्तिमतः साध्याभावकूटस्य तादृशसम्बन्धेनैवाधिकरणत्वस्योक्तत्वादिति ग्रन्थेनैव गगणस्वरूपाभावस्य लक्षणाघटकत्वेन गगनस्वरूपाभावमादायाव्याप्तिदानं वृत्तिमत्त्वेनापित्यादिग्र-

केत्युक्तावपि वारणसम्भवाद्धूमत्वादावपि तदभावप्रतियोगितात्व-
स्वात्, परन्तु आलोकावृत्तिवृत्तित्वस्याभावमादायाव्याप्तिवारणमेव
तत्फलमिति प्राञ्चः, तत्तुच्छं स्वाश्रयनिष्ठात्यन्ताभावाप्रतियोगिनः
साध्याभावकूटाधिकरणवृत्तित्ववत्त्वस्याश्रये वर्त्तमानस्यात्यन्ताभाव-
स्याप्रतियोगिप्रतियोगिताकाभाववत्त्वेनैव तादृशवृत्तित्वाभावानां नि-
वेशात्तत्र च सकृदेव समुदायपदस्यान्तर्भावेनोभयथा तन्निवेशफ-
लानुसन्धानस्य वायसदशनानुसन्धानसमानत्वादन्यथा साध्याभा-
ववद्वृत्तित्ववत्त्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्ना-
भावस्यापि प्रतियोगिताव्यापकसाध्याभावकूटाधिकरणवृत्तित्ववत्त्वक-
त्वाभावादेव व्युदासात्तमादाय व्यभिचारिण्यतिप्रसङ्गवारणार्थं ग्र-
न्थकृता समुदायपदोपन्यासानौचित्यापत्तेरिति ध्येयं। धूमइति नाति-
व्याप्तिरित्यत्र ऽन्वयः एवमग्रेऽपि, इदमापाततः साध्यतावच्छेदक-
सम्बन्धावच्छिन्नाभावस्याप्रवेशेऽपि अतिव्याप्तेर्दुरुद्धरत्वात् साध्या-
भाववत्संयुक्तत्वसामान्याभावस्य कुत्रापि संयोगेन वृत्तिमत्यसत्त्वात्
(६) वह्न्यवयवमात्रसंयुक्तस्य वस्तुनोऽसत्त्वादिति ध्येयं (७)।
ननु सम्बन्धविशेषाविवक्षायां प्रलयोत्पन्नकर्म्म-नित्यरूपादिकमेव
वह्न्यभावकूटाधिकरणं वाच्यं विभुमूर्त्तयोर्यथायोगं कालिक-संयोग-
दिक्कृतविशेषणताभिर्वह्निमत्त्वेन द्रव्यस्य साध्याभावकूटवत्त्वविरहात्
वह्न्यसमानकालीनस्य धूमासंयोगिद्रव्यस्यासत्त्वात् (८) तथा च तत्र

ध्येन समाधानान्तरञ्च न सङ्गतं सत्यं पूर्वग्रन्थमस्पृत्यैवाव्याप्ति-
क्तानं, विवक्षणीयत्वादित्यन्तरं साध्यतावच्छेदकसम्बन्धेनेत्यादिग्र-
न्थेनेति उक्तं तेन न समाधानान्तरमिति ध्येयम्।

(६) साध्याभावकूटाधिकरणवृत्तित्वाभावस्य व्यधिकरणधर्म्मा-
वच्छिन्नाभावं विना वृत्तिमद्वृत्त्यप्रसिद्धत्वादित्याशयः। (७) व-
क्ष्यमाणविशेषणताविशेषसम्बन्धावच्छिन्नतादृशवृत्तित्वाभाववत्त्वा-
वच्छिन्नाधिकरणतासामान्यकत्वविवक्षणेऽतिव्याप्त्यादिदोषवारण-
सम्भवादित्याशयेन ध्येयमित्युक्तम्।

[८] नन्वत्र समवायेन वह्निसाध्यकधूमहेतुकस्थले सम्बन्धसा-

साध्याभावकूटाधिकरणे हेतुतावच्छेदकसंयोगसम्बन्धेन वृत्त्यप्रसिद्ध्यैव धूमे नातिव्याप्तिः समवायेन धूमस्य हेतुत्वेच विरुद्धत्वात् साध्यसामानाधिकरण्यविवक्षणादेव तद्व्युदाससम्भवादत आह संयोगेनेति, तथात्वे वह्नेः साध्यत्वं, तथाचात्र वह्न्यभावकूटाधिकरणं यन्नित्यरूपादिकं हेतुताघटकसमवायसम्बन्धेन तद्वृत्तित्वस्य रूपत्वादौ प्रसिद्धस्याभावोवर्त्तत एव वह्न्यवयववत्त्व इत्यतिव्याप्तिः स्यात् यदि साध्यतावच्छेदकसम्बन्धेन साध्याभावस्य प्रवेशो नस्यादिति भावः । ननु समवायेन वह्न्यभावस्य वह्न्यवयववत्त्वासमानाधिकरणत्वादग्रेवक्ष्यमाणेन साध्याभावानां हेतुसमानाधिकरणत्वविशेषणेनैव न तादृशाभावमन्तर्भाव्योक्तहेतावतिव्याप्तिरतो हेत्वन्तरमाह पर्व्वतेति अत्र समवायेन वह्न्यभावस्य पर्व्वते, संयोगेन वह्न्यभावस्यच वह्न्यवयवे हेतुसमानाधिकरणत्वात् तदुभयघटितसाध्याभावकूटस्याधिकरणं यन्नित्यरूपादिकं तत्समवेतत्वाद्यभावस्य तादृशसंयोगे हेतौ सत्त्वाद्भवत्यतिव्याप्तिः । यत्तु संयोगेन वह्नेः साध्यत्वे वह्न्यवयवत्वस्य विरुद्धत्वाद्धेतौ साध्यसामानाधिकरण्यविशेषणादेव तद्वारयितुं शक्यत इत्यतः पर्व्वतेत्यादिहेत्वन्तरमिति तत्तुच्छं वह्न्य-

---

मान्येन साध्याभावस्य विवक्षायामपि साध्याभाववत्त्वं चरमद्व्यणुक एव सत्त्वात्, तन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्यच प्रसिद्ध्या ग्रन्थासङ्गतिरिति, नच तेजस्त्वेन वह्निसाध्यकस्थलाभिप्रायेण ग्रन्थ उक्तस्तथाच चरमद्व्यणुककालेऽपि तेजसः सत्त्वात् न तेजस्त्वावच्छिन्नाभावः सम्बन्धसामान्येन द्व्यणुके वर्त्तत इति वाच्यम् वह्न्यसमानकालीनधूमसंयोगिद्रव्यस्यासत्त्वादित्यत्र संयोगिद्रव्यस्यासत्त्वादित्युक्त एव सामञ्जस्ये धूमपदस्य वैयर्थ्यात्, वस्तुतस्तु धूमप्रतियोगिकसंयोगेन धूमहेतुकस्थलाभिप्रायेणातिव्याप्त्युपन्यासान्न ग्रन्थासङ्गतिरिति, ननु साध्यतावच्छेदकसम्बन्धेन विवक्षायामपि तादृशवृत्तित्वसामान्याभावस्य हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्वृत्तित्वाभावादतिव्याप्तिः स्यादेवेति, चेन्न इदमापाततइति ग्रन्थेन स्वयमेव वक्ष्यमाणत्वादिति ध्येयम् ।

यवयवेऽपि संयोगेन वह्न्यन्तरवृत्ते विरोधविरहात् तादात्म्येन साध्यत्वानुरोधात् साध्यसम्बन्धिमात्रस्यैव सामानाधिकरण्ये प्रवेश्यत्वाच्चेति भावः। सम्बन्धद्वयेति पर्वतस्य संयोगावच्छिन्नवह्न्यभावानाधिकरणत्वात् वह्न्यवयवस्य समवायावच्छिन्नवह्न्यभावानाधिकरणत्वादिति भावः। नातिव्याप्तिरिति प्रागुक्तरीत्या साध्याभावकूटाधिकरणनिरूपादौ हेतुताघटकसंयोगसम्बन्धेन वृत्त्यप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिर्वेत्यपि द्रष्टव्यं। अत्रच वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वमत एवेदमुक्तं, तेन धनी चैत्रत्वादित्यादौ स्वत्वादिसम्बन्धेन साध्यतायां नाव्याप्तिः, साध्यतावच्छेदकसम्बन्धातिरिक्तसमानाधिकरणसम्बन्धानवच्छिन्नप्रतियोगिताकसाध्याभावो ग्राह्य इतितु न युक्तं, धनी द्रव्यत्वादित्यादौ व्यधिकरणसम्बन्धावच्छिन्नसाध्याभावस्यैव तादृशत्वेनातिव्याप्तिप्रसङ्गात्. ननु साध्याभावो यदि साध्यतावच्छेदकरूपेण विवक्षितस्तदा प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः, प्रमेयत्वावच्छिन्नप्रतियोगित्वाप्रसिद्धेः, (९) नच साध्यतावच्छेदकातिरिक्तसमानाधिकरण (१०) धर्मानवच्छिन्नप्रतियोगिताकाभाव एव. साध्याभावो वक्तव्यः, तथाचावृत्तिगगनादिना प्रमेयादेरभाव एव साध्याभावः सुलभ इतिवाच्यम् तादृशगुणघ्राणग्राह्यगुणवान् द्रव्यत्वादित्यादावतिव्याप्तिप्रसङ्गात् तादृशगुणत्वस्य ग्राह्यगन्धत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया व्यधिकरणधर्मावच्छिन्नाभावानामेव तादृशाभावत्वादत आह तथेति,

---

[९] प्रमेयत्वेन घटत्व-पटत्वोभयाभावसत्त्वादुक्ताप्रसिद्धिप्रदर्शनमनुचितं तन्न विषयत्वापेक्षया प्रमेयत्वस्य गुरुतया गुरुधर्मे प्रतियोगितानवच्छेदकत्वेन तदप्रसिद्धितादवस्थ्यादिति चिन्त्यम्

[१०] धर्मविधया साध्यतावच्छेदकातिरिक्तधर्मनिष्ठावच्छेदकत्वानिरूपकत्वनिवेशे गुरुधर्म-साध्यतावच्छेदकस्थले तादृशनिरूपकत्वव्यक्तीनां विशेष्य निवेशस्यावश्यकतया व्यधिकरणधर्मनिष्ठावच्छेदकतानिरूपकत्वव्यक्तित्वावच्छिन्नाभावस्यापि तादृश-

(११) स्वं प्रतियोगिता, प्रतियोगिताव्यापकसाध्यतावच्छेदकत्वस्य-
स्य फलमाह पृथिवीत्वाभावादाविति तत्सद्विपक्षो घटादिस्तथाच
घटावृत्तित्वावच्छिन्नाभाव---पटावृत्तित्वावच्छिन्नाभावादिघटितसा-
ध्याभावकूटाधिकरणाप्रसिद्ध्या पृथिवीत्वाभाववान् जलत्वादित्या-
दिसद्धेतौ नाव्याप्तिः, घटावृत्तित्वावच्छिन्नाभावप्रतियोगितायाः पट-
त्वादेरपि सत्त्वेन साध्यतावच्छेदकस्य तदव्यापकतया तादृशाभा-
वानां लक्षणाघटकत्वात् प्रतियोगिभेदे ऽप्येकधर्मावच्छिन्नप्रतियो-
गिताया एकत्वादिति भावः। सद्धेताविति नाव्याप्तिरित्यन्वयः वह्नि-
मान् धूमादित्यत्र साध्यतावच्छेदकसंयोगसम्बन्धेन विपक्षीभूतः-स-
त्त्वजलाद्यवृत्तित्वावच्छिन्नाभावकूटस्य गुणादौ, द्रव्यं पृथिवीत्वादि-
त्यत्रच विपक्षीभूतरूपरसादिप्रत्येकासमवेतसामान्याभावकूटस्य जा-
त्यादावधिकरणतासत्त्वा त्तदप्रसिद्धिनिबन्धनाव्याप्ति रुक्तस्थले वि-
रहात्तदुभयं नोदाहृतं, ननु यावतामैकाधिकरण्यं तावत्समुदायस्य
विवक्षायां नोक्ताव्याप्तिरत आह पृथिवीत्वादाविति, साधनसमाना-
धिकरणत्वेन साध्याभावस्य विशेषणीयत्वे जातित्वावच्छिन्नाभाव-
मादाय नातिव्याप्तिसम्भवे इत्यादिपदमुपात्तं तथाच जलासमवेत-
त्वावच्छिन्नाभावस्य तेजोऽसमवेतत्वावच्छिन्नाभावस्यच साधनस-
मानाधिकरणत्वात्तदुभयघटितसाध्याभावकूटाधिकरणजात्यादौ प्र-
कृतहेतावसत्त्वादतिव्याप्तिरिति भावः। द्रव्यत्वस्य समवायेन हेतुत्वे
तादृशसाध्याभावकूटवति जात्यादौ हेतुतावच्छेदकीभूतसमवायस-

टान्तर्गततया गौरवमतः समानाधिकरणेति। [११] अत्र स्वव्याप-
कसाध्यतावच्छेदकव्यापकप्रतियोगिताकसाध्याभावस्य निवेशेऽपि
वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्ति रुक्तोभयाभावीयप्रतियोगि-
त्वस्य धूमे स्वीकारादन्यथा तादृशप्रतियोगितावच्छेदकं धूमत्वमिति
यत् अवच्छेदकत्वनिरुक्तौ जगदीशेनाभिहितं अतिप्रसक्तधर्मे अव-
च्छेदकत्वासम्भवात् तदसङ्गत्यापत्तेस्तथाचोक्ताभावस्य साध्यताव-
च्छेदकव्यापकप्रतियोगिताकत्वाभावात् व्यधिकरणधर्मावच्छिन्ना-
भावस्यैव लक्षणघटकत्वात् अस्यो॰॰॰रं चिन्त्यम्।

म्बन्धेन वृत्त्यप्रसिद्धैश्यव गातिव्याप्तिःस्यादतउक्तं द्रव्यत्वप्रकारकेति सामान्यादौच स्वरूपसम्बन्धेन वृत्ति वाच्यत्वादेरेव सुलभा प्रमा-विशेष्यत्वादावितति नाविव्याप्तिरित्यन्वयः, भ्रमात्मकताद्दशप्रतीति-विषयत्वं जात्यादावपीत्यतः प्रमेति, अत्र प्रतियोगितां प्रति व्यापकत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव ग्राह्यं तेन नित्यज्ञानवतः (१२) तादात्म्येन साध्यतायामीश्वरत्वादिहेतौ घटान्यभेदस्य पटान्यभेद-स्यच द्वयोर्विषयतासम्बन्धेन प्रतियोगिताव्यापकीभूतनित्यज्ञानात्म-कसाध्यतावच्छेदकव्यापकप्रतियोगिताकयोरेकाधिकरणाप्रसिद्धा-वपि नाव्याप्तिः नवा (१३) ताद्दशएव साध्ये द्रव्यत्वादिप्रकारकप्र-माविषयत्वादित्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्या-दिनवद्रव्याणां प्रत्येकभिन्नद्रव्यभेदकूटस्याधिकरणे गुणादौ हेतावस-त्वेऽप्यतिव्याप्तिः (१४) नचैवं वह्निधूमोभयवान् धूमादित्यत्राव्याप्तिः प्रतियोगितामात्रस्यैव प्रत्येकपर्य्यवसितत्वेन तां प्रति पर्य्याप्त्याख्य-

---

[१२] प्रतियोगिताव्यापकसाध्यतावच्छेदकं यदि स्ववृत्ति-य-
त्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वसम्बन्धेन
साध्यतावच्छेदकाभाववत्प्रतियोगित्वमुच्यते तदा विषयत्वसम्ब-
न्धेन स्ववृत्तिप्रतियोगिताकाभाववद्वृत्तित्वसम्बन्धेन ज्ञानस्य घटा-
न्यभेदीयप्रतियोगितायां सत्वात् घटान्यभेदे ताद्दशसाध्यतावच्छे-
दकाभाववत्प्रतियोगिताकत्वविरहेण लक्षणाघटकतया नाव्याप्ति-
रतो नित्यपदं, नित्यपदोपादानेच विषयत्वसम्बन्धावच्छिन्नस्ववृत्ति-
प्रतियोगिताकाभाववद्वृत्तित्वसम्बन्धस्य नित्यज्ञानस्य व्याधिकरण-
सम्बन्धत्वेन, घटान्यभेदादेरुक्तसम्बन्धेन नित्यज्ञानात्मकसाध्यताव-
च्छेदकाभाववत्प्रतियोगिताकतया लक्षणघटकत्वेनाव्याप्तिरिति ध्येयं।

[१३] ननु साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छे-
दकविशिष्टसाध्यवत्त्वबुद्धेः संसर्गविधया प्रतिबन्धकतावच्छेदक-
सम्बन्धेन वृत्तिमतामेव साध्याभावानां प्रवेश्यत्वाद्घटत्वात्मकघटा-
न्यभेदादेस्ताद्दशस्वरूपसम्बन्धेन वृत्तित्वाप्रसिद्ध्या लक्षणाघटक-
त्वान्न ताद्दशकूटमादायोक्तातिव्याप्तिरत आह नवेति [१४] यद्यपि
पृथिवीभिन्नभेद-घटादिभिन्नभेदानामपि यावत्साध्याभावान्तर्गतत्वात्

साध्यतावच्छेदकताघटकसम्बन्धेन कस्याप्यव्यापकतया निरुक्तसा-
ध्याभावाप्रसिद्धेरिति वाच्यं, एकत्रिशिष्टापरत्वानतिरिक्तस्योभयत्वस्य
सार्व्वभौममते पर्य्याप्तिभिन्नसम्बन्धेनैव साध्यतावच्छेदकत्वात्, सा-
ध्यतावच्छेदकपदेन साध्यनिष्ठप्रतियोगित्वस्योपलक्षणात् साध्यनि-
ष्ठप्रतियोगित्वसम्बन्धेनैव वा साध्यतावच्छेदकप्रतियोगिताव्यापक-
त्वस्योक्तत्वात् इति भावः। साध्यतावच्छेदकव्यापिका प्रतियोगिते-
त्यस्य फलमाह नापीति, घटत्वाभावत्वेन साध्यत्वे साध्याभावकूट-
वत्त्वं घटस्यैव सुलभमत उक्तमभावत्वादिनेति, आदिना प्रमेयत्वादे-
रुपग्रहः तथाचाभाववान् प्रमेयवान्वा घटत्वादित्यत्र साधनसमा-
नाधिकरणस्य तत्तद्घटान्यत्वाभावकूटस्याधिकरणाप्रसिद्ध्या ऽव्याप्तिः
स्यादतः साध्यतावच्छेदकीभूताभावत्वादिव्यापकप्रतियोगिताकत्वा-
भावादेव तत्तद्घटान्यत्वाभावानां लक्षणाघटकत्वादिति भावः। अत्र
स्वन्यूनवृत्तिधर्म्मानवच्छिन्नाया एव प्रतियोगितायाः साध्यतावच्छे-
दकसमनैयत्यं वाच्यं, तेन घटत्वाभावत्वेन पटत्वाभावत्वेनच अभाव-
प्रमेयसामान्याभावयोरेकाधिकरणाप्रसिद्धावपि नोक्ताव्याप्तितादव-
स्थ्यं, घटत्वाभावत्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितान्यूनवृत्तित्वेन
तादृशप्रतियोगिताकाभावानां लक्षणाघटकत्वात्, साध्यसामानाधि-
करण्यमपि हेतौ वक्तव्यं तेन सत्तावत्समवेतत्वत्वसमनियतप्रति-
योगिताकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वा-

---

तेषामेकाधिकरणाप्रसिद्ध्यैव नातिव्याप्ति र्यावतामैकाधिकरण्यं ता-
वत्समुदायविवक्षितेऽपि तथा, तथाप्यादिपदेन तादात्म्येन नित्यज्ञा-
नवतः समवायेन साध्यत्वे तादृशहेतौ तत्तद्द्रव्यभिन्नसमवेतस्या-
भावादिकमादायातिव्याप्ति र्वोध्या, जात्यादावेव तादृशकूटाधिकरण-
त्वसम्भवात् अतएव द्रव्यत्वहेतुमुपेक्ष्य स्वरूपसम्बन्धेन वृत्तिमत-
द्रव्यत्वप्रकारकप्रमाविषयत्वस्योपादानं । नन्वात्मभिन्नद्रव्यभेदस्य
साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वाभावात् पृथिव्यादिनवद्र-
व्यानामित्यादिग्रन्थासङ्गतिश्चेन्न जीवभिन्नद्रव्यं न इत्यभावमन्तर्भाव्य
नवद्रव्यानामभावसम्भवात्।

त्तादृशस्यच यावत एव हेतौ सत्त्वेऽपि जात्यभाववान् द्रव्यत्वादि-
त्यादिविरुद्धहेतौ नातिव्याप्तेरितिध्येयं। यद्यपि घटवृत्तित्वविशिष्ट-
वाच्यत्वाद्यभावस्य घटान्यवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्यच द्वयो-
रेकाधिकरणाप्रसिद्धया वाच्यं ज्ञेयत्वादित्यादावव्याप्ति र्नच घटादि-
वृत्तित्वविशिष्टवाच्यत्वत्वं न प्रतियोगितावच्छेदकं तदपेक्षया लघो-
र्घटवृत्तित्वविशिष्टत्वस्यैव तथात्वात् तादृशविशिष्टत्वाद्यवच्छिन्ना-
भावानाञ्च साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकत्वाभावादेव
व्युदासः घटवृत्तित्वविशिष्टे वस्तुमात्रे तत्प्रतियोगितासत्त्वादिति
वाच्यं वाच्यत्वानिष्ठाधेयत्वविशेषेण घटावच्छिन्नप्रतियोगिताकाभा-
वस्य तादृशसम्बन्धेन घटान्यावच्छिन्नाभावस्यच द्वयोस्तथाप्यधि-
करणाप्रसिद्धया (१५) ऽव्याप्तितादवस्थ्यात्, नचाधेयताविशेषेण
घटादेः प्रतियोगितावच्छेदकत्वेमानाभावः, तस्य त्वयाप्यवश्यं वा-
च्यत्वादन्यथा घटवृत्तित्वविशिष्टवाच्यत्ववान् द्रव्यत्वादित्यादावति-
व्याप्त्यापत्तेर्गुरुतरतादृशविशिष्टवाच्यत्वत्वावच्छिन्नाभावस्याप्रसि-
द्धया घटवृत्तित्वविशिष्टत्वावच्छिन्नाभावस्यच साध्यतावच्छेदकस-
मनियतप्रतियोगिताकत्वाभावेन व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव
घटवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्य लक्षणघटकत्वात्, तथापि दूष-
णमिदं स्फुटतयोपेक्ष्य दूषणान्तरमाह पृथिवीत्वेति। ननु सार्व्वभौ-
मानां मते विरुद्धयोरुभयत्वस्यातिरिक्तत्वेऽपि समानाधिकरणयोरेक-
विशिष्टापरत्वमेवोभयत्वं तथाच पृथिवीत्वद्रव्यत्वोभयत्वमपि पृथि-
वीत्वविशिष्टद्रव्यत्वत्व—द्रव्यत्वविशिष्टपृथिवीत्वत्वमेव. साध्यता-

---

(१५) ननु वाच्यत्वानुयोगिकाधेयतया घटादेरवच्छेदकत्वक-
ल्पनमपेक्ष्य लाघवात् शुद्धाधेयत्वसम्बन्धेनैव घटे ऽवच्छेदकत्वात्
तादृशप्रतियोगिताव्यापकत्वस्य साध्यतावच्छेदके विरहाद्घटत्वा-
धिकरणतायां व्यभिचारान्नाव्याप्तिरिति ग्रन्थासङ्गति श्चेन्नानुगताधे-
यत्वत्वानङ्गीकर्त्तृमते तादृशान्यतमाधेयत्वसम्बन्धैर्घटादेरवच्छेद-
कत्वापेक्षया वाच्यत्वानुयोगिकत्वविशिष्टाधेयतया ऽवच्छेद-
कल्पने लाघवस्यानवकाशादिति ध्येयम्।

वच्छेदकीभूतं पर्य्यवसितमिति तत्समनियतप्रतियोगिताकत्वाभावादेव तदुभयान्यतरत्वावच्छिन्नाभावमादाय नातिव्याप्तिस्तत्प्रतियोगितायाः पृथिवीत्वेऽपि सत्त्वेन निरुक्तसाध्यतावच्छेदकस्य तदव्यापकत्वादतआह अपिचेति, उद्देश्यविधेयभावस्थले समानलिङ्गकत्वस्यातन्त्रत्वात् पृथिव्यामन्यत्वाविशिष्टद्रव्यत्वस्य साध्यताभ्रमं निराकर्तुं पक्षमुल्लिखति इदमिति, पृथिवीति पृथिव्यन्यत्वेसति द्रव्यान्यासमवेतसकलद्रव्यसमवेतवादित्यर्थः, नच सकलद्रव्यवृत्तित्वान्तर्भावेन द्रव्यत्वस्य साध्यत्वे द्रव्यान्यासमवेतत्वावच्छिन्नाभावस्य तादृशसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावाद्गुरुतरसकलद्रव्यवृत्तित्वघटितद्रव्यत्वत्वावच्छिन्नात्यन्ताभावस्याप्रसिद्धत्वादग्रे द्रव्यत्वत्वावच्छिन्नाभावमादायातिव्याप्तेरसङ्गत्यापत्तिरिति वाच्यं, द्रव्यत्वत्वादीत्यत्र द्रव्यत्वत्वपदेन द्रव्यमित्याकारक तद्बुद्धिप्रकारत्वस्यैवाग्रेवक्तव्यत्वात् तस्यच द्रव्यान्यासमवेतत्वमपेक्ष्यापि लघुत्वेन प्रतियोगितावच्छेदकत्वसम्भवादिति भावः। द्रव्यत्वत्वादीति आदिना पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्य पृथिवीवृत्तित्वविशिष्टद्रव्यत्वत्वस्यच द्वयोरवच्छेदकयोः परिग्रहः। ननु साध्यतावच्छेदकान्यसमानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदार्थो वाच्यः तथाच विशिष्टद्रव्यत्वस्य साध्यतायां द्रव्यत्वसामान्याभावस्यात्थात्वान्नातिप्रसङ्गः गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वोपगमाच्च ताद्रूप्येण साध्यतायामपि नातिव्याप्तिः, वस्तुतस्तु प्रतियोगितायाः साध्यतावच्छेदकस्यच स्वावच्छिन्नवत्तासम्बन्धेनैव परस्परव्यापकत्वं वाच्यमतः कथितस्थले द्रव्यत्वाद्यभावमादाय नातिव्याप्तिस्तत्प्रतियोगित्वावच्छिन्नंप्रति विशिष्टद्रव्यत्वत्वेनाव्यापकत्वात् प्रतियोगितायाः स्वावच्छिन्नवत्वन्तु स्वावच्छेदकसम्बन्धेनैव वाच्यं नतु साध्यतावच्छेदकसम्बन्धेन तेनायं तद्रूपान्यत्वविशिष्टरूपत्ववान् रूपत्वादित्यादौ तद्रूपान्यरूपान्यतमत्वाभावस्यापि निरुक्तसाध्याभावत्वात्तमादायैव नातिव्याप्तिरन्यथा तद्रूपान्यत्वविशिष्ट-

रूपत्वाद्यभावस्य प्रतियोगिन स्तद्रूपेऽपि समवायेन सत्त्वात् तादृशस्य लक्षणाघटकतया तत्रातिव्याप्त्यापत्तेः (१६) एवञ्च वृत्त्यनियामकसम्बन्धेन गुरुरूपेण वा साध्यतास्थले तयोः प्रतियोगितावच्छेदकत्वाभावेऽपि न क्षति नवा घटत्वेन वाच्यत्वाभावीयं वाच्यत्वनिष्ठं यत्प्रतियोगित्वं तस्यैव घटत्वेन पटाभावात्मकतादृशाभावीयपटनिष्ठप्रतियोगितया सममभेदे ऽपि केवलान्वय्यादावव्याप्तिरत आह किञ्चेति, ननु विशिष्टस्यातिरिक्तत्वमते द्रव्यत्वादिसामान्याभावस्य विशिष्टसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावादेव तमादाय नातिव्याप्तिरत आह किञ्चेति प्राञ्चः। सद्धेतौ वायुत्वादौ अप्रसिद्धिरिति कालस्य सकलरूपवत्त्वेऽपि साध्यवत्त्वग्रहविरोधिताघटकेन समवायसम्बन्धेन तदनधिकरणत्वादिति भावः। शङ्कते यावतामिति, तथाच व्यधिकरणधर्म्मावच्छिन्नाभावैरेकाधिकरणतापन्नस्य तत्तद्रूपस्याधिकरणे वृत्तित्वप्रसिद्ध्यैव नाव्याप्तिरिति भावः। विवक्षितेऽपीत्यपिना तदविवक्षायामपि वक्ष्यमाणातिव्याप्तिः सूचिता, ननु यावतां मिथःसामानाधिकरण्यं तावत्समुदायो विवक्षितः किम्वा यावतां साध्याभावान्तरेण सामानाधिकरण्यं तावत्समुदायोऽभिप्रेतः, प्रथमे इदमित्यादि अत्रेदमिति पृथिव्या विशेषणं ननु पक्षनिर्देशः तथासति घटतद्वायुवृत्तिद्वित्व-पटतद्वायुवृत्तिद्वित्व-कुड्यतद्वायुवृत्तिद्वित्वानामेव तद्वायौ मिथःसामानाधिकरण्यापन्नसाध्याभावानामधिकरणे तद्वायौ

---

(१६) ननु साध्यतावच्छेदकसम्बन्धेन स्वावच्छिन्नवत्तोक्तौ तादृशसाध्याभावाप्रसिद्ध्यैव नातिव्याप्तिरिति कथमतिव्याप्तिः सङ्गच्छते चेन्न तद्रूपान्यत्वविशिष्टरूपत्ववान् तद्व्यक्तित्वादित्यत्र तादृशाभावाप्रसिद्ध्याऽव्याप्तिवारणाय प्रतियोगिताव्यापकसाध्यतावच्छेदकमित्यस्य स्वावृत्तित्व–व्यधिकरणधर्म्मावच्छिन्नाभावीयान्यत्वोभयाभाववत्त्वसम्बन्धेन साध्यतावच्छेदकविशिष्टप्रातियोगित्वमेवार्थः, स्वावृत्तित्वघटकवृत्तित्वन्तु साध्यतावच्छेदकसम्बन्धेन स्वावच्छिन्नवत्तासम्बन्धेन स्ववन्निष्ठभेदप्रातियोगितावच्छेदकत्वाभाववत्तासम्बन्धेन भेदप्रतियोगितावच्छेदकत्वन्तु स्वावच्छिन्नवत्तास-

वृत्तिमत्त्वादेव वायुत्वादिहेतावतिव्याप्त्यनुपपत्तेः [१७] एतत्पृथिवी-समवेतप्रतियोगिकाभावस्य साध्यत्वे वायुत्वादेः सद्धेतुत्वात् समवेतत्वापेक्षया गुरुत्वेनैतत्पृथिवीसमवेतत्वावच्छिन्नाभावस्य चाप्रसिद्धस्यैव साध्यत्वायोगाद्गुणपदं। नन्वेतत् पृथिवीवृत्तिगुणत्वावच्छिन्नाभावसाध्यकमपि वायुत्वादिकं सद्धेतुरेव प्रलये परमाणावुत्पत्तिकालेचावयविनि वायौ तत्सत्त्वादतः साध्यान्तरमाह सत्तान्येति, अत्र पृथिवीपदं तत्पृथिवीपरं अन्यथा प्रागुक्तव्यक्तीनां पृथिवीत्वस्यच मिथःसामानाधिकरण्यापन्नसाध्याभावतया तत्कूटाधिकरणाप्रसिद्ध्यैवातिव्याप्त्यसम्भवापत्ते [१८] रिति ध्येयं। अत्रापि तत्पृथिवीसमवेतप्रतियोगिकाभावस्य केवलान्वयितया तत्र साध्ये वायुत्वादेः सद्धेतुत्वात् समवेतत्वापेक्षया गुरुत्वादेव तत्पृथिवी-

---

म्बन्धेन अत्र स्वपदं साध्यतावच्छेदकपरं तथाच तद्रूपान्यत्वविशिष्टरूपत्ववान् तद्व्यक्तित्वादित्यादौ घटत्वेन तद्रूपान्यत्वविशिष्टरूपत्वाभावमादाय लक्षणसमन्वयः उक्तस्थलेच व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकतया ऽतिव्याप्तिस्तादवस्थादिति ध्येयं। केचित्तु आधुनिकचित्रीकरणकृतो ग्रन्थमालोक्य एतादृशग्रन्थं न स्वीकुर्व्वन्ति तन्न वयं मन्यामहे ऽधिकप्राचीनपुस्तके तथादर्शनात्।

(१७) ननु तत्पृथिवीसमवेतशून्यत्वस्य साध्यत्वेऽपि तत्पृथिवीवायुवृत्तिद्वित्व–तत्पृथिवीवृत्तिरूप-घटादिवृत्तिरूपान्यतमाद्यात्मकसाध्याभावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्ति श्चेन्न यावतां मिथः सामानाधिकरण्यमित्यादिना वस्तुविशिष्टकूटत्वावच्छिन्नाधिकरणमेव साध्याभावकूटाधिकरणपदवाच्यं इतितात्पर्य्ये कूटत्वे वैशिष्ट्यन्तु स्वविशिष्टसाध्याभावत्वव्यापकाधिकरणवृत्तिसाध्याभावत्वावच्छिन्नानुयोगताकपर्य्याप्तिप्रतियोगित्वसम्बन्धेन ततश्च तादृशरूपाद्यन्यतमवृत्तिकूटत्वं न घत्तव्यमिति प्रचूरतरं विभावनीयम्।

(१८) ननु तद्रूपादिघटितमिथः सामानाधिकरण्यापन्नतादृशसाध्याभावसमुदायाधिकरणं पृथिवी भवति तथाच तादृशसमुदायाधिकरणप्रसिद्ध्या तद्वृत्तित्वेन अतिव्याप्तिसम्भवादेतत्पृथिवीपरतया व्याख्यानमफलं चेन्न साधनसमानाधिकरणत्वेन साध्याभावस्य निवेशात् तद्रूपादिघटितसाध्याभावसमुदायोऽत्र वारणीय

समवेतत्वावच्छिन्नाभावस्य चाप्रसिद्ध्या साध्यत्वायोगात् सत्तान्यपदं, नच सत्तान्यैतत्पृथिवीसमवेतत्वावच्छिन्नाभावोप्यप्रसिद्धः द्रव्यत्वत्वस्यैव तदवच्छेदकत्वादिति वाच्यं, सकलद्रव्यवृत्तित्वादिघटितस्य द्रव्यत्वत्वस्यैव तादृशसमवेतत्वापेक्षया ऽनवच्छेदकत्वादिति [१९] भावः। सत्तान्यसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वात् समवेतत्वावच्छिन्नाभावस्य च साध्यत्वे समवेतमात्रस्यैव तदभावतया मिथःसामानाधिकरण्यापन्नसमवेतकूटवति वायौ हेतोः सत्त्वादेव नातिव्याप्तिरतः पृथिवीपदं, ननु वायुत्वस्योक्तसाध्यसामानाधिकरण्याभावादेव न तत्राव्याप्तिरतो हेत्वन्तरमाह रूपवदिति, अयन्तु हेतुर्गुणादौ साध्यसमानाधिकरणः रूपात्यन्ताभावस्य पृथिव्यामप्युत्पत्तिकालावच्छेदेन सत्त्वात्तत्रातिव्याप्त्यसम्भवाद्रूपवदन्यत्वानुधावनं रूपवद्भेदस्यापि तदानीं पृथिव्यामुपगमेत्वाह इत्यादाविति आदिना वायुरूपान्यतरत्वादेः परिग्रहः तादृशेति मिथःसामानाधिकरण्यापन्न इत्यर्थः, द्वितीयेत्वाह वस्तुतइति, तादृशाभावेति व्यधिकरणधर्मावच्छिन्नसाध्याभावेत्यर्थः सहस्रेत्यवच्छेदकभेदेनाभावभेदमभ्युपेत्योक्तं दुर्व्वारैवेति, ननु यावतामेकव्यक्तिवृत्तित्वं तावत्समुदायस्याधिकरणोक्तौ नाप्रसिद्धिर्नवाप्रागुक्तातिव्याप्तिः, किञ्च स-

---

ङ्गति नाप्रसिद्ध्यभिधानासङ्गतिः नचैवं सति पृथिवीत्वघटितसमुदायाभिधानमयुक्तमिति वाच्यं पृथिवीत्वपदस्य पृथिवीसमवेतदर्शितद्वित्वत्रयाश्रय–तदनाश्रयवाय्वन्तरसाधारणचतुष्ट्वादिपरत्वेन विवक्षणादिति। (१९) ननु द्रव्यत्वत्वस्य तादृशसमवेतत्वापेक्षया गुरुत्वेऽपि द्रव्यान्यासमवेतत्वस्य लघुत्वेन सत्तान्यैतत्पृथिवीसमवेतत्वावच्छिन्नाभावस्याप्रसिद्ध्या तादृशाभावसाध्यकव्यभिचारिण्यतिप्रसङ्गोपादानमनुचितमिति चेन्न सत्तान्यैतत्पृथिवीसमवेतत्वपदस्य सत्तान्यनिष्ठैतत्पृथिवीनिरूपितत्वोपलक्षितसमवायसम्बन्धावच्छिन्नवृत्तित्वपरतया उपलक्षणपदार्थस्याभावप्रतियोगितानवच्छेदकत्वमते द्रव्यान्यासमवेतत्वापेक्षया तस्य गुरुत्वाभावेन तदापत्त्ययोगादिति ध्येयम्।

त्तान्यपृथिवीसमवेतशून्यत्वस्याभावो द्रव्यत्वमेव लाघवात् ननु सत्तान्यपृथिवीसमवेतमात्रं बहूनां तथात्वे गौरवादतः परस्परसामानाधिकरण्यापन्नतादृशद्रव्यत्वादिस्वरूपसाध्याभावस्तोमवति हेतोः सत्त्वादेव नोक्तातिव्याप्तिरिति यदि ब्रुयात्तदा दोषान्तरमाह किञ्चेति, यत्तु सत्तान्यपृथिवीसमवेतशून्यत्वस्य रूपसामान्याभावस्यचाभावो ऽनुगतप्रतीतिवलादतिरिक्त एवेति तद्वति हेतोः सत्त्वासत्त्वाभ्यां नोक्ताव्याप्त्यतिव्याप्त्योः सम्भव इति किञ्चेति, तन्मदं इदानीमेवाभावाभावस्यातिरिक्तत्वमतमङ्गीकृत्य दोषनिरासे भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावाभावस्याप्यतिरिक्तत्वादग्रे भूतत्वमूर्त्तत्वेत्यादिना ऽतिव्याप्त्यभिधानस्य सन्दर्भविरोधापत्तेः, साध्याभावकूटाधिकरणवृत्तित्वस्य संयोगसमवायादिप्रत्येकसम्बन्धेन प्रवेशमभिप्रेत्याह धूमादावित्यव्याप्तिरिति निर्व्वह्निसमवेतत्वसामान्याभावस्य यावदन्तर्गतस्य धूमे ऽसत्त्वादिति भावः। सम्बन्धसामान्येन तादृशवृत्तित्वस्य प्रवेशमभिप्रेत्याह साध्यतेत्यादि, कालादावित्यादिपदेन दिशः परिग्रहः, व्यभिचारिणि पृथिवी द्रव्यत्वादित्यादौ ननु धूमवान् वह्नेरित्यादौ तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तेर्विवक्षायामप्यतिव्याप्तिर्ध्रौव्यात् धूमाधिकरणे काल-दिगादौ मूर्त्तमात्रस्यैव संयोगसम्बन्धेन वृत्तेस्तत्सामान्याभावस्य हेतुताघटकसंयोगसम्बन्धेन यो वृत्तिमांस्तद्वृत्तित्वेन लक्षणाघटकत्वादिति ध्येयम्, सत्तादीत्यादिना समवेतादेः साध्यस्योपग्रहः, शङ्कते साधनेति, तथाच सद्धेतुस्थले व्यधिकरणधर्म्मावच्छिन्नसाध्याभावस्यैव साधनसमानाधिकरणत्वात् तत्कूटाधिकरणवृत्तित्वस्यापि तादृशाभावमादायैव लक्षणसङ्गति रित्थञ्च वृत्तिमद्वृत्तिपदस्य व्यावृत्तिर्व्यतिरेकिण्यपि सम्भवतीति द्रष्टव्यं, यथाचैवं साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वसार्थक्यं तथोपपादितं प्रागेव, यद्यपि हेतुसमानाधिकरणत्वेन साध्याभावानां निवेशे तादृशसाध्याभावकूटवद्वृत्तित्वत्वे प्रतियोगिताव्यापकत्वस्योपादानं विफलं वह्निमान् धूमादित्यादावालोकाद्व-

त्तित्वावच्छिन्नाभावमादाय व्याप्तिप्रसङ्गस्य तादृशाभावे साधनसमा-
नाधिकरणसाध्याभावकूटा धिकरणवृत्तित्वत्वव्यापकप्रतियोगिताक-
त्वाभावादेव व्युदासात् । चात्र कल्पे तादृशवृत्तित्वत्वस्य प्रति-
योगिताव्यापकत्वदलं न देयमेवेति वाच्यं तथासति साधनसमानाधि-
करणसाध्याभावकूटाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य द्र-
व्यवृत्तित्वाभावस्यैव स्पर्शवदन्यत्वहेतावसत्त्वादग्रे भूतत्व—मूर्त्तत्वे-
त्यादिनातिव्याप्तेरसङ्गत्यापत्तेस्तथापि वृत्तित्व—आलोकान्यत्वोभ-
यत्वावच्छिन्नस्यापि हेतुसमानाधिकरणसाध्याभावकूटाधिकरणवृ-
त्तित्वत्वव्यापकप्रतियोगिताकस्य धूमहेतावसत्त्वेन तमादायाव्याप्ति-
वारकत्वेनैव तस्य सार्थकत्वं । नच पर्व्वतवृत्तित्व–पर्व्वतान्यवृत्तित्वो-
भयत्वावच्छिन्नाभावमादायाव्याप्तिवारणार्थं व्यासज्यवृत्तिधर्म्मानव-
च्छिन्नत्वेन प्रतियोगिता ऽवश्यं विवक्षणीया इति (२०) तत एवोक्ता-
भावस्य व्युदास इति वाच्यं, पर्व्वतवृत्तित्व—पर्व्वतान्यवृत्तित्वोभय-
त्वावच्छिन्नाभाववारणाय वृत्तित्वपर्य्याप्तव्यासज्यवृत्तिधर्म्मानवच्छि-
न्नत्वेनैव (२१) प्रतियोगिताया वक्तव्यत्वात् तादृशप्रतियोगिताक-
त्वस्यच वृत्तित्वालोकान्यत्वोभयाभावेऽपि सत्त्वादिति ध्येयं । भूत-
त्व-मूर्त्तत्वान्यतरप्रतियोगिकाभावस्य केवलान्वयित्वात्तत्र साध्ये स्प-
र्शवदन्यत्वादित्यादिकं सद्धेतुरेव इत्यत उक्तमन्यतरत्वेनेति, तादृशेति
हेतुसमानाधिकरणो यो भूतत्वमूर्त्तत्वोभयघटितसाध्याभावस्तोम स्त-
द्वतीत्यर्थः । पृथिव्यादावित्यादिना जलतेजोऽनिलानां परिग्रहः, अत्र
भूतत्वं विशेषगुणवत्त्वे सत्यात्मभिन्नत्वं नतु वहिरिन्द्रियग्राह्यजाती-
यविशेषगुणवत्त्वं, मूर्त्तत्वमपि स्पर्शवन्मनोन्यतरत्वं जातिविशेषोवा
नत्ववच्छिन्नपरिमाणवत्त्वं तथासति मनःपरिमाण-शब्दयोरेव साध-

---

(२०) तद्धूमीयसंयोगेन धूमहेतुकस्थले तादृशसम्बन्धेन यो-
वृत्तिमान् तद्वृत्तियावदभावस्य हेतौ सत्त्वेनासम्भवासम्भवादव्या-
प्तिरित्युक्तं । (२१) अत्र वृत्तित्वपर्य्याप्तत्वाविशेषणन्तु अखण्डाभाव-
घटकतया सार्थक्यं बोध्यम् । ननु साध्याभाववद्वृत्तितात्वेन पर्व्व-
तवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयाभावमादायाव्याप्तिरिति तु न युक्तं
तादृशव्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वपदेन तादात्म्यसम्बन्धेन ता-
दृशव्यासज्यवृत्तिधर्म्मविशिष्टान्यत्वस्यैव विवक्षणादिति न दोषः
उक्ताभावप्रतियोगित्वस्य प्रतियोग्यंशे प्रकारीभूततादृशधर्म्मस्वरू-
पत्वादिति विभावनीयम् ।

नसमानाधिकरणतादृशसाध्याभावयोरेकाधिकरणाप्रसिद्धया ऽतिव्याप्त्यसम्भवादिति द्रष्टव्यं । ननु साधनाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिसाध्याभावकूटस्य निवेशान्नैष दोषः क्वचिदपि स्पर्शवद्भिन्न भूतत्वमूर्त्तत्वोभययोरसत्त्वात् तदुभयान्यतरघटितसाध्याभाववत्याकाशे मनसिच हेतोः सत्त्वात्, वस्तुतः संमनियताभावानामैक्यमते भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावो भूतत्व-मनस्त्वान्यतरत्वावच्छिन्नस्य मूर्त्तत्वगगनान्यतरत्वावच्छिन्नस्यचाभावः तथाच मनस्त्वगगणत्वयोरपि भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावस्य साध्यस्याभावत्वात् हेतुसमानाधिकरणतदुभयघटितकूटाधिकरणाप्रसिद्धयैव नोक्तस्थले ऽतिव्याप्ति रस्तुवा यावन्ति निरुक्तसाध्याभावत्वानि तावतां प्रत्येकावच्छिन्नस्य यदधिकरणं तद्वृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वमेव व्याप्तिस्तथाच भूतत्वमूर्त्तत्वान्यतराभावाभावत्वावच्छिन्नस्याधिकरणे मनस्येव हेतोः सत्त्वान्नातिव्याप्तिरत आह किञ्चेति, ननु भूतत्व-मूर्त्तत्वान्यतरत्वावच्छिन्नाभावस्याभावो ऽनुगतव्यवहारादतिरिक्त एव नतु भूतत्व-मूर्त्तत्वोभयस्वरूपः, तथाच साधनसमानाधिकरणतादृशाभाववति गगणे मनसिवा हेतोः सत्त्वान्नातिव्याप्तिरतआह किञ्चेति इत्यपि वदन्ति । गुरुचरणास्तु ननु यावन्तो हेतुसमानाधिकरणाः पदार्थाः साध्यवद्वृत्तित्व-व्यधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वोभयाभाववन्तस्तावत्पदार्थकूटाधिकरणवृत्तित्वाभावा वृत्तिमद्वृत्तयो यावन्तस्तद्वत्त्वं विवक्षितं तथाच हेतुसमानाधिकरणयोर्गगणत्व-मनस्त्वयोरेव तादृशपदार्थयोरेकाधिकरणाप्रसिद्धया नातिव्याप्तिर्निरुक्तोभयाभाववतां घटत्व-पटत्वादीनामेकाधिकरणाप्रसिद्धया वह्निमान् धूमादित्यादावव्याप्तेः (२२) हेतुसामानाधिकरण्योपादानमित्यतः किञ्चेतीति प्राहुः। कालान्यत्वसाध्यकस्य कालिकसम्बन्धेन हेतोर्विरुद्धत्वादेव तत्रनातिव्याप्तिरतउक्तं महेति तथाच महाकालान्यो घटादित्यादावित्यर्थः। वृत्तिमन्मात्रस्यैवेति तथाच महाकालवृत्तित्वसामान्याभावस्य वृत्तिमद्वृत्तित्वाभावाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्यच यावत एव हेतौ सत्त्वाद-

(२२) अत्रासम्भवसम्भवे ऽव्याप्तिदानमसङ्गतमिति चेन्न स्वरूपसम्बन्धेन साध्यवद्वृत्तित्वोक्तौतु अभावे स्वरूपसम्बन्धेन वृत्तिमत्त्वविशेषणदानात् वाच्यं ज्ञेयत्वादित्यत्राव्याप्त्यभावाद्वह्निमान् धूमादित्यादावव्याप्तिस्तु घटाधिकरणत्व-पटाधिकरणत्वमादाय इति-

तिव्याप्तिरिति भावः। अत्र केचित् सार्व्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्तित्वात् खण्डकालाद्यवच्छेदेन घटादावेव वृत्तिमति वर्त्तमानस्य महाकालवृत्तित्वसामान्याभावस्य यावद्धेत्वधिकरणावच्छेदेन हेतावसत्त्वान्नातिव्याप्ति वृत्तिमद्वृत्तायो यावन्तस्तादृशवृत्तित्वाभावा यावद्धेत्वधिकरणावच्छेदेन तद्वत्त्वस्य विवक्षितत्वादतएव तद्रूपं गुणत्वादित्यादौ तद्रूपभिन्नसमवेतत्वत्वसमनियतप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेऽपि नातिव्याप्तिस्तद्रूपावच्छेदेन गुणत्वादावेव वर्त्तमानस्य तद्रूपभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणगुणान्तरावच्छेदेन हेतावसत्त्वादित्याहु (२३) स्तच्चिन्त्यं। यत्तु वृत्तिमद्वृत्ताय इत्यस्य वृत्तिमद्वृत्तित्व--साध्यवद्वृत्तित्वप्रतियोगिकत्वोभयानधिकरणत्वमर्थस्तथाच—महाकालवृत्तित्वसामान्याभावस्यापि साध्यवद्वृत्तित्वप्रतियोगिकत्वविरहेण निरुक्तोभयानधिकरणस्य हेतावसत्त्वान्महाकालान्योघटादित्यादौ नातिव्याप्तिः नच महाकालवृत्तित्वत्वापेक्षया लघोः कालिकसम्बन्धावच्छिन्नवृत्तित्वत्वस्यैव महाकालवृत्तित्वाभावप्रतियोगितावच्छेदकतया महाकालवृत्तित्वसामान्याभावस्य न निरुक्तवृत्तिमद्वृत्तित्वं वृत्तिमदवृत्ते स्तस्य साध्यवद्वृत्तित्वप्रतियोगिकत्वादिति वाच्यं, यावन्ति कालिकसम्बन्धेन महाकालवृत्तित्वानि तावदन्यतमत्वावच्छिन्नाभावस्य तावद्धर्म्मिकयत्किञ्चिद्बुद्धिविशेष्यत्वावच्छिन्नाभावस्य वा निरुक्तोभयानधिकरणस्य हेतावसत्त्वेन तथाप्यतिव्याप्त्यसम्भवात्, कालिकसम्बन्धावच्छिन्नवृत्तित्वत्वमपेक्ष्य तावदन्यतमत्वलक्षणाखण्डभेदस्यैव लाघवेन प्रतियोगितावच्छेदकत्वौचित्यादिति तन्मन्दं तथापि नित्यज्ञानभिन्नं घटत्वादित्यादौ विषयितासम्बन्धेन हेतावतिव्याप्तेर्वज्रलेपत्वात् नित्यज्ञानवि-

---

भावः। (२३) अथात्र कल्पे वह्निमान् धूमादित्यादावव्याप्तिः धूमावयवावच्छेदेन साध्याभावकूटवत्संयुक्तत्वसामान्याभावस्य वृत्तिमति धूमादौ प्रसिद्धस्य यावद्धेत्वधिकरणावच्छेदेन हेतावसत्त्वात्, नच हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिद्धेत्वधिकरणावच्छेद्यत्वेन साध्याभावकूटवद्वृत्तित्वाभावस्य विशेषणीयतया तादृशवृत्तित्वाभावो न लक्षणघटक इति वाच्यं धूमान्तरसंयुक्तस्वावयवावच्छेदेन वृत्तिमति यत्किञ्चिद्धूमे प्रसिद्धस्य तादृशवृत्तित्वसामान्याभावस्य यावद्धेत्वधिकरणावच्छेदेन हेतावसत्त्वात्तथाप्यव्याप्तेरिति चेदत्र न-

षयत्वसामान्याभावस्याप्रसिद्धत्वात् व्यधिकरणधर्म्मावच्छिन्नताद्व-शाविषयत्वाभावस्यच यावत एव हेतौ सत्वात्, नव्यास्तु साधन-समानाधिकरणा व्याप्यवृत्तयो यावन्तः साध्याभावाः साध्यसामाना-धिकरण्यापन्नतावत्कूटाधिकरणवृत्तित्वाभावो विवक्षितस्तथाच व्य-भिचारिमात्रएव साध्यसामान्याभावादिघटितकूटस्य साध्यसामाना-धिकरण्याप्रसिद्ध्यानातिप्रसङ्गः यावन्तस्ताद्दशाः साध्याभावास्तत्कू-टाधिकरणस्य वा साध्यवत्वं विवक्षितं लाघवात् ताद्दशवृत्तित्वाभा-वस्यतु यावत्वं वृत्तिमद्वृत्तित्वं वा ऽनपेक्षितं वैयर्थ्यादित्थञ्च सा-धनसमानाधिकरणा यावन्तस्ताद्दशाः साध्याभावाः साध्याश्रयीभू-ततावत्कूटाधिकरणवृत्तित्वमपिलक्षणं साधीय इति प्राहुः। वस्तुतः पूर्व्वलक्षणइवात्रापि वृत्तिमद्वृत्तयो-यावन्तः साध्याभाववद्वृत्ति-त्वाभावास्तद्वत् – स्वावच्छिन्नाधिकरणतासामान्यकतद्धर्म्मवत्वमेव व्याप्तिर्वाच्या तत्रच वृत्तिमद्वृत्तित्वं साध्याभाववद्वृत्तित्वञ्च दैशि-कविशेषणतयैव वक्तव्य मतो न कोपि दोषः पदमादधातीत्यवधा-तव्यमिति दिक् ।०।

इतिजगदीशकृतसार्व्वभौमीयकूटघटितलक्षणव्याख्या समाप्ता ।

एतेनेति महाकालान्यो घटादित्यादावतिव्याप्तिप्रसङ्गेनेत्यर्थः, प-रास्तमिति परेणान्वयः अत्र वाच्यं ज्ञेयत्वात् सत्तावान् द्रव्यत्वादि-त्यादौ नानाव्यक्तिसाध्यकसद्धेतौ [१] तद्व्यक्तिवृत्तित्वविशिष्टसाध्या-वीनाः हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्व-स्मिन् वर्त्तमाना, हेतुसमानाधिकरणसाध्याभावसमुदायाधिकरणवृ-त्तितात्वसमनियतप्रतियोगिताका यावन्तो ऽभावा यावद्धेत्वधिकर-णावच्छेदेन हेतौ तद्वत्वस्य विवक्षितत्वान्न कोऽपि दोषः स्वपदं वृ-त्तिमत्वेनाभिमतपरमिति प्राहुः। विशेषतः सिंहव्याघ्रीयजागदीशी-टीकायां दर्शनीयं ।

इति श्रीअन्नदाचरणतर्कवागीशकृतप्रभाग्रन्थे कूटघटित-सार्व्वभौमीयलक्षणविचारःसमाप्तः ।०।

(१) नानाव्यक्तिसाध्यके वह्निमान्धूमादित्यादौ नत्विदमित्या-दावित्यस्य विशेषणं तथात्वे सत्तायाश्चैकव्यक्तित्वेन प्रसिद्धस्थलत्या-गेन व्यासङ्गति प्रसङ्गात् ।

भावस्य तदन्यव्यक्तिवृत्तित्वविशिष्टसाध्याभावस्यच द्वयोः साधन-
समानाधिकरणयो रेकाधिकरणाप्रसिद्ध्या यत्किञ्चिद्व्यक्तिवृत्तिकूटा-
धिकरणवृत्तित्वसामान्याभावानां हेतावसत्त्वेन वा ऽव्याप्तिरतः प्रति-
योगिताक्रान्तं यावदभावविशेषणं, विशिष्टसत्तावान् जातेरित्यादौ
जातिसमानाधिकरणस्य साध्यीभूत-सत्ताव्यापकतावच्छेदकरूपाव-
च्छिन्नाभावस्य व्यधिकरणधर्म्मावच्छिन्नाभावत्वनियमात् वृत्तिमद्-
वृत्ते स्तत्कूटाधिकरणवृत्तित्वाभावस्य यावत एव तत्र हेतौ सत्त्वाद-
तिव्याप्ति [२] रतः साध्यतावच्छेदकावच्छिन्नेति तथाच गुणान्य-
त्वाभाव--कर्म्मान्यत्वाभावयोरप्युक्तरूपावच्छिन्नप्रतियोगिताकत्वा-
त्तदुभयघटितकूटाधिकरणाप्रसिद्ध्यैव नातिव्याप्तिः। अत्रापि येन
सम्बन्धेन व्यापकता तेन सम्बन्धेनाभावो निवेश्यः तेन समवाया-
वच्छिन्नवह्न्यभावघटितकूटाधिकरणवृत्तित्वाभावस्य वह्न्यवयवत्वा-
दिनिष्ठस्य हेतावसत्त्वेऽपि वह्निमान् पर्व्वतत्वादित्यादौ नाव्याप्तिः।
नतु विशेषणताविशेषेणैव साध्यव्यापकत्वं तादृशरूपावच्छिन्ना-
भावश्च ग्राह्यः, साध्यस्य गुणसामान्यस्याभाव इत्युत्तरग्रन्थविरोधात्
गुणस्य दैशिकविशेषणतासम्बन्धेन गुणाव्यापकत्वात्। यत्तु साध्य-
तावच्छेदकसम्बन्धेनैव व्यापकत्वं तादृशरूपावच्छिन्नाभावश्च नि-
वेश्य इति, तत्तुच्छं वृत्त्यनियामकसम्बन्धेन साध्यतायां तदवच्छि-
न्नप्रतियोगित्वाऽप्रसिद्ध्या ऽव्याप्तिप्रसङ्गात् धूमवान् वह्नेरित्यादाव-
तिव्याप्तेश्च संयोगेन द्रव्यस्याव्याप्यवृत्तितया व्यधिकरणधर्म्माव-
च्छिन्नप्रतियोगिताकानामेव संयोगसम्बन्धावच्छिन्नद्रव्याभावानां
व्याप्यवृत्तित्वात्तत्कूटाधिकरणवृत्तित्वसामान्याभावस्य वृत्तिमद्वृत्ते
र्व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव तथात्वात् तादात्म्येन प्रमेयव्या-
पकतावच्छेदकं यत्प्रमेयत्व-वाच्यत्वादिकं तेन सम्बन्धेन तदवच्छि-
न्नाभावाप्रसिद्ध्या तादात्म्येन प्रमेयसाध्यके सद्धेताव्याप्तेरसङ्कदा-
वेदितत्वाच्च, नच द्रव्यं घटादित्यत्र कालिकसम्बन्धेन हेतावतिव्याप्तिः
साधनसमानाधिकरणद्रव्यत्वाभावकूटस्य कालिकसम्बन्धेनाधिकरणे
महाकाले हेतुतावच्छेदकसम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्ते र्व्यधिक-
रणधर्म्मावच्छिन्नाभावस्यैव तथात्वादिति वाच्यं दैशिकविशेषण-

---

(२) अत्र साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक-
स्य गुणान्यत्वाद्यभावस्याधिकरणाप्रसिद्ध्या ऽतिव्याप्तिनिरासादा-
वित्पदमुपात्त-मादिना घटाभाववृत्तित्वाविशिष्टवाच्यत्ववान् अभाव-

तया तादृशयावदभावाधिकरणत्वस्य निर्वचनीयत्वादिति भावः ।
तद्घटभिन्नं घटत्वादित्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्न-
प्रतियोगिताकयावदभावाधिकरणीभूततद्घटवृत्तित्वस्य व्यधिकरण-
धर्म्मावच्छिन्नाभावो घटत्वेऽपीत्यतिव्याप्तिरतउक्तं यावन्त इति
धूमवान् वह्नेरित्यादौ नातिव्याप्तिस्तत्र तत्तदयोगोलकावृत्तित्वावच्छि-
न्नाभावकूटाधिकरणाप्रसिद्धेः वह्निमान् संयोगसामान्याभाववान् वा
धूमादित्यादावव्याप्तिः साधनसमानाधिकरणस्य साध्यव्यापकता-
वच्छेदकीभूतसंयोगसामान्याभावत्वावच्छिन्नप्रतियोगिताकस्य व-
ह्निसंयोगकूटस्याधिकरणाप्रसिद्धेरतो व्याप्यवृत्तिपदमित्याह केवले-
त्यादिना, केवलान्वयिन इत्यनेन साध्यव्यापकत्वमाविस्कृतं संयो-
गादीत्यादिना वह्निसंयोगत्वाद्यवच्छिन्नाभावसंग्रहः तेन प्राचां मते
द्रव्ये संयोगसामान्याभावस्यासत्त्वेऽपि न क्षतिः दैशिकाव्याप्यवृत्ति-
साध्यके प्रयोजनमुक्त्वा कालिकाव्याप्यवृत्तिसाध्यके तदाह एव-
मिति, ननु तादृशरूपावच्छिन्नप्रतियोगिताकानां वास्तवाभावानामेव
लक्षणघटकत्वात् संयोगात्मकाभावमादाय नाव्याप्तिरतउक्तं एवमि-
तीत्यपि केचित्, न व्याप्यवृत्तिरिति तथाच गुणसामान्याभावस्य सा-
धनसमानाधिकरणत्वेऽपि व्याप्यवृत्तित्वाभावादेव गुणवान् द्रव्य-
त्वादित्यादौ नाव्याप्तिरन्यथा गुणसामान्याभावस्यापि साधनस-
मानाधिकरणसाध्याभावतया तद्घटितकूटाधिकरणसमवेतत्वसामा-
न्याभावस्य वृत्तिमति नित्यैकत्वादौ प्रसिद्धस्य द्रव्यत्वहेतावसत्त्वा-
दव्याप्तिरेव स्यादिति भावः । स्वसमानाधिकरणेत्यस्य व्यावृत्ति-
माह उक्तरूपेति साध्यव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः क्वचि-
दिति वह्निमान् धूमादित्यादौ घट-पटाद्यात्मकतत्तद्विपक्षावृत्तित्वाव-
च्छिन्नाभावकूटस्यापि निरुक्ताभावतया तदधिकरणाप्रसिद्धिनिबन्ध-
नाव्याप्तिवारणार्थमेव स्वसमानाधिकरणेत्युक्तमिति भावः । तद्घट-
भिन्नं पटत्वादित्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभाव-
कूटवत्त्वं तद्घटएव प्रसिद्धमतस्तत्राव्याप्त्यसम्भवात् क्वचिदित्युक्तम्,
...श्च हेत्वधिकरणयत्किञ्चिद्व्यक्तौ दैशिकविशेषणतया वर्त्तमानत्व-
मेव हेतुसामानाधिकरण्यं बोध्यं, तेन पृथिवी द्रव्यत्वप्रकारकप्रमावि-

---

त्वादित्यादिसंग्रहः साध्यव्यापकतावच्छेदकरूपावच्छिन्नव्यधिकर-
णधर्म्मावच्छिन्नाभाववद्वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभाव-
स्यैव वृत्तिमद्वृत्तित्वात्तस्य हेतौ सत्त्वादिति भावः ।

षयत्वादित्यादौ जले तेजसि च साधनसमानाधिकरणस्य जलावृत्त्यभावस्य तेजोवृत्त्यभावस्य च निरुक्तरूपावच्छिन्नप्रतियोगिताकत्वात्तदुभयकूटाधिकरणे जात्यादौ हेतोरवृत्तित्वेऽपि नातिव्याप्तिः ।

(३) हेत्वधिकरणजलादिप्रत्येकनिष्ठं यत्तादृशकूटं तदधिकरणे जलादौ हेतोः सत्त्वादितिभावः । उक्तसमुदायेत्यादि तादृशाभावसमुदायाधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन बोध्यं तेन द्रव्यभिन्नं सत्त्वादित्यादौ साधनसमानाधिकरणसाध्याभावकूटवति महाकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन वृत्तावपि नातिव्याप्तिस्तादृशवृत्तित्वाभावस्तादृशवृत्तितात्वसमनियतप्राप्तियोगिताको ग्राह्यस्तेन पर्वतवृत्तित्वादिसामान्याभावस्य वृत्तिमत्त्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्य च हेतावसत्त्वेऽपि वह्निमान् धूमाद्वाच्यं ज्ञेयत्वादित्यादौ नासम्भवो ऽधिकमभिहितं प्राक्, वृत्तिमद्वृत्त्यइत्यत्रापि वृत्तिमत्त्वं हेतुतावच्छेदकसम्बन्धेनैव ग्राह्यं तेन संयुक्तत्वसामान्याभावस्यापि समवायेन वृत्तिमति जात्यादौ प्रसिद्धस्य हेतावसत्त्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिरित्यर्थः साध्यवत्त्वज्ञानविरोधिताघटकसम्बन्धेनैव कूटाधिकरणतायाः पूर्वोक्तायाः प्रकृतलक्षणाघटकत्वात् तन्नाशङ्कितं । इत्यादिकमित्यादिपदेन गुरोःप्रतियोगितावच्छेदकत्वमते तादृशवृत्तितत्वत्वावच्छिन्नाभावा वृत्तिमद्वृत्तयो यावन्तस्तद्वत्त्वमित्यादेः सूवचं ॥ अभावबुद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुतायाः स्वमतेऽसिद्धत्वाशङ्कावारणार्थमाह विशेषणेति । ननु घटत्वेन पटो नास्तीतिबुद्धौ घटत्वविशिष्टवैशिष्ट्यावगाहित्वमेवासिद्धमतआहाभावेत्यादिना, स्वातन्त्र्येणेति न घटत्वादेः प्रतियोगिवृत्तित्वमविषयीकृत्येत्यर्थः तद्धर्म्मावच्छिन्नप्रतियोगित्वसं-

---

(३) ननु जलावृत्तिर्नास्ति तेजोऽवृत्तिर्नास्तीत्याद्यभावमादायाधिकरणाऽप्रसिद्ध्या ऽतिव्याप्त्यभावात् ग्रन्थासङ्गतिरिति न युक्तं यद्यत्सम्बन्धेन व्यापकत्वं तत्तत्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावकूटनिवेशापेक्षया लाघवेन साध्यव्यापकताघटकीभूत-यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावकूटवत्त्वं विवक्षितं तथात्र पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ साध्यव्यापकत्वघटकीभूतसमवायेन साध्याभावकूटाधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्तिरतस्तथानिवेशः, नच स्पन्दो महाकालत्वादित्यादौ कालिकसम्बन्धमादायातिव्याप्तिरिति वाच्यं हेत्वधिकरणयत्-

सर्गाभावप्रत्ययस्य तादृशसम्बन्धेन तद्धर्म्मविशिष्टवैशिष्ट्यावगाहित्वनियमादिति भावः । ननु यद् घटत्वेन घटोनास्तीत्याकारके समानाधिकरणधर्म्मावच्छिन्नाभावप्रत्यक्षे व्यभिचारान्नोक्तनियम इत्यतआह घटो नास्तीत्येवेति तथाच विशेषधर्म्मेण सामान्याभावोऽप्यसिद्ध एवेति, तद्व्यक्तित्वेन घटोनास्तीति प्रतीते घटे तद्व्यक्तित्वाभावमात्रावगाहित्वादेव न व्यभिचारोऽन्यथा सामान्यरूपेण विशेषाभावस्यापि सर्व कारापत्तेर्व्वाच्यत्वेनघटोनास्तीत्यपि प्रत्ययप्रसङ्गादिति भावः, प्रकृते योजयति तदिहेति इह घटत्वेन पटोनास्तीत्यभिलापस्थले तस्य व्यधिकरणधर्म्मस्य अथावगाहतइति, व्यधिकरणधर्म्मेण विशिष्टं प्रतियोगिनमित्युक्तेनान्वयः नच तत इति प्रमाया एवार्थसाधकत्वादिति भावः । ननूक्तव्याप्तावप्रयोजकत्वाद् घटत्वादेः प्रतियोगिवृत्तित्वमनवगाह्यापि तदवच्छेदकत्वावगाहिप्रत्ययसम्भवाद्व्यधिकरणधर्म्मावच्छिन्नाभावःसेत्स्यतीत्यत आह यदिपुनरिति,स्वरसवाही यथार्थः सच पटे घटत्वानवगाहिन एव सम्भवतीति भावः घटत्वेन पटो नास्तीत्यादिपदेन घटत्वेन द्रव्यं नास्ति द्रव्यत्वेन पटो नास्तीत्याद्यनुभवस्योपग्रहः, तुल्ययुक्त्या तदवृत्तिधर्म्मेण तस्यैव विशेषरूपेण सामान्यस्य सामान्यरूपेण विशेषस्याभावे बाधकाभावादिति ध्येयं घटत्वेन घटोनास्तीत्यादिपाठे घटत्वेनेत्यस्य घटत्वत्वविशिष्टेनेत्यर्थः, तेन ताद्रूप्येण प्रतियोग्यंशे घटत्ववत्त्वमनवगाह्य जातिसमानाधिकरणधर्म्मावच्छिन्नाभावप्रत्यक्षएवोक्तनियमस्य व्यभिचारो दर्शितः । तादृशाभावेति असमनियतधर्म्मावच्छिन्नप्रतियोगिताकाभाववारणमित्यर्थस्तेन सामान्यरूपेण विशेषस्य विशेषरूपेण च सामान्यस्याभावः संगृहीतः । यत्तु द्रव्यत्वेन घटोनास्तीति [illegible] प्रतीतेर्घटत्वाद्यवच्छिन्नाभावेनैवोपपत्तो सामान्यरूपेण विशेषाभावादौ मानाभाव इति तत्प्रागेव दुषितमिति । यदपि संयोगादिसंसर्गकघटत्वाद्यवच्छिन्नाभावत्वावच्छेदेन लाघवात्तादृशसम्बन्धेन घटत्वाद्यवच्छिन्नत्वस्य

स्वकालिकवृत्तित्वे दैशिकविशेषणतया वर्त्तमानसाध्याभावप्रतियोगितावच्छेदकत्वस्य साध्यव्यापकताघटकसम्बन्धे निवेशादतिव्याप्तिविरहात् । केचित्तुकालिको न व्यापकताघटकसम्बन्धः भाविभूतसाध्यकेषु व्यभिचारादित्यादिना ग्रन्थकृतैवोक्तत्वादित्याहुः, नच यत्किञ्चित् घटिततया ऽननुगमइतिवाच्यं हेत्वधिकरणवृत्तिसाध्याभावप्रतियोगितावच्छेदकसाध्यव्यापकताघटकसम्बन्धाविशिष्टत्वं व्याप्तिरित्यनु-

विरोधित्वकल्पनात् संयोगेन घटादिमति घटत्वादिना पटाद्यभा-वद्यासम्भव इति केनचिदुक्तं तदपि मन्दं तावतापि गगणत्वादिना घटादेर्वाच्यत्ववत्वादिना ज्ञेयत्वादेश्च व्यधिकरणधर्म्मावच्छिन्नाभावस्य दुर्व्वारत्वादिति गगणादेरधिकोणस्य स्वरूपसम्बन्धावच्छिन्नवाच्य-वाद्यभावस्य चाप्रसिद्धथा तत्र विरोधस्य कल्पयितुमशक्यादिति [illegible]क् ॥ [illegible] ॥

इतिजगदीश कृतव्यधिकरणधर्म्मावच्छिन्ना-भावीयटीका समाप्ता ।

[illegible]सम्भवात् वैशिष्ट्यश्च स्वावच्छिन्नताद्दशसाध्याभावकूटाधिक-[illegible]णनिरूपितवृत्तिसद्वृत्तित्वाभावकूटवत्त्वासम्बन्धेन विवक्षितत्वा-दिति संक्षेपः ।

इति श्रीअन्नदाचरणतर्कवागीशकृतप्रभाग्रन्थे व्यधिकरण-धर्म्मावच्छिन्नाभावीयटीप्पनी समाप्ता ।

अशुद्धाशुद्धपत्रम् ।

पृ०	पं०	अशुद्धं	शुद्धं
२	८	तत्तत्साघ्य	तत्तत्साध्य
३	१७	पर्य्याप्त्य-धिकरणं	पर्य्याप्त्य-धिकरणत्वं
५	३	यद्रुपाव-[illegible]न्नं	यद्रूपाव-च्छिन्नं
५	[illegible]	[illegible]पवत्त्वं	तद्रूपवत्त्वं
६	१६	[illegible]ाधिकरण	कूटाधिकरण
८	२३	गतेदिवि	गतेदिवि
९	[illegible]	शिवमणा	शिवमना
[illegible]	१७	तिरर्थक	निरर्थक
[illegible]	२५	ताद्दषे	ताद्दश
१३	१५	निरुपित	निरूपित
१३	२३	सम्भभावना	सम्भावना
१३	२५	यंसमा	यत्समा
१४	९	रुप	रूप
१५	६	वैशिष्ट	वैशिष्ट्य
१५	८	स्यलान्यत्वा	[illegible]
१५	९	ताद्दशा	[illegible]
१६	१७	वैयर्थ्यो[illegible]	[illegible]
१६	२२	करना	करणा
१६	२२	मित्यसैव	मित्यस्यैव
१९	५	रुपा	रूपा

अशुद्धाशुद्धपत्रम् ।

पृ०	पं०	अशुद्धं	शुद्धं
१९	२६	निष्ट	निष्ठ
२०	३	निरुपित	निरूपित
२०	१३	स्यप्रातयोगि	स्वप्रतियोगि
२१	२८	द्भम	द्भ्रम
२२	४	ग्निकरणं	धिकरणं
२३	७	माध्य	साध्य
२३	१५	दृत्ति	वृत्ति
२४	१३	सन्थान	सन्धान
२४	१४	घटित	घा[illegible]त
२४	१८	भ्रेदस्य	भेदस्य
२५	५	स्वरुप	स्वरूप
२६	४	स्वरुप	स्वरूप
२६	८	स्वरुपस्य	स्वरूपस्य
२६	१४	हति	इति
२६	१६	रेक्येपि	रैक्येपि
२८	६	स्वरुप	स्वरूप
२८	१५	तादृशन्य	तादृशान्य
२८	२५	ग्रस्था	ग्रन्थी
२९	८	स्वरुपा	स्वरूपा
३२	१७	घटत्वो	पटत्वो
३२	२४	निरूपकता-त्तिरुपित	निरूपकता-त्तिरूपित
३५	२९	इत्थतः	इत्यतः
३६	२७	व्याप्यता	व्यापकता
		[illegible]सहानसाग्रे-	महानसीय-
		च्छेदकत्वस्य साध्य	त्वेन
		हात् । केचित्तुकालि	लक्षणा
		व्यभि[illegible]तियोगित्वं	प्रतियोगित्वं
३८	२१	व्यापकत्वं	व्यापकत्वं
३८	२२	वादि	त्वादि
,,	,,	नव्यास्तु	नव्यास्तु
३९	४	दिक	दिक्
,,	१४	समान	समाना
४१	१९	पदामत्त्वे	पदासत्त्वे
,,	२३	सम्बन्धेम	सम्बन्धेन
४६	११	योगत्वस्य	योगित्व[illegible]
४८	५	परमान्वादौ	परमाण्वा[illegible]
,,	१३	चाक्षुधत्व	चाक्षुषत्व
,,	१४	विति	रिति
५६	१५	वित्यभि	रित्यभि
,,	२२	स्वसामा	स्वाश्रयसा
,,	३०	स्वविशिष्ट	स्वविशिष्ट
५७	१७	यतिप्रसङ्गः	यातिप्रसङ्गः
५८	२५	पव	एवं
७०	११	सभेद	मभेद
७७	१	गुरू	गुरु
८०	२०	सूचयितु	सूचयितु
९२	४	योगित	योगिता
९७	२२	वक्ष्यमाना	वक्ष्यमाणा
९८	९	वक्ष्यमान-त्वात्	वक्ष्यमाण-त्वात्
१००	१	नचंवै	नचैवं
,,	२९	वक्ष्यमाना	वक्ष्यमाणा
१०२	१३	माद्या	मादाया
१०६	२६	भाव	भावत्व
११०	२०	वक्ष्यमान	वक्ष्यमाण
११२	४	धूमा	धूमः
,,	११	करणताक	कर[illegible]तासा-मान्य[illegible]
११९	१४	नाव्याप्ति	नातिव्याप्ति
१३०	२४	वृत्तिमत	वृत्तिमतः

सूर्योदये वा पूर्वेभा [illegible] दूर्व [illegible] दि स्वं [illegible]ता । लिखित्वा । [illegible]

[illegible] विद्वान्स्या दि ति तल्लानि [illegible] ।।

प्रथमपक्षमभवेद्दृष्ट: पृष्ठपक्षाशोतुणो दृष्ट: ।

[illegible]पक्षमभवेद्भ्रात: [illegible]: सूर्यो [illegible]: स्मृत: ।। २ ।।

[illegible] कृत्तिका तुला लम्पू [illegible] दिशो दिशी ।

[illegible] विद्धं [illegible] ये [illegible] मा [illegible]दा पापमथा प्रयात

स्था
स्वर

च्छेदकत्वस्य
द्वात् । केचित्तु का
व्यभि[illegible] तथा
२८ २१ व्यापक
२८ २२ वाचि
" " नव्य